Kauthuma Saṃhitā of the Sāmaveda

edited by:
Anshuman Pandey

Notes

Arrangement: The arrangement of verses in the Sāmaveda Saṃhitā follows two distinct traditions. The first and older tradition, that followed by the Kauthuma recension, arranges the *saṃhitā* in terms of *prapāṭhaka*, *ardha-prapāṭhaka*, *daśati*, and *ṛcā*. In the Uttarārcika *sūkta* replaces the *daśati*.

The second tradition, followed by the Rāṇāyanīya recension, arranges the *saṃhitā* into *adhyāya*, *khaṇḍa*, and *ṛca* in the Pūrvārcika, and *adhyāya*, *khaṇḍa*, *sūkta* and *ṛcā* in the Uttarārcika.

The verses in this edition have been numbered in two manners. The primary method of numbering indicates the above arrangement and the second provides a sequential numbering of the *ṛca-s*. The primary method follows as such:

0 0 0 00 00 x

In the above method, found in the left margin of the document, the first number refers to the *ārcika* in which the verse is found, the second refers to the *prapāṭhaka*, the third refers to the *ardha*, the fourth two refer to the *daśati* or *sūkta*, the fifth two refer to the *ṛcā* number within the *daśati*, and the sixth letter (x) refers to the verse line of the *ṛcā*.

The second numbering scheme is found at the end of the verse. This number is a serial number assigned to every verse as it is found sequentially in the *saṃhitā*.

References: The following sources were used to prepare the present edition.

1. Benfey, Theodor [herausgegeben, übersetzt, und mit Glossar versehen von]. *Die Hymnen des Sama-veda.* Hildesheim: New York, 1978.

2. Devi Chand [translated by]. *Sama Veda.* 1st edition. Hoshiarpur, 1963.

3. Ganapati, S. V. [translated by]. *Sāma Veda.* 1st edition. Motilal Banarsidass: New Delhi, 1982.

4. Griffith, Ralph T. H. [translated by]; Nag Sharan Singh and Surendra Pratap [enlarged by]. *The Sāmaveda Saṃhitā.* Revised and Enlarged Edition. Nag Publishers: Delhi, 1991.

5. Sarasvati, Satya Prakash [translated by]; assisted by Satyakam Vidyalankar. सामवेद संहिता (*Sāmaveda Saṃhitā*). Veda Pratishthana: New Delhi, 1991-1992.

6. सातवलेकर, पं. श्रीपाद दामोदर [सम्पादक]. सामवेदसंहिता. चतुर्थः संस्करणम्. स्वाद्याय-मण्डल : पारडी, १९८२.

Seattle, Washington, USA — Anshuman Pandey
January 24, 1998 — *apandey@u.washington.edu*

सामवेद संहिता

[कौथुम शाखा]

पूर्वार्चिकः (छन्द आर्चिकः)

आग्नेयं काण्डम्

प्रथमः प्रपाठकः । प्रथमोऽर्धः

प्रथमा दशतिः

1 1 1 01 01 a अग्न आ याहि वीतये गृणानो हव्यदातये ।
1 1 1 01 01 b नि होता सत्सि बर्हिषि ॥ १
1 1 1 01 01 a त्वमग्ने यज्ञानाꣳ होता विश्वेषाꣳ हितः ।
1 1 1 01 02 b देवेभिर्मानुषे जने ॥ २
1 1 1 01 03 a अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् ।
1 1 1 01 03 b अस्य यज्ञस्य सुक्रतुम् ॥ ३
1 1 1 01 04 a अग्निर्वृत्राणि जङ्घनद्द्रविणस्युर्विपन्यया ।
1 1 1 01 04 b समिद्धः शुक्र आहुतः ॥ ४
1 1 1 01 05 a प्रेष्ठं वो अतिथिꣳ स्तुषे मित्रमिव प्रियम् ।
1 1 1 01 05 b अग्ने रथं न वेद्यम् ॥ ५
1 1 1 01 06 a त्वं नो अग्ने महोभिः पाहि विश्वस्या अरातेः ।
1 1 1 01 06 b उत द्विषो मर्त्यस्य ॥ ६
1 1 1 01 07 a एह्यू षु ब्रवाणि तेऽग्न इत्थेतरा गिरः ।
1 1 1 01 07 b एभिर्वर्धास इन्दुभिः ॥ ७
1 1 1 01 08 a आ ते वत्सो मनो यमत्परमाच्चित्सधस्थात् ।
1 1 1 01 08 b अग्ने त्वां कामये गिरा ॥ ८
1 1 1 01 09 a त्वामग्ने पुष्करादध्यथर्वा निरमन्थत ।
1 1 1 01 09 b मूर्ध्नो विश्वस्य वाघतः ॥ ९
1 1 1 01 10 a अग्ने विवस्वदा भरास्मभ्यमूतये महे ।
1 1 1 01 10 b देवो ह्यसि नो दृशे ॥ १०

[स्व. ९ । उ. ना । धा. ३७ । वे ॥]

द्वितीया दशतिः

1 1 1 02 01 a नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः ।
1 1 1 02 01 b अमैरमित्रमर्दय ॥ ११
1 1 1 02 02 a दूतं वो विश्ववेदसꣳ हव्यवाहममर्त्यम् ।
1 1 1 02 02 b यजिष्ठमृञ्जसे गिरा ॥ १२
1 1 1 02 03 a उप त्वा जामयो गिरो देदिशतीर्हविष्कृतः ।
1 1 1 02 03 b वायोरनीके अस्थिरन् ॥ १३
1 1 1 02 04 a उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम् ।
1 1 1 02 04 b नमो भरन्त एमसि ॥ १४
1 1 1 02 05 a जराबोध तद्विविड्ढि विशेविशे यज्ञियाय ।
1 1 1 02 05 b स्तोमꣳ रुद्राय दृशीकम् ॥ १५
1 1 1 02 06 a प्रति त्यं चारुमध्वरं गोपीथाय प्र हूयसे ।
1 1 1 02 06 b मरुद्भिरग्न आ गहि ॥ १६
1 1 1 02 07 a अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः ।
1 1 1 02 07 b सम्राजन्तमध्वराणाम् ॥ १७
1 1 1 02 08 a और्वभृगुवच्छुचिमप्नवानवदा हुवे ।
1 1 1 02 08 b अग्निꣳ समुद्रवाससम् ॥ १८
1 1 1 02 09 a अग्निमिन्धानो मनसा धियꣳ सचेत मर्त्यः ।
1 1 1 02 09 b अग्निमिन्धे विवस्वभिः ॥ १९
1 1 1 02 10 a आदित्प्रत्नस्य रेतसो ज्योतिः पश्यन्ति वासरम् ।
1 1 1 02 10 b परो यदिध्यते दिवि ॥ २०

[स्व. ६ । उ. २ । धा. ५२ । खा ॥]

तृतीया दशतिः

1 1 1 03 01 a अग्निं वो वृधन्तमध्वराणां पुरूतमम् ।
1 1 1 03 01 b अच्छा नप्त्रे सहस्वते ॥ २१
1 1 1 03 02 a अग्निस्तिग्मेन शोचिषा यꣳसद्विश्वं न्या३त्रिणम् ।
1 1 1 03 02 b अग्निर्नो वꣳसते रयिम् ॥ २२
1 1 1 03 03 a अग्ने मृड महाꣳ अस्यय आ देवयुं जनम् ।
1 1 1 03 03 b इयेथ बर्हिरासदम् ॥ २३
1 1 1 03 04 a अग्ने रक्षा णो अꣳहसः प्रति स्म देव रीषतः ।
1 1 1 03 04 b तपिष्ठैरजरो दह ॥ २४
1 1 1 03 05 a अग्ने युङ्क्ष्वा हि ये तवाश्वासो देव साधवः ।
1 1 1 03 05 b अरं वहन्त्याशवः ॥ २५
1 1 1 03 06 a नि त्वा नक्ष्य विश्पते द्युमन्तं धीमहे वयम् ।
1 1 1 03 06 b सुवीरमग्न आहुत ॥ २६
1 1 1 03 07 a अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् ।
1 1 1 03 07 b अपाꣳ रेताꣳसि जिन्वति ॥ २७

1 1 1 03 08 a इममू षु त्वमस्माकꣳ सनिं गायत्रं नव्याꣳसम् ।
1 1 1 03 08 b अग्ने देवेषु प्र वोचः ॥ २८
1 1 1 03 09 a तं त्वा गोपवनो गिरा जनिष्ठदग्ने अङ्गिरः ।
1 1 1 03 09 b स पावक श्रुधी हवम् ॥ २९
1 1 1 03 10 a परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् ।
1 1 1 03 10 b दधद्रत्नानि दाशुषे ॥ ३०
1 1 1 03 11 a उदु त्यं जातवेदसं देवं वहन्ति केतवः ।
1 1 1 03 11 b दृशे विश्वाय सूर्यम् ॥ ३१
1 1 1 03 12 a कविमग्निमुप स्तुहि सत्यधर्माणमध्वरे ।
1 1 1 03 12 b देवममीवचातनम् ॥ ३२
1 1 1 03 13 a शं नो देवीरभिष्टये शं नो भवन्तु पीतये ।
1 1 1 03 13 b शं योरभि स्रवन्तु नः ॥ ३३
1 1 1 03 14 a कस्य नूनं परीणसि धियो जिन्वसि सत्पते ।
1 1 1 03 14 b जोषाता यस्य ते गिरः ॥ ३४

[स्व. ९ । उ. २ । धा. ५७ । थे ॥]

चथुर्थी दशतिः

1 1 1 04 01 a यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे ।
1 1 1 04 01 b प्रप्र वयममृतं जातवेदसं प्रियं मित्रं न शꣳसिषम् ॥ ३५
1 1 1 04 02 a पाहि नो अग्न एकया पाह्यू३त द्वितीयया ।
1 1 1 04 02 b पाहि गीर्भिस्तिसृभिरूर्जां पते पाहि चतसृभिर्वसो ॥ ३६
1 1 1 04 03 a बृहद्भिरग्ने अर्चिभिः शुक्रेण देव शोचिषा ।
1 1 1 04 03 b भरद्वाजे समिधानो यविष्ठ्य रेवत्पावक दीदिहि ॥ ३७
1 1 1 04 04 a त्वे अग्ने स्वाहुत प्रियासः सन्तु सूरयः ।
1 1 1 04 04 b यन्तारो ये मघवानो जनानामूर्वं दयन्त गोनाम् ॥ ३८
1 1 1 04 05 a अग्ने जरितर्विश्पतिस्तपानो देव रक्षसः ।
1 1 1 04 05 b अप्रोषिवान्गृहपते महाꣳ असि दिवस्पायुर्दुरोणयुः ॥ ३९
1 1 1 04 06 a अग्ने विवस्वदुषसश्चित्रꣳ राधो अमर्त्य ।
1 1 1 04 06 b आ दाशुषे जातवेदो वहा त्वमद्या देवाꣳ उषर्बुधः ॥ ४०
1 1 1 04 07 a त्वं नश्चित्र ऊत्या वसो राधाꣳसि चोदय ।
1 1 1 04 07 b अस्य रायस्त्वमग्ने रथीरसि विदा गाधं तुचे तु नः ॥ ४१
1 1 1 04 08 a त्वमित्सप्रथा अस्यग्ने त्रातर्ऋतः कविः ।
1 1 1 04 08 b त्वां विप्रासः समिधान दीदिव आ विवासन्ति वेधसः ॥ ४२
1 1 1 04 09 a आ नो अग्ने वयोवृधꣳ रयिं पावक शꣳस्यम् ।
1 1 1 04 09 b रास्वा च न उपमाते पुरुस्पृहꣳ सुनीती सुयशस्तरम् ॥ ४३
1 1 1 04 10 a यो विश्वा दयते वसु होता मन्द्रो जनानाम् ।
1 1 1 04 10 b मधोर्न पात्रा प्रथमान्यस्मै प्र स्तोमा यन्त्वग्नये ॥ ४४

[स्व. ९ । उ. ३ । धा. ८३ । दी ॥]

पञ्चमी दशतिः

1 1 1 05 01 a एना वो अग्निं नमसोर्जो नपातमा हुवे ।
1 1 1 05 01 b प्रियं चेतिष्ठमरतिꣳ स्वाध्वरं विश्वस्य दूतममृतम् ॥ ४५
1 1 1 05 02 a शेषे वनेषु मातृषु सं त्वा मर्तास इन्धते ।
1 1 1 05 02 b अतन्द्रो हव्यं वहसि हविष्कृत आदिद्देवेषु राजसि ॥ ४६
1 1 1 05 03 a अदर्शि गातुवित्तमो यस्मिन्व्रतान्यादधुः ।
1 1 1 05 03 b उपो षु जातमार्यस्य वर्धनमग्निं नक्षन्तु नो गिरः ॥ ४७
1 1 1 05 04 a अग्निरुक्थे पुरोहितो ग्रावाणो बर्हिरध्वरे ।
1 1 1 05 04 b ऋचा यामि मरुतो ब्रह्मणस्पते देवा अवो वरेण्यम् ॥ ४८
1 1 1 05 05 a अग्निमीडिष्वावसे गाथाभिः शीरशोचिषम् ।
1 1 1 05 05 b अग्निꣳ राये पुरुमीढ श्रुतं नरोऽग्निः सुदीतये छर्दिः ॥ ४९
1 1 1 05 06 a श्रुधि श्रुत्कर्ण वह्निभिर्देवैरग्ने सयावभिः ।
1 1 1 05 06 b आ सीदतु बर्हिषि मित्रो अर्यमा प्रातर्यावभिरध्वरे ॥ ५०
1 1 1 05 07 a प्र दैवोदासो अग्निर्देव इन्द्रो न मज्मना ।
1 1 1 05 07 b अनु मातरं पृथिवीं वि वावृते तस्थौ नाकस्य शर्मणि ॥ ५१
1 1 1 05 08 a अध ज्मो अध वा दिवो बृहतो रोचनादधि ।
1 1 1 05 08 b अया वर्धस्व तन्वा गिरा ममा जाता सुक्रतो पृण ॥ ५२
1 1 1 05 09 a कायमानो वना त्वं यन्मातॄरजगन्नपः ।
1 1 1 05 09 b न तत्ते अग्ने प्रमृषे निवर्तनं यद्दूरे सन्निहाभुवः ॥ ५३
1 1 1 05 10 a नि त्वामग्ने मनुर्दधे ज्योतिर्जनाय शश्वते ।
1 1 1 05 10 b दीदेथ कण्व ऋतजात उक्षितो यं नमस्यन्ति कृष्टयः ॥ ५४

[स्व. ६ । उ. ६ । धा. ७१ । षा ॥]

इति पर्थमप्रपाठके प्रथमोऽर्धः ॥

प्रथम प्रपाठकः । द्वितीयोऽर्धः

षष्ठी दशतिः

1 1 2 06 01 a देवो वो द्रविणोदाः पूर्णां विवष्ट्वासिचम् ।
1 1 2 06 01 b उद्वा सिञ्जध्वमुप वा पृणध्वमादिद्वो देव ओहते ॥ ५५
1 1 2 06 02 a प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता ।
1 1 2 06 02 b अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः ॥ ५६
1 1 2 06 03 a ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता ।
1 1 2 06 03 b ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे ॥ ५७
1 1 2 06 04 a प्र यो राये निनीषति मर्तो यस्ते वसो दाशत् ।
1 1 2 06 04 b स वीरं धत्ते अग्न उक्थशꣳसिनं त्मना सहस्रपोषिणम् ॥ ५८
1 1 2 06 05 a प्र वो यह्वं पुरूणां विशां देवयतीनाम् ।

1 1 2 06 05 b अग्निꣳ सूक्तेभिर्वचोभिर्वृणीमहे यꣳसमिदन्य इन्धते ॥ ५९
1 1 2 06 06 a अयमग्निः सुवीर्यस्येशे हि सौभगस्य ।
1 1 2 06 06 b राय ईशे स्वपत्यस्य गोमत ईशे वृत्रहथानाम् ॥ ६०
1 1 2 06 07 a त्वमग्ने गृहपतिस्त्वꣳ होता नो अध्वरे ।
1 1 2 06 07 b त्वं पोता विश्ववार प्रचेता ताक्षि यासि च वार्यम् ॥ ६१
1 1 2 06 08 a सखायस्त्वा ववृमहे देवं मर्तास ऊतये ।
1 1 2 06 08 b अपां नपातꣳ सुभगꣳ सुदꣳससꣳ सुप्रतूर्तिमनेहसम् ॥ ६२

[स्व. ११। उ. २। धा. ५७। ख ॥]

सप्तमी दशतिः

1 1 2 07 01 a आ जुहोता हविषा मर्जयध्वं नि होतारं गृहपतिं दधिध्वम् ।
1 1 2 07 01 b इडस्पदे नमसा रातहव्यꣳ सपर्यता यजतं पस्त्यानाम् ॥ ६३
1 1 2 07 02 a चित्र इच्छिशोस्तरुणस्य वक्षथो न यो मातरावन्वेति धातवे ।
1 1 2 07 02 b अनूधा यदजीजनदधा चिदा ववक्षत्सद्यो महि दूत्या३ं चरन् ॥ ६४
1 1 2 07 03 a इदं त एकं पर ऊ त एकं तृतीयेन ज्योतिषा सं विशस्व ।
1 1 2 07 03 b संवेशनस्तन्वे३ चारुरेधि प्रियो देवानां परमे जनित्रे ॥ ६५
1 1 2 07 04 a इमꣳ स्तोममर्हते जातवेदसे रथमिव सं महेमा मनीषया ।
1 1 2 07 04 b भद्रा हि नः प्रमतिरस्य सꣳसद्यग्ने सख्ये मा रिषामा वयं तव ॥ ६६
1 1 2 07 05 a मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् ।
1 1 2 07 05 b कविꣳ सम्राजमतिथिं जनानामासन्नाः पात्रं जनयन्त देवाः ॥ ६७
1 1 2 07 06 a वि त्वदापो न पर्वतस्य पृष्ठादुक्थेभिरग्ने जनयन्त देवाः ।
1 1 2 07 06 b तं त्वा गिरः सुष्टुतयो वाजयन्त्याजिं न गिर्ववाहो जिग्युरश्वाः ॥ ६८
1 1 2 07 07 a आ वो राजानमध्वरस्य रुद्रꣳ होतारꣳ सत्ययजꣳ रोदस्योः ।
1 1 2 07 07 b अग्निं पुरा तनयित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वम् ॥ ६९
1 1 2 07 08 a इन्धे राजा समर्यो नमोभिर्यस्य प्रतीकमाहुतं घृतेन ।
1 1 2 07 08 b नरो हव्येभिरीडते सबाध आग्निरग्रमुषसामशोचि ॥ ७०
1 1 2 07 09 a प्र केतुना बृहता यात्यग्निरा रोदसी वृषभो रोरवीति ।
1 1 2 07 09 b दिवश्चिदन्तादुपमामुदानडपामुपस्थे महिषो ववर्ध ॥ ७१
1 1 2 07 10 a अग्निं नरो दीधितिभिरण्योर्हस्तच्युतं जनयत प्रशस्तम् ।
1 1 2 07 10 b दूरेदृशं गृहपतिमथव्युम् ॥ ७२

[स्व. १५। उ. ८। धा. १०४। बी ॥]

अष्टमी दशतिः

1 1 2 08 01 a अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमुषासम् ।
1 1 2 08 01 b यह्वा इव प्र वयामुज्जिहानाः प्र भानवः सस्रते नाकमच्छ ॥ ७३
1 1 2 08 02 a प्र भूर्जयन्तं महां विपोधां मूरैरमूरं पुरां दर्माणम् ।
1 1 2 08 02 b नयन्तं गीर्भिर्वना धियं धा हरिश्मश्रुं न वार्मणा धनर्चिम् ॥ ७४
1 1 2 08 03 a शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी द्यौरिवासि ।

1 1 2 08 03 b विश्वा हि माया अवसि स्वधावन्भद्रा ते पूषन्निह रातिरस्तु॥ ७५
1 1 2 08 04 a इडामग्ने पुरुदꣳसꣳ सनिं गोः शश्वत्तमꣳ हवमानाय साध ।
1 1 2 08 04 b स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ ७६
1 1 2 08 05 a प्र होता जातो महान्नभोविन्नृषद्मा सीददपां विवर्ते ।
1 1 2 08 05 b दधद्यो धायी सुते वयाꣳसि यन्ता वसूनि विधते तनूपाः ॥ ७७
1 1 2 08 06 a प्र सम्राजमसुरस्य प्रशस्तं पुꣳसः कृष्टीनामनुमाद्यस्य ।
1 1 2 08 06 b इन्द्रस्येव प्र तवसस्कृतानि वन्दद्वारा वन्दमाना विवष्टु ॥ ७८
1 1 2 08 07 a अरण्योर्निहितो जातवेदा गर्भ इवेत्सुभृतो गर्भिणीभिः ।
1 1 2 08 07 b दिवेदिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः ॥ ७९
1 1 2 08 08 a सनादग्ने मृणसि यातुधानान्न त्वा रक्षाꣳसि पृतनासु जिग्युः ।
1 1 2 08 08 b अनु दह सहमूरान्कयादो मा ते हेत्या मुक्षत दैव्यायाः ॥ ८०

[स्व. १३ । उ. १ । धा. ६ । टौ ॥]

नवमी दशतिः

1 1 2 09 01 a अग्न ओजिष्ठमा भर द्युम्नमस्मभ्यमध्रिगो ।
1 1 2 09 01 b प्र नो राये पनीयसे रत्सि वाजाय पन्थाम् ॥ ८१
1 1 2 09 02 a यदि वीरो अनु ष्यादग्निमिन्धीत मर्त्यः ।
1 1 2 09 02 b आजुह्वद्धव्यमानुषक्षर्म भक्षीत दैव्यम् ॥ ८२
1 1 2 09 03 a त्वेषस्ते धूम ऋण्वति दिवि सं च्छुक्र आततः ।
1 1 2 09 03 b सूरो न हि द्युता त्वं कृपा पावक रोचसे ॥ ८३
1 1 2 09 04 a त्वꣳ हि क्षैतवद्यशोऽग्ने मित्रो न पत्यसे ।
1 1 2 09 04 b त्वं विचर्षणे श्रवो वसो पुष्टिं न पुष्यसि ॥ ८४
1 1 2 09 05 a प्रातरग्निः पुरुप्रियो विष स्तवेतातिथिः ।
1 1 2 09 05 b विश्वे यस्मिन्नमर्त्ये हव्यं मर्तास इन्धते ॥ ८५
1 1 2 09 06 a यद्वाहिष्ठं तदग्नये बृहदर्च विभावसो ।
1 1 2 09 06 b महिषीव त्वद्रयिस्त्वद्वाजा उदीरते ॥ ८६
1 1 2 09 07 a विशोविशो वो अतिथिं वाजयन्तः पुरुप्रियम् ।
1 1 2 09 07 b अग्निं वो दुर्यं वचः स्तुषे शूषस्य मन्मभिः ॥ ८७
1 1 2 09 08 a बृहद्वयो हि भानवेऽर्चा देवायाग्नये ।
1 1 2 09 08 b यं मित्रं न प्रशस्तये मर्तासो दधिरे पुरः ॥ ८८
1 1 2 09 09 a अगन्म वृत्रहन्तमं ज्येष्ठमग्निमानवम् ।
1 1 2 09 09 b य स्म श्रुतर्वन्नार्क्षे बृहदनीक इध्यते ॥ ८९
1 1 2 09 10 a जातः परेण धर्मणा यत्सवृद्भिः सहाभुवः ।
1 1 2 09 10 b पिता यत्कश्यपस्याग्निः श्रद्धा माता मनुः कविः ॥ ९०

[स्व. १४ । उ. ७ । धा. ५१ । थ ॥]

दशमी दशतिः

1 1 2 10 01 a सोमꣳ राजानं वरुणमग्निमन्वारभामहे ।

1 1 2 10 01 b आदित्यं विष्णु꣡ꣳ सूर्यं ब्रह्मानं च बृहस्पतिम् ॥ ९१
1 1 2 10 02 a इत एत उदारुहन्दिवः पृष्ठान्या रुहन् ।
1 1 2 10 02 b प्र भूर्जयो यथा पथोद्यामङ्गिरसो ययुः ॥ ९२
1 1 2 10 03 a राये अग्ने महे त्वा दानाय समिधीमहि ।
1 1 2 10 03 b ईडिष्वा हि महे वृषं द्यावा होत्राय पृथिवी ॥ ९३
1 1 2 10 04 a दधन्वे वा यदीमनु वोचद्ब्रह्मेति वेरु तत् ।
1 1 2 10 04 b परि विश्वानि काव्या नेमिश्चक्रमिवाभुवत् ॥ ९४
1 1 2 10 05 a प्रत्यग्ने हरसा हरः शृणाहि विश्वतस्परि ।
1 1 2 10 05 b यातुधानस्य रक्षसो बलं न्युब्जवीर्यम् ॥ ९५
1 1 2 10 06 a त्वमग्ने वसूꣳरिह रुद्राꣳ आदित्याꣳ उत ।
1 1 2 10 06 b यजा स्वध्वरं जनं मनुजातं घृतप्रुषम् ॥ ९६

[स्व. ४ । उ. ३ । धा. २० । दौ ॥]

इति प्रथमप्रपाठके द्वितीयोऽर्धः ॥

इति प्रथमः प्रपाठकश्च समाप्तः ॥

द्वितीय प्रपाठकः । प्रथमोऽर्धः

प्रथमा दशतिः

1 2 1 01 01 a पुरु त्वा दाशिवाꣳ वोचेऽरिरग्ने तव स्विदा ।
1 2 1 01 01 b तोदस्येव शरण आ महस्य ॥ ९७
1 2 1 01 02 a प्र होत्रे पूर्व्यं वचोऽग्नये भरता बृहत् ।
1 2 1 01 02 b विपां ज्योतीꣳषि बिभ्रते न वेधसे ॥ ९८
1 2 1 01 03 a अग्ने वाजस्य गोमत ईशानः सहसो यहो ।
1 2 1 01 03 b अस्मे धेहि जातवेदो महि श्रवः ॥ ९९
1 2 1 01 04 a अग्ने यजिष्ठो अध्वरे देवां देवयते यज ।
1 2 1 01 04 b होता मन्द्रो वि राजस्यति स्रिधः ॥ १००
1 2 1 01 05 a जज्ञानः सप्त मातृभिर्मेधामाशासत श्रिये ।
1 2 1 01 05 b अयं ध्रुवो रयीणां चिकेतदा ॥ १०१
1 2 1 01 06 a उत स्या नो दिवा मतिरदितिरूत्यागमत् ।
1 2 1 01 06 b सा शन्ताता मयस्करदप स्रिधः ॥ १०२
1 2 1 01 07 a ईडिष्वा हि प्रतीव्याꣳ यजस्व जातवेदसम् ।
1 2 1 01 07 b चरिष्णुधूममगृभीतशोचिषम् ॥ १०३
1 2 1 01 08 a न तस्य मायया च न रिपुरीशीत मर्त्यः ।
1 2 1 01 08 b यो अग्नये ददाश हव्यदातये ॥ १०४
1 2 1 01 09 a अप त्यं वृजिनꣳ रिपुꣳ स्तेनमग्ने दुराध्यम् ।
1 2 1 01 09 b दविष्ठमस्य सत्पते कृधी सुगम् ॥ १०५

1 2 1 01 10 a श्रुष्ट्यग्ने नवस्य मे स्तोमस्य वीर विश्पते ।
1 2 1 01 10 b नि मायिनस्तपसा रक्षसो दह ॥ १०६

[स्व. ९ । उ. ३ । धा. ४२ । दा ॥]

द्वितीया दशतिः

1 2 1 02 01 a प्र मꣳहिष्ठाय गायत ऋताव्ने बृहते शुक्रशोचिषे ।
1 2 1 02 01 b उपस्तुतासो अग्नये ॥ १०७
1 2 1 02 02 a प्र सो अग्ने तवोतिभिः सुवीराभिस्तरति वाजकर्मभिः ।
1 2 1 02 02 b यस्य त्वꣳ सख्यमाविथ ॥ १०८
1 2 1 02 03 a तं गूर्धया स्वर्णरं देवासो देवमरतिं दधन्विरे ।
1 2 1 02 03 b देवत्रा हव्यमूहिषे ॥ १०९
1 2 1 02 04 a मा नो हृणीथा अतिथिं वसुरग्निः पुरुप्रशस्त एशः ।
1 2 1 02 04 b यः सुहोता स्वध्वरः ॥ ११०
1 2 1 02 05 a भद्रो नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः ।
1 2 1 02 05 b भद्रा उत प्रशस्तयः ॥ १११
1 2 1 02 06 a यजिष्ठं त्वा ववृमहे देवं देवत्रा होतारममर्त्यम् ।
1 2 1 02 06 b अस्य यज्ञस्य सुक्रतुम् ॥ ११२
1 2 1 02 07 a तदग्ने द्युम्नमा भर यत्सासाहा सदने कं चिदत्रिणम् ।
1 2 1 02 07 b मन्युं जनस्य दूढ्यम् ॥ ११३
1 2 1 02 08 a यद्वा उ विश्पतिः शितः सुप्रीतो मनुषो विशे ।
1 2 1 02 08 b विश्वेदग्निः प्रति रक्षाꣳसि सेधति ॥ ११४

[स्व. १२ । उ. २ । धा. ४४ । छी ॥]

॥ इत्याग्नेय पर्वं काण्डम् ॥

ऐन्द्र काण्ड

तृतीया दशतिः

1 2 1 03 01 a तद्वो गाय सुते सचा पुरुहूताय सत्वने ।
1 2 1 03 01 b शं यद्गवे न शाकिने ॥ ११५
1 2 1 03 02 a यस्ते नूनꣳ शतक्रतविन्द्र द्युम्नितमो मदः ।
1 2 1 03 02 b तेन नूनं मदे मदेः ॥ ११६
1 2 1 03 03 a गाव उप वदावटे महि यज्ञस्य रप्सुदा ।
1 2 1 03 03 b उभा कर्णा हिरण्यया ॥ ११७
1 2 1 03 04 a अरमश्वाय गायत श्रुतकक्षारं गवे ।
1 2 1 03 04 b अरमिन्द्रस्य धाम्ने ॥ ११८
1 2 1 03 05 a तमिन्द्रं वाजयामसि महे वृत्राय हन्तवे ।
1 2 1 03 05 b स वृषा वृषभो भुवत् ॥ ११९
1 2 1 03 06 a त्वमिन्द्र बलादधि सहसो जात ओजसः ।
1 2 1 03 06 b त्वꣳ सन्वृषन्वृषेदसि ॥ १२०
1 2 1 03 07 a यज्ञ इन्द्रमवर्धयद्यद्भूमिं व्यवर्तयत् ।
1 2 1 03 07 b चक्राण ओपशं दिवि ॥ १२१
1 2 1 03 08 a यदिन्द्राहं तथा त्वमीशीय वस्व एक इत् ।
1 2 1 03 08 b स्तोता मे गोसखा स्यात् ॥ १२२
1 2 1 03 09 a पन्यंपन्यमित्सोतार आ धावत मद्याय ।
1 2 1 03 09 b सोमं वीराय शूराय ॥ १२३
1 2 1 03 10 a इदं वसो सुतमन्धः पिबा सुपूर्णमुदरम् ।
1 2 1 03 10 b अनाभयिन्नरिमा ते ॥ १२४

[स्व. १० । उ. ४ । धा. ४६ । भू ॥]

चतुर्थी दशतिः

1 2 1 04 01 a उद्घेदभि श्रुतामघं वृषभं नर्यापसम् ।
1 2 1 04 01 b अस्तारमेषि सूर्य ॥ १२५
1 2 1 04 02 a यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य ।
1 2 1 04 02 b सर्वं तदिन्द्र ते वशे ॥ १२६
1 2 1 04 03 a य आनयत्परावतः सुनीती तुर्वशं यदुम् ।
1 2 1 04 03 b इन्द्रः स नो युवा सखा ॥ १२७
1 2 1 04 04 a मा न इन्द्राभ्याऽऽ३ दिशः सूरो अक्तुष्वा यमत ।
1 2 1 04 04 b त्वा युजा वनेम तत् ॥ १२८
1 2 1 04 05 a एन्द्र सानसिꣳ रयिꣳ सजित्वानꣳ सदासहम् ।
1 2 1 04 05 b वर्षिष्ठमूतये भर ॥ १२९
1 2 1 04 06 a इन्द्रं वयं महाधन इन्द्रमर्भे हवामहे ।

1 2 1 04 06 b युजं वृत्रेषु वज्रिणम् ॥ १३०
1 2 1 04 07 a अपिबत्कद्रुवः सुतमिन्द्रः सहस्रबाह्वे ।
1 2 1 04 07 b तत्राददिष्ट पौँस्यम् ॥ १३१
1 2 1 04 08 a वयमिन्द्र त्वायवोऽभि प्र नोनुमो वृषन् ।
1 2 1 04 08 b विद्धी त्वा३स्य नो वसो ॥ १३२
1 2 1 04 09 a आ घा ये अग्निमिन्धते स्तृणन्ति बर्हिरानुषक् ।
1 2 1 04 09 b येषामिन्द्रो युवा सखा ॥ १३३
1 2 1 04 10 a भिन्धि विश्वा अप द्विषः परि बाधो जही मृधः ।
1 2 1 04 10 b वसु स्पार्हं तदा भर ॥ १३४

[स्व. ८ । उ. ३ । धा. ३२ । डा ॥]

पञ्चमी दशतिः

1 2 1 05 01 a इहेव शृण्व एषां कशा हस्तेषु यद्वदान् ।
1 2 1 05 01 b नि यामं चित्रमृञ्जते ॥ १३५
1 2 1 05 02 a इम उ त्वा वि चक्षते सखाय इन्द्र सोमिनः ।
1 2 1 05 02 b पुष्टावन्तो यथा पशुम् ॥ १३६
1 2 1 05 03 a समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः ।
1 2 1 05 03 b समुद्रायेव सिन्धवः ॥ १३७
1 2 1 05 04 a देवानामिदवो महत्तदा वृणीमहे वयम् ।
1 2 1 05 04 b वृष्णामस्मभ्यमूतये ॥ १३८
1 2 1 05 05 a सोमानाँ स्वरणं कृणुहि ब्रह्मणस्पते ।
1 2 1 05 05 b कक्षीवन्तं य औशिजः ॥ १३९
1 2 1 05 06 a बोधन्मना इदस्तु नो वृत्रहा भूर्यासुतिः ।
1 2 1 05 06 b शृणोतु शक्र आशिषम् ॥ १४०
1 2 1 05 07 a अद्या नो देव सवितः प्रजावत्सावीः सौभगम् ।
1 2 1 05 07 b परा दुःष्वप्न्यँ सुव ॥ १४१
1 2 1 05 08 a क्वा३स्य वृषभो युवा तुविग्रीवो अनानतः ।
1 2 1 05 08 b ब्रह्मा कस्तँ सपर्यति ॥ १४२
1 2 1 05 09 a उपह्वरे गिरीणाँ सङ्गमे च नदीनाम् ।
1 2 1 05 09 b धिया विप्रो अजायत ॥ १४३
1 2 1 05 10 a प्र सम्राजं चर्षणीनामिन्द्रँ स्तोता नव्यं गीर्भिः ।
1 2 1 05 10 b नरं नृषाहं मँहिष्ठम् ॥ १४४

[स्व. ९ । उ. ना । धा. ४४ । ली ॥]

इति द्वितीयप्रपाठके प्रथमोऽर्धः ॥

द्वितीय प्रपाठकः । द्वितीयोऽर्धः

षष्ठी दशतिः

1 2 2 06 01 a अपादु शिप्रयन्धसः सुदक्षस्य प्रहोषिणः ।
1 2 2 06 01 b इन्द्रोरिन्द्रो यवाशिरः ॥ १४५
1 2 2 06 02 a इमा उ त्वा पुरुवसोऽभि प्र नोनवुर्गिरः ।
1 2 2 06 02 b गावो वत्सं न धेनवः ॥ १४६
1 2 2 06 03 a अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम् ।
1 2 2 06 03 b इत्था चन्द्रमसो गृहे ॥ १४७
1 2 2 06 04 a यदिन्द्रो अनयद्रितो महीरपो वृषन्तमः ।
1 2 2 06 04 b तत्र पूषाभुवत्सचा ॥ १४८
1 2 2 06 05 a गौर्धयति मरुताꣳ श्रवस्युर्माता मघोनाम्
1 2 2 06 05 b युक्ता वह्नी रथानाम् ॥ १४९
1 2 2 06 06 a उप नो हरिभिः सुतं याहि मदानां पते ।
1 2 2 06 06 b उप नो हरिभिः सुतम् ॥ १५०
1 2 2 06 07 a इष्टा होत्रा असृक्षतेन्द्रं वृधन्तो अध्वरे ।
1 2 2 06 07 b अच्छावभृथमोजसा ॥ १५१
1 2 2 06 08 a अहमिद्धि पितुष्परि मेधामृतस्य जग्रह ।
1 2 2 06 08 b अहꣳ सूर्य इवाजनि ॥ १५२
1 2 2 06 09 a रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः ।
1 2 2 06 09 b क्षुमन्तो याभिर्मदेम ॥ १५३
1 2 2 06 10 a सोमः पूषा च चेततुर्विश्वासाꣳ सुक्षितीनाम् ।
1 2 2 06 10 b देवत्रा रथ्योर्हिता ॥ १५४

[स्व. ८ । उ. ५ । धा. ४४ । णी ॥]

सप्तमी दशतिः

1 2 2 07 01 a पान्तमा वो अन्धस इन्द्रमभि प्र गायत ।
1 2 2 07 01 b विश्वासाहꣳ शतक्रतुं मꣳहिष्ठं चर्षणीनाम् ॥ १५५
1 2 2 07 02 a प्र व इन्द्राय मादनꣳ हर्यश्वाय गायत ।
1 2 2 07 02 b सखायः सोमपाव्ने ॥ १५६
1 2 2 07 03 a वयमु त्वा तदिदर्था इन्द्र त्वायन्तः सखायः ।
1 2 2 07 03 b कण्वा उक्थेभिर्जरन्ते ॥ १५७
1 2 2 07 04 a इन्द्राय मद्वने सुतं परि ष्टोभन्तु नो गिरः ।
1 2 2 07 04 b अर्कमर्चन्तु कारवः ॥ १५८
1 2 2 07 05 a अयं त इन्द्र सोमो निपूतो अधि बर्हिषि ।
1 2 2 07 05 b एहीमस्य द्रवा पिब ॥ १५९
1 2 2 07 06 a सुरूपकृत्नुमूतये सुदुघामिव गोदुहे ।
1 2 2 07 06 b जुहूमसि द्यविद्यवि ॥ १६०
1 2 2 07 07 a अभि त्वा वृषभा सुते सुतꣳ सृजामि पीतये ।
1 2 2 07 07 b तृम्पा व्यश्नुही मदम् ॥ १६१

1 2 2 07 08 a य इन्द्र चमसेष्वा सोमश्चमूषु ते सुतः ।
1 2 2 07 08 b पिबेदस्य त्वमीशिषे ॥ १६२
1 2 2 07 09 a योगेयोगे तवस्तरं वाजेवाजे हवामहे ।
1 2 2 07 09 b सखाय इन्द्रमूतये ॥ १६३
1 2 2 07 10 a आ त्वेता नि षीदतेन्द्रमभि प्र गायत ।
1 2 2 07 10 b सखायः स्तोमवाहसः ॥ १६४

[स्व. ५ । उ. २ । धा. ३९ । फो ॥]

अष्टमी दशतिः

1 2 2 08 01 a इदꣳ ह्यन्वोजसा सुतꣳ राधानां पते ।
1 2 2 08 01 b पिबा त्वा३स्य गिर्वणः ॥ १६५
1 2 2 08 02 a महाꣳ इन्द्रः पुरश्च नो महित्वमस्तु वज्रिणे ।
1 2 2 08 02 b द्यौर्न प्रथिना शवः ॥ १६६
1 2 2 08 03 a आ तू न इन्द्र क्षुमन्तं चित्रं ग्राभꣳ सं गृभाय ।
1 2 2 08 03 b महाहस्ती दक्षिणेन ॥ १६७
1 2 2 08 04 a अभि प्र गोपतिं गिरेन्द्रमर्च यथा विदे ।
1 2 2 08 04 b सूनुꣳ सत्यस्य सत्पतिम् ॥ १६८
1 2 2 08 05 a कया नश्चित्र आ भुवदूती सदावृधः सखा ।
1 2 2 08 05 b कया शचिष्ठया वृता ॥ १६९
1 2 2 08 06 a त्यमु वः सत्रासाहं विश्वासु गीर्ष्वायतम् ।
1 2 2 08 06 b आ च्यावयस्यूतये ॥ १७०
1 2 2 08 07 a सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् ।
1 2 2 08 07 b सनिं मेधामयासिषम् ॥ १७१
1 2 2 08 08 a ये ते पन्था अधो दिवो येभिर्व्यश्वमैरयः ।
1 2 2 08 08 b उत श्रोषन्तु नो भुवः ॥ १७२
1 2 2 08 09 a भद्रंभद्रं न आ भरेषमूर्जꣳ शतक्रतो ।
1 2 2 08 09 b यदिन्द्र मृडयासि नः ॥ १७३
1 2 2 08 10 a अस्ति सोमो अयꣳ सुतः पिबन्त्यस्य मरुतः ।
1 2 2 08 10 b उत स्वराजो अश्विना ॥ १७४

[स्व. १२ । उ. १ । धा. ४० । छौ ॥]

नवमी दशतिः

1 2 2 09 01 a ईङ्खयन्तीरपस्युव इन्द्रं जातमुपासते ।
1 2 2 09 01 b वन्वानासः सुवीर्यम् ॥ १७५
1 2 2 09 02 a न कि देवा इनीमसि न क्या योपयामसि ।
1 2 2 09 02 b मन्त्रश्रुत्यं चरामसि ॥ १७६
1 2 2 09 03 a दोषो आगाद्बृहद्गाय द्युमद्गामन्नाथर्वण ।
1 2 2 09 03 b स्तुहि देवꣳ सवितारम् ॥ १७७

1 2 2 09 04 a एषो उषा अपूर्व्या व्युच्छति प्रिया दिवः ।
1 2 2 09 04 b स्तुषे वामश्विना बृहत् ॥ १७८
1 2 2 09 05 a इन्द्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः ।
1 2 2 09 05 b जघान नवतीर्नव ॥ १७९
1 2 2 09 06 a इन्द्रेहि मत्स्यन्धसो विश्वेभिः सोमपर्वभिः ।
1 2 2 09 06 b महाꣳ अभिष्टिरोजसा ॥ १८०
1 2 2 09 07 a आ तू न इन्द्र वृत्रहन्नस्माकमर्धमा गहि ।
1 2 2 09 07 b महान्महीभिरूतिभिः ॥ १८१
1 2 2 09 08 a ओजस्तदस्य तित्विष उभे यत्समवर्तयत् ।
1 2 2 09 08 b इन्द्रश्चर्मेव रोदसी ॥ १८२
1 2 2 09 09 a अयमु ते समतसि कपोत इव गर्भधिम् ।
1 2 2 09 09 b वचस्तच्चिन्न ओहसे ॥ १८३
1 2 2 09 10 a वात आ वातु बेषजꣳ शम्भु मयोभु नो हृदे ।
1 2 2 09 10 b प्र न अयूꣳषि तारिषत् ॥ १८४

[स्व. १० । उ. २ । धा. ४५ । फु ॥]

दशमी दशतिः

1 2 2 10 01 a यꣳ रक्षन्ति प्रचेतसो वरुणो मित्रो अर्यमा ।
1 2 2 10 01 b न किः स दभ्यते जनः ॥ १८५
1 2 2 10 02 a गव्यो षु णो यथा पुराश्वयोत रथया ।
1 2 2 10 02 b वरिवस्या महोनाम् ॥ १८६
1 2 2 10 03 a इमास्त इन्द्र पृश्नयो घृतं दुहत आशिरम् ।
1 2 2 10 03 b एनामृतस्य पिप्युषीः ॥ १८७
1 2 2 10 04 a अया धिया च गव्यया पुरुणामन्पुरुष्टुत ।
1 2 2 10 04 b यत्सोमेसोम आभुवः ॥ १८८
1 2 2 10 05 a पावका नः सरस्वती वाजेभिर्वाजिनीवती ।
1 2 2 10 05 b यज्ञं वष्टु धियावसुः ॥ १८९
1 2 2 10 06 a क इमं नाहुषीष्वा इन्द्रꣳ सोमस्य तर्पयात् ।
1 2 2 10 06 b स नो वसून्या भरात् ॥ १९०
1 2 2 10 07 a आ याहि सुषुमा हि त इन्द्र सोमं पिबा इमम् ।
1 2 2 10 07 b एदं बर्हिः सदो मम ॥ १९१
1 2 2 10 08 a महि त्रीणामवरस्तु द्युक्षं मित्रस्यार्यम्णः ।
1 2 2 10 08 b दुराधर्षं वरुणस्य ॥ १९२
1 2 2 10 09 a त्वावतः पुरूवसो वयमिन्द्र प्रणेतः ।
1 2 2 10 09 b स्मसि स्थातर्हरीणाम् ॥ १९३

[स्व. ६ । उ. ४ । धा. ३५ । धु ॥]

इति द्वितीयप्रपाठके द्वितीयोऽर्धः ॥

इति द्वितीयः प्रपाठकश्च समाप्तः ॥

तृतीय प्रपाठकः । प्रथमोऽर्धः

प्रथमा दशतिः

1 3 1 01 01 a उत्त्वा मन्दन्तु सोमाः कृणुष्व राधो अद्रिवः ।
1 3 1 01 01 b अव ब्रह्मद्विषो जहि ॥ १९४
1 3 1 01 02 a गिर्वणः पाहि नः सुतं मधोर्धाराभिरज्यसे ।
1 3 1 01 02 b इन्द्र त्वादातमिद्यशः ॥ १९५
1 3 1 01 03 a सदा व इन्द्रश्चर्कृषदा उपो नु स सपर्यन् ।
1 3 1 01 03 b न देवो वृतः शूर इन्द्रः ॥ १९६
1 3 1 01 04 a आ त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः ।
1 3 1 01 04 b न त्वामिन्द्राति रिच्यते ॥ १९७
1 3 1 01 05 a इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः ।
1 3 1 01 05 b इन्द्रं वाणीरनूषत ॥ १९८
1 3 1 01 06 a इन्द्र इषे ददातु न ऋभुक्षणमृभुँ रयिम् ।
1 3 1 01 06 b वाजी ददातु वाजिनम् ॥ १९९
1 3 1 01 07 a इन्द्रो अङ्ग महद्भयमभी षदप चुच्यवत् ।
1 3 1 01 07 b स हि स्थिरो विचर्षणिः ॥ २००
1 3 1 01 08 b इमा उ त्वा सुतेसुते नक्षन्ते गिर्वणो गिरः ।
1 3 1 01 08 a गावो वत्सं न धेनवः ॥ २०१
1 3 1 01 09 a इन्द्रा नु पूषणा वयँ सख्याय स्वस्तये ।
1 3 1 01 09 b हुवेम वाजसातये ॥ २०२
1 3 1 01 10 a न कि इन्द्र त्वदुत्तरं न ज्यायो अस्ति वृत्रहन् ।
1 3 1 01 10 b न क्येवं यथा त्वम् ॥ २०३

[स्व. ८ । उ. ५ । धा. ३५ । ठु ॥]

द्वितीया दशतिः

1 3 1 02 01 a तरणिं वो जनानां त्रदं वाजस्य गोमतः ।
1 3 1 02 01 b समानमु प्र शँसिषम् ॥ २०४
1 3 1 02 02 a असृग्रमिन्द्र ते गिरः प्रति त्वामुदहासत ।
1 3 1 02 02 b सजोषा वृषभं पतिम् ॥ २०५
1 3 1 02 03 a सुनीथो घा स मर्त्यो यं मरुतो यमर्यमा ।
1 3 1 02 03 b मित्रास्पान्त्यद्रुहः ॥ २०६
1 3 1 02 04 a यद्वीडाविन्द्र यत्स्थिरे यत्पर्शाने पराभृतम् ।
1 3 1 02 04 b वसु स्पार्हं तदा भर ॥ २०७
1 3 1 02 05 a श्रुतं वो वृत्रहन्तमं प्र शर्धं चर्षणीनाम् ।

1 3 1 02 05 b आशिषे राधसे महे ॥ २०८
1 3 1 02 06 a अरं त इन्द्र श्रवसे गमेम शूर त्वावतः ।
1 3 1 02 06 b अरꣳ शक्र परेमणि ॥ २०९
1 3 1 02 07 a धानावन्तं करम्भिणमपूपवन्तमुक्थिनम् ।
1 3 1 02 07 b इन्द्र प्रातर्जुषस्व नः ॥ २१०
1 3 1 02 08 a अपां फेनेन नमुचेः शिर इन्द्रोदवर्तयः ।
1 3 1 02 08 b विश्वा यदजय स्पृधः ॥ २११
1 3 1 02 09 a इमे त इन्द्र सोमाः सुतासो ये च सोत्वाः ।
1 3 1 02 09 b तेषां मत्स्व प्रभूवसो ॥ २१२
1 3 1 02 10 a तुभ्यꣳ सुतासः सोमाः स्तीर्णं बर्हिर्विभावसो ।
1 3 1 02 10 b स्तोतृभ्य इन्द्र मृडय ॥ २१३

[स्व. ८ । उ. २ । धा. ३३ । ठि ॥]

तृतीया दशतिः

1 3 1 03 01 a आ व इन्द्र कृविं यथा वाजयन्तः शतक्रतुम् ।
1 3 1 03 01 b मꣳहिष्ठꣳ सिञ्च इन्दुभिः ॥ २१४
1 3 1 03 02 a अतश्चिदिन्द्र न उपा याहि शतवाजया ।
1 3 1 03 02 b इषा सहस्रवाजया ॥ २१५
1 3 1 03 03 a आ बुन्दं वृत्रहा ददे जातः पृच्छद्वि मातरम् ।
1 3 1 03 03 b क उग्राः के ह शृण्विरे ॥ २१६
1 3 1 03 04 a बृबदुक्थꣳ हवामहे सृप्रकरस्नमूतये ।
1 3 1 03 04 b साधः कृण्वन्तमवसे ॥ २१७
1 3 1 03 05 a ऋजुनीती नो वरुणो मित्रो नयति विद्वान् ।
1 3 1 03 05 b अर्यमा देवैः सजोषाः ॥ २१८
1 3 1 03 06 a दूरादिहेव यत्सतोऽरुणप्सुरशिश्वितत् ।
1 3 1 03 06 b वि भानुं विश्वथातनत् ॥ २१९
1 3 1 03 07 a आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम् ।
1 3 1 03 07 b मध्वा रजाꣳसि सुक्रतू ॥ २२०
1 3 1 03 08 a उदु त्ये सूनवो गिरः काष्ठा यज्ञेष्वत्नत ।
1 3 1 03 08 b वाश्रा अभिज्ञु यातवे ॥ २२१
1 3 1 03 09 a इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम् ।
1 3 1 03 09 b समूढमस्य पाꣳसुले ॥ २२२

[स्व. ६ । उ. १ । धा. ३९ । को ॥]

चतुर्थी दशतिः

1 3 1 04 01 a अतीहि मन्युषाविणꣳ सुषुवाꣳसमुपेरय ।
1 3 1 04 01 b अस्य रातौ सुतं पिब ॥ २२३
1 3 1 04 02 a कदु प्रचेतसे महे वचो देवाय शस्यते ।

1 3 1 04 02 b तदिध्यस्य वर्धनम् ॥ २२४
1 3 1 04 03 a उक्थं च न शस्यमानं नागो रयिरा चिकेत ।
1 3 1 04 03 b न गायत्रं गीयमानम् ॥ २२५
1 3 1 04 04 a इन्द्र उक्थेभिर्मन्दिष्ठो वाजानां च वाजपतिः ।
1 3 1 04 04 b हरिवान्त्सुताना॑ँ सखा ॥ २२६
1 3 1 04 05 a आ याह्युप नः सुतं वाजेभिर्मा हृणीयथाः ।
1 3 1 04 05 b महा॑ँ इव युवजानिः ॥ २२७
1 3 1 04 06 a कदा वसो स्तोत्र॑ँ हर्यत आ अव श्मशा रुधद्वाः ।
1 3 1 04 06 b दीर्घ॑ँ सुतम वाताप्याय ॥ २२८
1 3 1 04 07 a ब्राह्मणादिन्द्र राधसः पिबा सोममृतू॑ँ रनु ।
1 3 1 04 07 b तवेद॑ँ सख्यमस्तृतम् ॥ २२९
1 3 1 04 08 a वयं घा ते अपि स्मसि स्तोतार इन्द्र गिर्वणः ।
1 3 1 04 08 b त्वं नो जिन्व सोमपाः ॥ २३०
1 3 1 04 09 a एन्द्र पृक्षु कासु चिन्नृम्णं तनूषु धेहि नः ।
1 3 1 04 09 b सत्राजिदुग्र पौ॑ँस्यम् ॥ २३१
1 3 1 04 10 a एवा ह्यसि वीरयुरेवा शूर उत स्थिरः ।
1 3 1 04 10 b एवा ते राध्यं मनः ॥ २३२

[स्व. १२। उ. ना। धा. ३०। यौ ॥]

पञ्चमी दशतिः

1 3 1 05 01 a अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः ।
1 3 1 05 01 b ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥ २३३
1 3 1 05 02 a त्वामिद्धि हवामहे सातौ वाजस्य कार्वः ।
1 3 1 05 02 b त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥ २३४
1 3 1 05 03 a अभि प्र वः सुराधसमिन्द्रमर्च यथा विदे ।
1 3 1 05 03 b यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति ॥ २३५
1 3 1 05 04 a तं वो दस्ममृतीषहं वसोर्मन्दानमन्धसः ।
1 3 1 05 04 b अभि वत्सं न स्वसरेषु धेनव इन्द्रं गीर्भिर्नवामहे ॥ २३६
1 3 1 05 05 a तरोभिर्वो विदद्वसुमिन्द्र॑ँ सबाध ऊतये ।
1 3 1 05 05 b बृहद्गायन्तः सुतसोमे अध्वरे हुवे भरं न कारिणम् ॥ २३७
1 3 1 05 06 a तरणिरित्सिषासति वाजं पुरन्ध्या युजा ।
1 3 1 05 06 b आ व इन्द्रं पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्रुवम् ॥ २३८
1 3 1 05 07 a पिबा सुतस्य रसिनो मत्स्वा न इन्द्र गोमतः ।
1 3 1 05 07 b आपिर्नो बोधि सधमाद्ये वृधे३ऽस्मा॑ँ अवन्तु ते धियः ॥ २३९
1 3 1 05 08 a त्व॑ँ ह्येहि चेरवे विदा भगं वसुत्तये ।
1 3 1 05 08 b उद्वावृषस्व मघवन्गविष्टय उदिन्द्राश्वमिष्टये ॥ २४०
1 3 1 05 09 a न हि वश्चरमं च न वसिष्ठः परिम॑ँस्ते ।
1 3 1 05 09 b अस्माकमद्य मरुतः सुते सचा विश्वे पिबन्तु कामिनः ॥ २४१
1 3 1 05 10 a मा चिदन्यद्वि श॑ँसत सखायो मा रिषण्यत ।

1 3 1 05 10 b इन्द्रमित्स्तोता वृषण꣡ꣳ सचा सुते मुहुरुक्था च श꣡ꣳसत ॥ २४२

[स्व. १२ । उ. ५ । धा. ७३ । ञि ॥]

इति तृतीयप्रपाठके प्रथमोऽर्धः ॥

तृतीय प्रपाठकः । द्वितीयोऽर्धः

षष्ठी दशतिः

1 3 1 06 01 a न किष्टं कर्मणा नशद्यश्चकार सदावृधम् ।
1 3 1 06 01 b इन्द्रं न यज्ञैर्विश्वगूर्तमृभ्वसमधृष्टं धृष्णुमोजसा ॥ २४३
1 3 2 06 02 a य ऋते चिदभिश्रिषः पुरा जत्रुभ्य आतृदः ।
1 3 2 06 02 b सन्धाता सन्धिं मघवा पुरूवसुर्निष्कर्ता विह्रुतं पुनः ॥ २४४
1 3 2 06 03 a आ त्वा सहस्रमा शतं युक्ता रथे हिरण्यये ।
1 3 2 06 03 b ब्रह्मयुजो हरय इन्द्र केशिनो वहन्तु सोमपीतये ॥ २४५
1 3 2 06 04 a आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः ।
1 3 2 06 04 b मा त्वा के चिन्नि येमुरिन्न पाशिनोऽति धन्वेव ता꣡ꣳ इहि ॥ २४६
1 3 2 06 05 a त्वमङ्ग प्र श꣡ꣳसिषो देवः शविष्ठ मर्त्यम् ।
1 3 2 06 05 b न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः ॥ २४७
1 3 2 06 06 a त्वमिन्द्र यशा अस्यृजीषी शवसस्पतिः ।
1 3 2 06 06 b त्वं वृत्राणि ह꣡ꣳस्यप्रतीन्येक इत्पुर्वनुत्तश्चर्षणीधृतिः ॥ २४८
1 3 2 06 07 a इन्द्रमिद्देवतातय इन्द्रं प्रयत्यध्वरे ।
1 3 2 06 07 b इन्द्र꣡ꣳ समीके वनिनो हवामह इन्द्रं धनस्य सातये ॥ २४९
1 3 2 06 08 a इमा उ त्वा पुरूवसो गिरो वर्धन्तु या मम ।
1 3 2 06 08 b पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषत ॥ २५०
1 3 2 06 09 a उदु त्ये मधुमत्तमा गिर स्तोमास ईरते ।
1 3 2 06 09 b सत्राजितो धनसा अक्षितोतयो वाजयन्तो रथा इव ॥ २५१
1 3 2 06 10 a यथा गौरो अपा कृतं तृष्यन्नेत्यवेरिणम् ।
1 3 2 06 10 b आपित्वे नः प्रपित्वे तूयमा गहि कण्वेषु सु सचा पिब ॥ २५२

[स्व. ११ । उ. ७ । धा. ७२ । खा ॥]

सप्तमी दशतिः

1 3 2 07 01 a शग्ध्यू३षु शचीपत इन्द्र विश्वाभिरूतिभिः ।
1 3 2 07 01 b भगं न हि त्वा यशसं वसुविदमनु शूर चरामसि ॥ २५३
1 3 2 07 02 a या इन्द्र भुज आभरः स्वर्वा꣡ꣳ असुरेभ्यः ।
1 3 2 07 02 b स्तोतारमिन्मघवन्नस्य वर्धय ये च त्वे वृक्तबर्हिषः ॥ २५४
1 3 2 07 03 a प्र मित्राय प्रार्यम्णे सचथ्यमृतावसो ।
1 3 2 07 03 b वरूथ्ये३ वरुणे छन्द्यं वचः स्तोत्र꣡ꣳ राजसु गायत ॥ २५५

1 3 2 07 04 a अभि त्वा पूर्वपीतय इन्द्र स्तोमेभिरायवः ।
1 3 2 07 04 b समीचीनास ऋभवः समस्वरन्रुद्रा गृणन्त पूर्व्यम् ॥ २५६
1 3 2 07 05 a प्र व इन्द्राय बृहते मरुतो ब्रह्मार्चत ।
1 3 2 07 05 b वृत्रꣳ हनति वृत्रहा शतक्रतुर्वज्रेण शतपर्वणा ॥ २५७
1 3 2 07 06 a बृहदिन्द्राय गायत मरुतो वृत्रहन्तमम् ।
1 3 2 07 06 b येन ज्योतिरजनयन्नृतावृधो देवं देवाय जागृवि ॥ २५८
1 3 2 07 07 a इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।
1 3 2 07 07 b शिक्षा णो अस्मिन्पुरुहूत यामनि जीवा ज्योतिरशीमहि ॥ २५९
1 3 2 07 08 a मा न इन्द्र परा वृणग्भवा नः सधमाद्ये ।
1 3 2 07 08 b त्वं न ऊती त्वमिन्न आप्यम मा न इन्द्र परा वृणक् ॥ २६०
1 3 2 07 09 a वयं घ त्वा सुतावन्त आपो न वृक्तबर्हिषः ।
1 3 2 07 09 b पवित्रस्य प्रस्रवणेषु वृत्रहन्परि स्तोतार आसते ॥ २६१
1 3 2 07 10 a यदिन्द्र नाहुषीष्वा ओजो नृम्णं च कृष्टिषु ।
1 3 2 07 10 b यद्वा पञ्च क्षितीनां द्युम्नमा भर सत्रा विश्वानि पौꣳस्या ॥ २६२

[स्व. १० । उ. १ । धा. ६२ । पा ॥]

अष्टमी दशतिः

1 3 2 08 01 a सत्यमित्था वृषेदसि वृषजूतिर्नोऽविता ।
1 3 2 08 01 b वृषा ह्युग्र शृण्विषे परावति वृषो अर्वावति श्रुतः ॥ २६३
1 3 2 08 02 a यच्छक्रासि परावति यदर्वावति वृत्रहन् ।
1 3 2 08 02 b अतस्त्वा गीर्भिर्द्युगदिन्द्र केशिभिः सुतावाꣳ आ विवासति ॥ २६४
1 3 2 08 03 a अभि वो वीरमन्धसो मदेषु गाय गिरा महा विचेतसम् ।
1 3 2 08 03 b इन्द्रं नाम श्रुत्यꣳ शाकिनं वचो यथा ॥ २६५
1 3 2 08 04 a इन्द्र त्रिधातु शरणं त्रिवरूथꣳ स्वस्तये ।
1 3 2 08 04 b छर्दिर्यच्छ मघवद्भ्यश्च मह्यं च यावया दिद्युमेभ्यः ॥ २६६
1 3 2 08 05 a श्रायन्त इव सूर्यं विश्वेदिन्द्रस्य भक्षत ।
1 3 2 08 05 b वसूनि जातो जनिमान्योजसा प्रति भागं न दीधिमः ॥ २६७
1 3 2 08 06 a न सीमदेव आप तदिषं दीर्घायो मर्त्यः ।
1 3 2 08 06 b एतग्वा चिद्य एतशो युयोजत इन्द्रो हरी युयोजते ॥ २६८
1 3 2 08 07 a आ नो विश्वासु हव्यमिन्द्रꣳ समत्सु भूषत ।
1 3 2 08 07 b उप ब्रह्माणि सवनानि वृत्रहन्परमज्या ऋचीषम ॥ २६९
1 3 2 08 08 a तवेदिन्द्रावमं वसु त्वं पुष्यसि मध्यमम् ।
1 3 2 08 08 b सत्रा विश्वस्य परमस्य राजसि न किष्ट्वा गोषु वृण्वते ॥ २७०
1 3 2 08 09 a क्वेयथ क्वेदसि पुरुत्रा चिद्धि ते मनः ।
1 3 2 08 09 b अलर्षि युध्म खजकृत्पुरन्दर प्र गायत्रा अगासिषुः ॥ २७१
1 3 2 08 10 a वयमेनमिदा ह्योपीपेमेह वज्रिणम् ।
1 3 2 08 10 b तस्मा उ अद्य सवने सुतं भरा नूनं भूषत श्रुते ॥ २७२

[स्व. १४ । उ. १ । धा. ७४ । ती ॥]

नवमी दशतिः

1 3 2 09 01 a यो राजा चर्षणीनां याता रथेभिरध्रिगुः ।
1 3 2 09 01 b विश्वासां तरुता पृतनानां ज्येष्ठं यो वृत्रहा गृणे ॥ २७३
1 3 2 09 02 a यत इन्द्र भयामहे ततो नो अभयं कृधि ।
1 3 2 09 02 b मघवञ्छग्धि तव तन्न ऊतये वि द्विषो वि मृधो जहि ॥ २७४
1 3 2 09 03 a वास्तोष्पते ध्रुवा स्थूणाꣳ सत्रꣳ सोम्यानाम् ।
1 3 2 09 03 b द्रप्सः पुरां भेत्ता शश्वतीनामिन्द्रो मुनीनाꣳ सखा ॥ २७५
1 3 2 09 04 a बण्महाꣳ असि सूर्य बडादित्य महाꣳ असि ।
1 3 2 09 04 b महस्ते सतो महिमा पनिष्टम मह्ना देव महाꣳ असि ॥ २७६
1 3 2 09 05 a अश्वी रथी सुरूप इद्गोमाꣳ यदिन्द्र ते सखा ।
1 3 2 09 05 b श्वात्रभाजा वयसा सचते सदा चन्द्रैर्याति सभामुप ॥ २७७
1 3 2 09 06 a यद्द्याव इन्द्र ते शतꣳ शतं भूमीरुत स्युः ।
1 3 2 09 06 b न त्वा वज्रिन्त्सहस्रꣳ सूर्या अनु न जातमष्ट रोदसी ॥ २७८
1 3 2 09 07 a यदिन्द्र प्रागपागुदग्न्यग्वा हूयसे नृभिः ।
1 3 2 09 07 b सिमा पुरू नृषूतो अस्यानवेऽसि प्रशर्ध तुर्वशे ॥ २७९
1 3 2 09 08 a कस्तमिन्द्र त्वा वसवा मर्त्यो दधर्षति ।
1 3 2 09 08 b श्रद्धा हि ते मघवन्पार्ये दिवि वाजी वाजꣳ सिषासति ॥ २८०
1 3 2 09 09 a इन्द्राग्नी अपादियं पूर्वागात्पद्वतीभ्यः ।
1 3 2 09 09 b हित्वा शिरो जिह्वया रारपच्चरत्त्रिꣳशत्पदा न्यक्रमीत् ॥ २८१
1 3 2 09 10 a इन्द्र नेदीय एदिहि मितमेधाभिरूतिभिः ।
1 3 2 09 10 b आ शं तम शं तमाभिरभिष्टिभिरा स्वापे स्वापिभिः ॥ २८२

[स्व. १६ । उ. ५ । धा. ७२ । ङा ॥]

दशमी दशतिः

1 3 2 10 01 a इत ऊती वो अजरं प्रहेतारमप्रहितम् ।
1 3 2 10 01 b आशुं जेतारꣳ हेतारꣳ रथीतममतूर्तं तुग्रियावृधम् ॥ २८३
1 3 2 10 02 a मो षु त्वा वाघतश्च नारे अस्मन्नि रीरमन् ।
1 3 2 10 02 b आरात्ताद्वा सधमादं न आ गहीह वा सन्नुप श्रुधि ॥ २८४
1 3 2 10 03 a सुनोत सोमपाव्ने सोममिन्द्राय वज्रिणे ।
1 3 2 10 03 b पचता पक्तीरवसे कृणुध्वमित्पृणन्नित्पृणते मयः ॥ २८५
1 3 2 10 04 a यः सत्राहा विचर्षणिरिन्द्रं तꣳ हूमहे वयम् ।
1 3 2 10 04 b सहस्रमन्यो तुविनृम्ण सत्पते भवा समत्सु नो वृधे ॥ २८६
1 3 2 10 05 a शचीभिर्नः शचीवसू दिवानक्तं दिशस्यतम् ।
1 3 2 10 05 b मा वाꣳ रातिरुप दसत्कदा च नास्मद्रातिः कदा च न ॥ २८७
1 3 2 10 06 a यदा कदा च मीढुषे स्तोता जरेत मर्त्यः ।
1 3 2 10 06 b आदिद्वन्देत वरुणं विपा गिरा धर्त्तारं विव्रतानाम् ॥ २८८
1 3 2 10 07 a पाहि गा अन्धसो मद इन्द्राय मेध्यातिथे ।
1 3 2 10 07 b यः सम्मिश्लो हर्योर्यो हिरण्यय इन्द्रो वज्री हिरण्ययः ॥ २८९

1 3 2 10 08 a उभयꣳ शृणवच्च न इन्द्रो अर्वागिदं वचः ।
1 3 2 10 08 b सत्राच्या मघवान्त्सोमपीतये धिया शविष्ठ आ गमत् ॥ २९०
1 3 2 10 09 a महे च न त्वाद्रिवः परा शुल्काय दीयसे ।
1 3 2 10 09 b न सहस्राय नायुताये वज्रिवो न शताय शतामघ ॥ २९१
1 3 2 10 10 a वस्याꣳ इन्द्रासि मे पितुरुत भ्रातुरभुञ्जतः ।
1 3 2 10 10 b माता च मे छदयथः समा वसो वसुत्वनाय राधसे ॥ २९२

[स्व. १५ । उ. ४ । धा. ७६ । भू ॥]

इति तृतीयप्रपाठके द्वितीयोऽर्धः ॥

इति तृतीयः प्रपाठकश्च समाप्तः ॥

चतुर्थ प्रपाठकः । प्रथमोऽर्धः

प्रथमा दशतिः

1 4 1 01 01 a इम इन्द्राय सुन्विरे सोमासो दध्याशिरः ।
1 4 1 01 01 b ताꣳ आ मदाय वज्रहस्त पीतये हरिभ्यां याह्योक आ ॥ २९३
1 4 1 01 02 a इम इन्द्र मदाय ते सोमाश्चिकित्र उक्थिनः ।
1 4 1 01 02 b मधोः पपान उप नो गिरः शृणु रास्व स्तोत्राय गिर्वणः ॥ २९४
1 4 1 01 03 a आ त्वा३द्य सबर्दुघाꣳ हुवे गायत्रवेपसम् ।
1 4 1 01 03 b इन्द्रं धेनुꣳ सुदुघामन्यामिषमुरुधारामरङ्कृतम् ॥ २९५
1 4 1 01 04 a न त्वा बृहन्तो अद्रयो वरन्त इन्द्र वीडवः ।
1 4 1 01 04 b यच्छिक्षसि स्तुवते मावते वसु न किष्टदा मिनाति ते ॥ २९६
1 4 1 01 05 a क ईं वेद सुते सचा पिबन्तं कद्वयो दधे ।
1 4 1 01 05 b अयं यः पुरो विभिनत्योजसा मन्दानः शिप्र्यन्धसः ॥ २९७
1 4 1 01 06 a यदिन्द्र शासो अव्रतं च्यावया सदसस्परि ।
1 4 1 01 06 b अस्माकमꣳशुं मघवन्पुरुस्पृहं वसव्ये अधि बर्हय ॥ २९८
1 4 1 01 07 a त्वष्टा नो दैव्यं वचः पर्जन्यो ब्रह्मणस्पतिः ।
1 4 1 01 07 b पुत्रैर्भ्रातृभिरदितिर्नु पातु नो दुष्टरं त्रामणं वचः ॥ २९९
1 4 1 01 08 a कदा च न स्तरीरसि नेन्द्र सश्चसि दाशुषे ।
1 4 1 01 08 b उपोपेन्नु मघवन्भूय इन्नु ते दानं देवस्य पृच्यते ॥ ३००
1 4 1 01 09 a युङ्क्ष्वा हि वृत्रहन्तम हरी इन्द्र परावतः ।
1 4 1 01 09 b अर्वाचीनो मघवन्त्सोमपीतय उग्र ऋष्वेभिरा गहि ॥ ३०१
1 4 1 01 10 a त्वामिदा ह्यो नरोऽपीप्यन्वज्रिन्भूर्णयः ।
1 4 1 01 10 b स इन्द्र स्तोमवाहस इह श्रुध्युप स्वसरमा गहि ॥ ३०२

[स्व. १३ । उ. २ । धा. ८२ । ठि ॥]

द्वितीया दशतिः

1 4 1 02 01 a प्रत्यु अदर्श्यायत्यू३च्छन्ती दुहिता दिवः ।
1 4 1 02 01 b अपो मही वृणुते चक्षुषा तमो ज्योतिष्कृणोति सूनरि ॥ ३०३
1 4 1 02 02 a इमा उ वां दिविष्टय उस्रा हवन्ते अश्विना ।
1 4 1 02 02 b अयं वामह्वेऽवसे शचीवसू विशंविशꣳ हि गच्छथः ॥ ३०४
1 4 1 02 03 a कु ष्ठः को वामश्विना तपानो देवा मर्त्यः ।
1 4 1 02 03 b घ्नता वामश्मया क्षपमाणोꣳशुनेत्थमु आदुन्यथा ॥ ३०५
1 4 1 02 04 a अयं वां मधुमत्तमः सुतः सोमो दिविष्टिषु ।
1 4 1 02 04 b तमश्विना पिबतं तिरो अह्व्यं धत्तꣳ रत्नानि दाशुषे ॥ ३०६
1 4 1 02 05 a आ त्वा सोमस्य गल्दया सदा याचन्नहं ज्या ।
1 4 1 02 05 b भूर्णिं मृगं न सवनेषु चुक्रुधं क ईशानं न याचिषत् ॥ ३०७
1 4 1 02 06 a अध्वर्यो द्रावया त्वꣳ सोममिन्द्रः पिपासति ।
1 4 1 02 06 b उपो नूनं युयुजे वृष्णा हरी आ च जगाम वृत्रहा ॥ ३०८
1 4 1 02 07 a अभी षतस्तदा भरेन्द्र ज्यायः कनीयसः ।
1 4 1 02 07 b पुरूवसुर्हि मघवन्बभूविथ भरेभरे च हव्यः ॥ ३०९
1 4 1 02 08 a यदिन्द्र यावतस्त्वमेतावदहमीशीय ।
1 4 1 02 08 b स्तोतारमिद्दधिषे रदावसो न पापत्वाय रꣳसिषम् ॥ ३१०
1 4 1 02 09 a त्वमिन्द्र प्रतूर्तिष्वभि विश्वा असि स्पृधः ।
1 4 1 02 09 b अशस्तिहा जनिता वृत्रतूरसि त्वं तूर्य तरुष्यतः ॥ ३११
1 4 1 02 10 a प्र यो रिरिक्ष ओजसा दिवः सदोभ्यस्परि ।
1 4 1 02 10 b न त्वा विव्याच रज इन्द्र पार्थिवमति विश्वं ववक्षिथ ॥ ३१२

[स्व. १० । उ. ३ । धा. ७७ । वे ॥]

तृतीया दशतिः

1 4 1 03 01 a असावि देवं गोऋजीकमन्धो न्यस्मिन्निन्द्रो जनुषेमुवोच ।
1 4 1 03 01 b बोधामसि त्वा हर्यश्व यज्ञैर्बोधा न स्तोममन्धसो मदेषु ॥ ३१३
1 4 1 03 02 a योनिष्ट इन्द्र सदने अकारि तमा नृभिः पुरूहूत प्र याहि ।
1 4 1 03 02 b असो यथा नोऽविता वृधश्चिद्ददो वसूनि ममदश्च सोमैः ॥ ३१४
1 4 1 03 03 a अदर्दरुत्समसृजो वि खानि त्वमर्णवान्बद्बधानाꣳ अरम्णाः ।
1 4 1 03 03 b महान्तमिन्द्र पर्वतं वि यद्वः सृजद्धारा अव यद्दानवान्हन् ॥ ३१५
1 4 1 03 04 a सुष्वाणास इन्द्र स्तुमसि त्वा सनिष्यन्तश्चित्तुविनृम्ण वाजम् ।
1 4 1 03 04 b आ नो भर सुवितं यस्य कोना तना त्मना सह्यामा त्वोताः ॥ ३१६
1 4 1 03 05 a जगृह्मा ते दक्षिणमिन्द्र हस्तं वसूयवो वसुपते वसूनाम् ।
1 4 1 03 05 b विद्मा हि त्वा गोपतिꣳ शूर गोनामस्मभ्यं चित्रं वृषणꣳ रयिन्दाः ॥ ३१७
1 4 1 03 06 a इन्द्रं नरो नेमधिता हवन्ति यत्पार्या युनजते धियस्ताः ।
1 4 1 03 06 b शूरो नृषाता श्रवसश्च काम आ गोमति व्रजे भजा त्वं नः ॥ ३१८
1 4 1 03 07 a वयः सुपर्णा उप सेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः ।
1 4 1 03 07 b अप ध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्या३स्मान्निधयेव बद्धान् ॥ ३१९

1 4 1 03 08 a नाके सुपर्णमुप यत्पतन्तꣳ हृदा वेनन्तो अभ्यचक्षत त्वा ।
1 4 1 03 08 b हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम् ॥ ३२०
1 4 1 03 09 a ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः ।
1 4 1 03 09 b स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥ ३२१
1 4 1 03 10 a अपूर्व्या पुरुतमान्यस्मै महे वीराय तवसे तुराय ।
1 4 1 03 10 b विरप्शिने वज्रिणे शन्तमानि वचाꣳस्यास्मै स्थविराय तक्षुः ॥ ३२२

[स्व. १३ । उ. ६ । धा. ९१ । ट ॥]

चतुर्थी दशतिः

1 4 1 04 01 a अव द्रप्सो अꣳशुमतीमतिष्ठदीयानः कृष्णो दशभिः सहस्रैः ।
1 4 1 04 01 b आवत्तमिन्द्रः शच्या धमन्तमप स्नीहितिं नृमणा अधद्राः ॥ ३२३
1 4 1 04 02 a वृत्रस्य त्वा श्वसथादीषमाणा विश्वे देवा अजहुर्ये सखायः ।
1 4 1 04 02 b मरुद्भिरिन्द्र सख्यं ते अस्त्वथेमा विश्वाः पृतना जयासि ॥ ३२४
1 4 1 04 03 a विधुं दद्राणꣳ समने बहूनाꣳ युवानꣳ सन्तं पलितो जगार ।
1 4 1 04 03 b देवस्य पश्य काव्यं महित्वाद्या ममार स ह्यः समान ॥ ३२५
1 4 1 04 04 a त्वꣳ ह त्यत्सप्तभ्यो जायमानोऽशत्रुभ्यो अभवः शत्रुरिन्द्र ।
1 4 1 04 04 b गूढे द्यावापृथिवी अन्वविन्दो विभुमद्भयो भुवनेभ्यो रणं धाः ॥ ३२६
1 4 1 04 05 a मेडिं न त्वा वज्रिणं भृष्टिमन्तं पुरुधस्मानं वृषभꣳ स्थिरप्स्नुम् ।
1 4 1 04 05 b करोष्यर्यस्तरुषीर्दुवस्युरिन्द्र द्युक्षं वृत्रहणं गृणीषे ॥ ३२७
1 4 1 04 06 a प्र वो महे महेवृधे भरध्वं प्रचेतसे प्र सुमतिं कृणुध्वम् ।
1 4 1 04 06 a विशः पूर्वीः प्र चर चर्षणिप्राः ॥ ३२८
1 4 1 04 07 a शुनꣳ हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
1 4 1 04 07 b शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि सञ्जितं धनानि ॥ ३२९
1 4 1 04 08 a उदु ब्रह्माण्यैरत श्रवस्येन्द्रꣳ समर्ये महया वसिष्ठ ।
1 4 1 04 08 b आ यो विश्वानि श्रवसा ततानोपश्रोता म ईवतो वचाꣳसि ॥ ३३०
1 4 1 04 09 a चक्रं यदस्याप्स्वा निषत्तमुतो तदस्मै मध्विच्चच्छद्यात् ।
1 4 1 04 09 b पृथिव्यामतिषितं यदूधः पयो गोष्वदधा ओषधीषु ॥ ३३१

[स्व. १६ । उ. ३ । धा. ७३ । कि ॥]

पञ्चमी दशतिः

1 4 1 05 01 a त्यमू षु वाजिनं देवजूतꣳ सहोवानं तरुतारꣳ रथानाम् ।
1 4 1 05 01 b अरिष्टनेमिं पृतनाजमाशुꣳ स्वस्तये तार्क्ष्यमिहा हुवेम ॥ ३३२
1 4 1 05 02 a त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवे सुहवꣳ शूरमिन्द्रम् ।
1 4 1 05 02 b हुवे नु शक्रं पुरुहूतमिन्द्रमिदꣳ हविर्मघवा वेत्विन्द्रः ॥ ३३३
1 4 1 05 03 a यजामह इन्द्रं वज्रदक्षिणꣳ हरीणाꣳ रथ्य३ं विव्रतानाम् ।
1 4 1 05 03 b प्र श्मश्रुभिर्दोधुवदूर्ध्वधा भुवद्वि सेनाभिर्भयमानो वि राधसा ॥ ३३४
1 4 1 05 04 a सत्राहणं दाधृषिं तुम्रमिन्द्रं महामपारं वृशभꣳ सुवज्रम् ।
1 4 1 05 04 b हन्ता यो वृत्रꣳ सनितोत वाजं दाता मघानि मघवा सुराधाः ॥ ३३५

1 4 1 05 05 a यो नो वनुष्यन्नभिदाति मर्त उगणा वा मन्यमानस्तुरो वा ।
1 4 1 05 05 b क्षिधी युधा शवसा वा तमिन्द्राभी ष्याम वृषमणस्त्वोताः ॥ ३३६
1 4 1 05 06 a यं वृत्रेषु क्षितय स्पर्धमाना यं युक्तेषु तुरयन्तो हवन्ते ।
1 4 1 05 06 b यꣳ शूरसातौ यमपामुपज्मन्यं विप्रासो वाजयन्ते स इन्द्रः ॥ ३३७
1 4 1 05 07 a इन्द्रापर्वता बृहता रथेन वामीरिष आ वहतꣳ सुवीराः ।
1 4 1 05 07 b वीतꣳ हव्यान्यध्वरेषु देवा वर्धेथां गीर्भीरिडया मदन्ता ॥ ३३८
1 4 1 05 08 a इन्द्राय गिरो अनिशितसर्गा अपः प्रैरयत्सगरस्य बुध्नात् ।
1 4 1 05 08 b यो अक्षेणेव चक्रियौ शचीभिर्विष्वक्तस्तम्भ पृथिवीमुत द्याम् ॥ ३३९
1 4 1 05 09 a आ त्वा सखायः सख्या ववृत्युस्तिरः पुरू चिदर्णवां जगम्याः ।
1 4 1 05 09 b पितुर्नपातमा दधित वेधा अस्मिन्क्षये प्रतरां दीद्यानः ॥ ३४०
1 4 1 05 10 a को अद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हृणायून् ।
1 4 1 05 10 b आसन्नेषामप्सुवाहो मयोभून्य एषां भृत्यामृणधत्स जीवात् ॥ ३४१

[स्व. १८ । उ. ४ । धा. ७६ । ढू ॥]

इति चतुर्थप्रपाठके प्रथमोऽर्धः ॥

चतुर्थ प्रपाठकः । द्वितीयोऽर्धः

षष्ठी दशतिः

1 4 2 06 01 a गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः ।
1 4 2 06 01 b ब्रह्माणस्त्वा शतक्रत उद्वꣳशमिव येमिरे ॥ ३४२
1 4 2 06 02 a इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः ।
1 4 2 06 02 b रथीतमꣳ रथीनां वाजानाꣳ सत्पतिं पतिम् ॥ ३४३
1 4 2 06 03 a इममिन्द्र सुतं पिब ज्येष्ठममर्त्यं मदम् ।
1 4 2 06 03 b शुक्रस्य त्वाभ्यक्षरन्धारा ऋतस्य सादने ॥ ३४४
1 4 2 06 04 a यदिन्द्र चित्र म इह नास्ति त्वादातमद्रिवः ।
1 4 2 06 04 b राधस्तन्नो विदद्वस उभयाहस्त्या भर ॥ ३४५
1 4 2 06 05 a श्रुदी हवं तिरश्च्या इन्द्र यस्त्वा सपर्यति ।
1 4 2 06 05 b सुवीर्यस्य गोमतो रायस्पूर्धि महाꣳ असि ॥ ३४६
1 4 2 06 06 a असावि सोम इन्द्र ते शविष्ठ धृष्णवा गहि ।
1 4 2 06 06 b आ त्वा पृणक्त्विन्द्रियꣳ रजः सूर्यो न रश्मिभिः ॥ ३४७
1 4 2 06 07 a एन्द्र याहि हरिभिरुप कण्वस्य सुष्टुतिम् ।
1 4 2 06 07 b दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ३४८
1 4 2 06 08 a आ त्वा गिरो रथीरिवास्थुः सुतेषु गिर्वणः ।
1 4 2 06 08 b अभि त्वा समनूषत गावो वत्सं न धेनवः ॥ ३४९
1 4 2 06 09 a एतो न्विन्द्रꣳ स्तवाम शुद्धꣳ शुद्धेन साम्ना ।
1 4 2 06 09 b शुद्धैरुक्थैर्वावृध्वाꣳसꣳ शुद्धैराशीर्वान्ममत्तु ॥ ३५०
1 4 2 06 10 a यो रयिं वो रयिन्तमो यो द्युम्नैर्द्युम्नवत्तमः ।

1 4 2 06 10 b सोमः सुतः स इन्द्र तेऽस्ति स्वधापते मदः ॥ ३५१

[स्व. ४ । उ. ४ । धा. ५४ । धी ॥]

सप्तमी दशतिः

1 4 2 07 01 a प्रत्यस्मै पिपीषते विश्वानि विदुषे भर ।
1 4 2 07 01 b अरङ्गमाय जग्मयेऽपश्चादध्वने नरः ॥ ३५२
1 4 2 07 02 a आ नो वयोवयःशयं महान्तं गह्वरेष्ठां महान्तं पूर्विनेष्ठाम् ।
1 4 2 07 02 b उग्रं वचो अपावधीः ॥ ३५३
1 4 2 07 03 a आ त्वा रथं यथोतये सुम्नाय वर्तयामसि ।
1 4 2 07 03 b तुविकूर्मिमृतीषहमिन्द्रꣳ शविष्ठ सत्पतिम् ॥ ३५४
1 4 2 07 04 a स पूर्व्यो महोनां वेनः क्रतुभिरानजे ।
1 4 2 07 04 b यस्य द्वारा मनुः पिता देवेषु धिय आनजे ॥ ३५५
1 4 2 07 05 a यदी वहन्त्याशवो भ्राजमाना रथेष्वा ।
1 4 2 07 05 b पिबन्तो मदिरं मधु तत्र श्रवाꣳसि कृण्वते ॥ ३५६
1 4 2 07 06 a त्यमु वो अप्रहणं गृणीषे शवसस्पतिम् ।
1 4 2 07 06 b इन्द्रं विश्वासाहं नरꣳ शचिष्ठं विश्ववेदसम् ॥ ३५७
1 4 2 07 07 a दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ।
1 4 2 07 07 b सुरभि नो मुखा करत्प्र न आयूꣳषि तारिषत् ॥ ३५८
1 4 2 07 08 a पुरां भिन्दुर्युवा कविरमितौजा अजायत ।
1 4 2 07 08 b इन्द्रो विश्वस्य कर्मणो धर्त्ता वज्री पुरुष्टुतः ॥ ३५९

[स्व. ५ । उ. २ । धा. ४५ । पु ॥]

अष्टमी दशतिः

1 4 2 08 01 a प्रप्र वस्त्रिष्टुभमिषं वन्दद्वीरायेन्दवे ।
1 4 2 08 01 b धिया वो मेधसातये पुरन्ध्या विवासति ॥ ३६०
1 4 2 08 02 a कश्यपस्य स्वर्विदो यावाहुः सयुजाविति ।
1 4 2 08 02 b ययोर्विश्वमपि व्रतं यज्ञं धीरा निचाय्य ॥ ३६१
1 4 2 08 03 a अर्चत प्रार्चता नरः प्रियमेधासो अर्चत ।
1 4 2 08 03 b अर्चन्तु पुत्रका उत पुरमिद्धृष्ण्वर्चत ॥ ३६२
1 4 2 08 04 a उक्थमिन्द्राय शꣳस्यं वर्धनं पुरुनिःषिधे ।
1 4 2 08 04 b शक्रो यथा सुतेषु नो रारणत्सख्येषु च ॥ ३६३
1 4 2 08 05 a विश्वानरस्य वस्पतिमनानतस्य शवसः ।
1 4 2 08 05 b एवैश्च चर्षणीनामूती हुवे रथानाम् ॥ ३६४
1 4 2 08 06 a स घा यस्ते दिवो नरो धिया मर्तस्य शमतः ।
1 4 2 08 06 b ऊती स बृहतो दिवो द्विषो अꣳहो न तरति ॥ ३६५
1 4 2 08 07 a विभोष्ट इन्द्र राधसो विभ्वी रातिः शतक्रतो ।
1 4 2 08 07 b अथा नो विश्वचर्षणे द्युम्नꣳ सुदत्र मꣳहय ॥ ३६६
1 4 2 08 08 a वयश्चित्ते पतत्रिणो द्विपाच्चतुष्पादर्जुनि ।

1 4 2 08 08 b उषः प्रारन्नृतूꣳरनु दिवो अन्तेभ्यस्परि ॥ ३६७
1 4 2 08 09 a अमी ये देवा स्थन मध्य आ रोचने दिवः ।
1 4 2 08 09 b कद्व ऋतं कदमृतं का प्रत्ना व आहुतिः ॥ ३६८
1 4 2 08 10 a ऋचꣳ साम यजामहे याभ्यां कर्माणि कृण्वते ।
1 4 2 08 10 b वि ते सदसि राजतो यज्ञं देवेषु वक्षतः ॥ ३६९

[स्व. ७ । उ. ३ । धा. ५४ । जी ॥]

नवमी दशतिः

1 4 2 09 01 a विश्वाः पृतना अभिभूतरं नरः सजूस्ततक्षुरिन्द्रं जजनुश्च राजसे ।
1 4 2 09 01 b क्रत्वे वरे स्थेमन्यामुरीमुतोग्रमोजिष्ठं तरसं तरस्विनम् ॥ ३७०
1 4 2 09 02 a श्रत्ते दधामि प्रथमाय मन्यवेऽहन्यद्दस्युं नर्यं विवेरपः ।
1 4 2 09 02 b उभे यत्वा रोदसी धावतामनु भ्यसात्ते शुष्मात्पृथिवी चिदद्रिवः ॥ ३७१
1 4 2 09 03 a समेत विश्वा ओजसा पतिं दिवो य एक इद्भूरतिथिर्जनानाम्
1 4 2 09 03 b स पूर्व्यो नूतनमाजिगीषं तं वर्त्तनीरनु वावृत एक इत् ॥ ३७२
1 4 2 09 04 a इमे त इन्द्र ते वयं पुरुष्टुत ये त्वारभ्य चरामसि प्रभूवसो ।
1 4 2 09 04 b न हि त्वदन्यो गिर्वणो गिरः सघत्क्षोणीरिव प्रति तद्धर्य नो वचः ॥ ३७३
1 4 2 09 05 a चर्षणीधृतं मघवानमुक्थ्या३मिन्द्रं गिरो बृहतीरभ्यनूषत ।
1 4 2 09 05 b वावृधानं पुरुहूतꣳ सुवृक्तिभिरमर्त्यं जरमाणं दिवेदिवे ॥ ३७४
1 4 2 09 06 a अच्छा व इन्द्रं मतयः स्वर्युवः सध्रीचीर्विश्वा उशतीरनूषत ।
1 4 2 09 06 b परि ष्वजन्त जनयो यथा पतिं मर्यं न शुन्ध्युं मघवानमूतये ॥ ३७५
1 4 2 09 07 a अभि त्यं मेषं पुरुहूतमृग्मियमिन्द्रं गीर्भिर्मदता वस्वो अर्णवम् ।
1 4 2 09 07 b यस्य द्यावो न विचरन्ति मानुषं भुजे मꣳहिष्ठमभि विप्रमर्चत ॥ ३७६
1 4 2 09 08 a त्यꣳ सु मेषं महया स्वर्विदꣳ शतं यस्य सुभुवः साकमीरते ।
1 4 2 09 08 b अत्यं न वाजꣳ हवनस्यदꣳ रथमेन्द्रं ववृत्यामवसे सुवृक्तिभिः ॥ ३७७
1 4 2 09 09 a घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा ।
1 4 2 09 09 b द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा ॥ ३७८
1 4 2 09 10 a उभे यदिन्द्र रोदसी आपप्राथोषा इव ।
1 4 2 09 10 b महान्तं त्वा महीनाꣳ सम्राजं चर्षणीनाम् ।
1 4 2 09 10 c देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥ ३७९
1 4 2 09 11 a प्र मन्दिने पितुमदर्चता वचो यः कृष्णगर्भा निरहन्नृजिश्वना ।
1 4 2 09 11 b अवस्यवो वृषणं वज्रदक्षिणं मरुत्वन्तꣳ सख्याय हुवेमहि ॥ ३८०

[स्व. १४ । उ. ७ । धा. ९३ । यी ॥]

दशमी दशतिः

1 4 2 10 01 a इन्द्र सुतेषु सोमेषु क्रतुं पुनीष उक्थ्यम् ।
1 4 2 10 01 b विदे वृधस्य दक्षस्य महाꣳ हि षः ॥ ३८१
1 4 2 10 02 a तमु अभि प्र गायत पुरुहूतं पुरुष्टुतम् ।
1 4 2 10 02 b इन्द्रं गीर्भिस्तविषमा विवासत ॥ ३८२

1 4 2 10 03 a तं ते मदं गृणीमसि वृषणं पृक्षु सासहिम् ।
1 4 2 10 03 b उ लोककृत्नुमद्रिवो हरिश्रियम् ॥ ३८३
1 4 2 10 04 a यत्सोममिन्द्र विष्णवि यद्वा घ त्रित आप्त्ये ।
1 4 2 10 04 b यद्वा मरुत्सु मन्दसे समिन्दुभिः ॥ ३८४
1 4 2 10 05 a एदु मधोर्मदिन्तरꣳ सिञ्चाध्वर्यो अन्धसः ।
1 4 2 10 05 b एवा हि वीर स्तवते सदावृधः ॥ ३८५
1 4 2 10 06 a एन्दुमिन्द्राय सिञ्चत पिबाति सोम्यं मधु ।
1 4 2 10 06 b प्र राधाꣳसि चोदयते महित्वना ॥ ३८६
1 4 2 10 07 a एतो न्विन्द्रꣳ स्तवाम सखायः स्तोम्यं नरम् ।
1 4 2 10 07 b कृष्टीर्यो विश्वा अभ्यस्त्येक इत् ॥ ३८७
1 4 2 10 08 a इन्द्राय साम गायत विप्राय बृहते बृहत् ।
1 4 2 10 08 b ब्रह्मकृते विपश्चिते पनस्यवे ॥ ३८८
1 4 2 10 09 a य एक इद्विदयते वसु मर्ताय दाशुषे ।
1 4 2 10 09 b ईशानो अप्रतिष्कुत इन्द्रो अङ्ग ॥ ३८९
1 4 2 10 10 a सखाय आ शिषामहे ब्रह्मेन्द्राय वज्रिणे ।
1 4 2 10 10 b स्तुष ऊ षु वो नृतमाय धृष्णवे ॥ ३९०

[स्व. १० । उ. ४ । धा. ६२ । खा ॥]

इति चतुर्थप्रपाठके द्वितीयोऽर्धः ॥

इति चथुर्थः प्रपाठकश्च समाप्तः ॥

पञ्चम प्रपाठकः । प्रथमोऽर्धः

प्रथमा दशतिः

1 5 1 01 01 a गृणे तदिन्द्र ते शव उपमां देवतातये ।
1 5 1 01 01 b यद्धꣳसि वृत्रमोजसा शचीपते ॥ ३९१
1 5 1 01 02 a यस्य त्यच्छम्बरं मदे दिवोदासाय रन्धयन् ।
1 5 1 01 02 b अयꣳ स सोम इन्द्र ते सुतः पिब ॥ ३९२
1 5 1 01 03 a एन्द्र नो गधि प्रिय सत्राजिदगोह्य ।
1 5 1 01 03 b गिरिर्न विश्वतः पृथुः पतिर्दिवः ॥ ३९३
1 5 1 01 04 a य इन्द्र सोमपातमो मदः शविष्ठ चेतति ।
1 5 1 01 04 b येना हꣳसि न्या३त्रिणं तमीमहे ॥ ३९४
1 5 1 01 05 a तुचे तुनाय तत्सु नो द्राघीय आयुर्जीवसे ।
1 5 1 01 05 b आदित्यासः समहसः कृणोतन ॥ ३९५
1 5 1 01 06 a वेत्था हि निर्ऋतीनां वज्रहस्त परिवृजम् ।
1 5 1 01 06 b अहरहः शुन्ध्युः परिपदामिव ॥ ३९६
1 5 1 01 07 a अपामीवामप स्त्रिधमप सेधत दुर्मतिम् ।

1 5 1 01 07 b आदित्यासो युयोतना नो अꣳहसः ॥ ३९७
1 5 1 01 08 a पिबा सोममिन्द्र मन्दतु त्वा यं ते सुषाव हर्यश्वाद्रिः ।
1 5 1 01 08 b सोतुर्बाहुभ्याꣳ सुयतो नार्वा ॥ ३९८

[स्व. ५। उ. २। धा. ५१। फ ॥]

द्वितीया दशतिः

1 5 1 02 01 a अभ्रातृव्यो अना त्वमनापिरिन्द्र जनुषा सनादसि ।
1 5 1 02 01 b युधेदापित्वमिच्छसे ॥ ३९९
1 5 1 02 02 a यो न इदमिदं पुरा प्र वस्य आनिनाय तमु व स्तुषे ।
1 5 1 02 02 b सखाय इन्द्रमूतये ॥ ४००
1 5 1 02 03 a आ गन्ता मा रिषण्यत प्रस्थावानो माप स्थात समन्यवः ।
1 5 1 02 03 b दृढा चिद्यमयिष्णवः ॥ ४०१
1 5 1 02 04 a आ याह्ययमिन्दवेऽश्वपते गोपत उर्वरापते ।
1 5 1 02 04 b सोमꣳ सोमपते पिब ॥ ४०२
1 5 1 02 05 a त्वया ह स्विद्युजा वयं प्रति श्वसन्तं वृषभ ब्रुवीमहि ।
1 5 1 02 05 b सꣳस्थे जनस्य गोमतः ॥ ४०३
1 5 1 02 06 a गावश्चिद्धा समन्यवः सजात्येन मरुतः सबन्धवः ।
1 5 1 02 06 b रिहते ककुभो मिथः ॥ ४०४
1 5 1 02 07 a त्वं न इन्द्रा भर ओजो नृम्णꣳ शतक्रतो विचर्षणे ।
1 5 1 02 07 b आ वीरं पृतनासहम् ॥ ४०५
1 5 1 02 08 a अधा हीन्द्र गिर्वण उप त्वा काम ईमहे ससृग्महे ।
1 5 1 02 08 b उदेव ग्मन्त उदभिः ॥ ४०६
1 5 1 02 09 a सीदन्तस्ते वयो यथा गोश्रीते मधौ मदिरे विवक्षणे ।
1 5 1 02 09 b अभि त्वामिन्द्र नोनुमः ॥ ४०७
1 5 1 02 10 a वयमु त्वामपूर्व्य स्थूरं न कच्चिद्भरन्तोऽवस्यवः ।
1 5 1 02 10 b वज्रिञ्चित्रꣳ हवामहे ॥ ४०८

[स्व. २। उ. २। धा. ४१। छ ॥]

तृतीया दशतिः

1 5 1 03 01 a स्वादोरित्था विषूवतो मधोः पिबन्ति गौर्यः ।
1 5 1 03 01 b या इन्द्रेण सयावरीर्वृष्णा मदन्ति शोभथा वस्वीरनु स्वराज्यम् ॥ ४०९
1 5 1 03 02 a इत्था हि सोम इन्मदो ब्रह्म चकार वर्धनम् ।
1 5 1 03 02 b शविष्ठ वज्रिन्नोजसा पृथिव्या निः शशा अहिमर्चन्ननु स्वराज्यम् ॥ ४१०
1 5 1 03 03 a इन्द्रो मदाय वावृधे शवसे वृत्रहा नृभिः ।
1 5 1 03 03 b तमिन्महत्स्वाजिषूतिमर्भे हवामहे स वाजेषु प्र नोऽविषत् ॥ ४११
1 5 1 03 04 a इन्द्र तुभ्यमिदद्रिवोऽनुत्तं वज्रिन्वीर्यम् ।
1 5 1 03 04 b यद्ध त्यं मायिनं मृगं तव त्यन्माययावधीरर्चन्ननु स्वराज्यम् ॥ ४१२
1 5 1 03 05 a प्रेह्यभीहि धृष्णुहि न ते वज्रो नि यꣳसते ।

1 5 1 03 05 b इन्द्र नृम्णꣳ हि ते शवो हनो वृत्रं जया अपोऽर्चन्ननु स्वराज्यम् ॥ ४१३
1 5 1 03 06 a यदुदीरत आजयो धृष्णवे धीयते धनम् ।
1 5 1 03 06 b युङ्क्ष्वा मदच्युता हरी कꣳ हनः कं वसौ दधोऽस्माꣳ इन्द्र वसौ दधः ॥ ४१४
1 5 1 03 07 a अक्षन्नमीमदन्त ह्यव प्रिया अधूषत ।
1 5 1 03 07 b अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी ॥ ४१५
1 5 1 03 08 a उपो षु शृणुही गिरो मघवन्मातथा इव ।
1 5 1 03 08 b कदा नः सूनृतावतः कर इदर्थयास इद्योजा न्विन्द्र ते हरी ॥ ४१६
1 5 1 03 09 a चन्द्रमा अप्स्वा३न्तरा सुपर्णो धावते दिवि ।
1 5 1 03 09 b न वो हिरण्यनेमयः पदं विन्दन्ति विद्युतो वित्तं मे अस्य रोदसी ॥ ४१७
1 5 1 03 10 a प्रति प्रियतमꣳ रथं वृषणं वसुवाहनम् ।
1 5 1 03 10 b स्तोता वामश्विनावृशि स्तोमेभिर्भूषति प्रति माध्वी मम श्रुतꣳ हवम् ॥ ४१८

[स्व. १३। उ. ५। धा. ७५। णु ॥]

चतुर्थी दशतिः

1 5 1 04 01 a आ ते अग्न इधीमहि द्युमन्तं देवाजरम् ।
1 5 1 04 01 b युद्ध स्या ते पनीयसी समिद्दीदयति द्यवीषꣳ स्तोतृभ्य आ भर ॥ ४१९
1 5 1 04 02 a आग्निं न स्ववृक्तिभिर्होतारं त्वा वृणीमहे ।
1 5 1 04 02 b शीरं पावकशोचिषं वि वो मदे यज्ञेषु स्तीर्णबर्हिषं विवक्षसे ॥ ४२०
1 5 1 04 03 a महे नो अद्य बोधयोषो राये दिवित्मती ।
1 5 1 04 03 b यथा चिन्नो अबोधयः सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥ ४२१
1 5 1 04 04 a भद्रं नो अपि वातय मनो दक्षमुत क्रतुम् ।
1 5 1 04 04 b अथा ते सख्ये अन्धसो वि वो मदे रणा गावो न यवसे विवक्षसे ॥ ४२२
1 5 1 04 05 a क्रत्वा महाꣳ अनुष्वधं भीम आ वावृते शवः ।
1 5 1 04 05 b श्रिय ऋष्व उपाकयोर्नि शिप्री हरिवां दधे हस्तयोर्वज्रमायसम् ॥ ४२३
1 5 1 04 06 a स घा तं वृषणꣳ रथमधि तिष्ठाति गोविदम् ।
1 5 1 04 06 b यः पात्रꣳ हारियोजनं पूर्णमिन्द्रा चिकेतति योजा न्विन्द्र ते हरी ॥ ४२४
1 5 1 04 07 a अग्निं तं मन्ये यो वसुरस्तं यं यन्ति धेनवः ।
1 5 1 04 07 b अस्तमर्वन्त आशवोस्तं नित्यासो वाजिन इशꣳ स्तोतृभ्य आ भर ॥ ४२५
1 5 1 04 08 a न तमꣳहो न दुरितं देवासो अष्ट मर्त्यम् ।
1 5 1 04 08 b सजोषसो यमर्यमा मित्रो नयन्ति वरुणो अति द्विषः ॥ ४२६

[स्व. ७। उ. ३। धा. ५७। जे ॥]

पञ्चमी दशतिः

1 5 1 05 01 a परि प्र धन्वेन्द्राय सोम स्वादुर्मित्राय पूष्णे भगाय ॥ ४२७
1 5 1 05 02 a पर्यू षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः ।
1 5 1 05 02 b द्विषस्तरध्या ऋणया न ईरसे ॥ ४२८
1 5 1 05 03 a पवस्व सोम महान्त्समुद्रः पिता देवानां विश्वाभि धाम ॥ ४२९
1 5 1 05 04 a पवस्व सोम महे दक्षायाश्वो न निक्तो वाजी धनाय ॥ ४३०

1 5 1 05 05 a इन्दुः पविष्ट चारुर्मदायापामुपस्थे कविर्भगाय ॥ ४३१
1 5 1 05 06 a अनु हि त्वा सुतꣳ सोम मदामसि महे समर्यराज्ये ।
1 5 1 05 06 b वाजाꣳ अभि पवमान प्र गाहसे ॥ ४३२
1 5 1 05 07 a क ई व्यक्ता नरः सनीडा रुद्रस्य मर्या अथ स्वश्वाः ॥ ४३३
1 5 1 05 08 a अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रꣳ हृदिस्पृशम् ।
1 5 1 05 08 b ऋध्यामा त ओहैः ॥ ४३४
1 5 1 05 09 a आविमर्या आ वाजं वाजिनो अग्मं देवस्य सवितुः सवम् ।
1 5 1 05 09 b स्वर्गाꣳ अर्वन्तो जयत ॥ ४३५
1 5 1 05 10 a पवस्व सोम द्युम्नी सुधारो महाꣳ अवीनामनुपूर्व्यः ॥ ४३६

[स्व. ८। उ. २। धा. ३५। ठु ॥]

इति पञ्चमप्रपाठके प्रथमोऽर्धः ॥

पञ्चम प्रपाठकः । द्वितीयोऽर्धः

षष्ठी दशतिः

1 5 2 06 01 a विश्वतोदावन्विश्वतो न आ भर यं त्वा शविष्ठमीमहे ॥ ४३७
1 5 2 06 02 a एष ब्रह्मा य ऋत्विय इन्द्रो नाम श्रुतो गृणे ॥ ४३८
1 5 2 06 03 a ब्रह्माण इन्द्रं महयन्तो अर्कैरवर्धयन्नहये हन्तवा उ ॥ ४३९
1 5 2 06 04 a अनवस्ते रथमश्वाय तक्षुस्त्वष्टा वज्रं पुरुहूत द्युमन्तम् ॥ ४४०
1 5 2 06 05 a शं पदं मघꣳ रयीषिणो न काममव्रतो हिनोति न स्पृशद्रयिम् ॥ ४४१
1 5 2 06 06 a सदा गावः शुचयो विश्वधायसः सदा देवा अरेपसः ॥ ४४२
1 5 2 06 07 a आ याहि वनसा सह गावः सचन्त वर्त्तनिं यदूधभिः ॥ ४४३
1 5 2 06 08 a उप प्रक्षे मधुमति क्षियन्तः पुष्येम रयिं धीमहे त इन्द्र ॥ ४४४
1 5 2 06 09 a अर्चन्त्यर्कं मरुतः स्वर्क्का आ स्तोभति श्रुतो युवा स इन्द्रः ॥ ४४५
1 5 2 06 10 a प्र व इन्द्राय वृत्रहन्तमाय विप्राय गाथं गायत यं जुजोषते ॥ ४४६

[स्व. ७। उ. २। धा. ४२। ष्ठा ॥]

सप्तमी दशतिः

1 5 2 07 01 a अचेत्यग्निश्चिकितिर्हव्यवाड्न सुमद्रथः ॥ ४४७
1 5 2 07 02 a अग्ने त्वं नो अन्तम उत त्राता शिवो भुवो वरूथ्यः ॥ ४४८
1 5 2 07 03 a भगो न चित्रो अग्निर्महोनां दधाति रत्नम् ॥ ४४९
1 5 2 07 04 a विश्वस्य प्र स्तोभ पुरो वा सन्यदि वेह नूनम् ॥ ४५०
1 5 2 07 05 a उषा अप स्वसुष्टमः सं वर्त्तयति वर्त्तनिꣳ सुजातता ॥ ४५१

1 5 2 07 06 a इमा नु कं भुवना सीषधेमेन्द्रश्च विश्वे च देवाः ॥ ४५२
1 5 2 07 07 a वि स्रुतयो यथा पथ इन्द्र त्वद्यन्तु रातयः ॥ ४५३

1 5 2 07 08 a अया वाजं देवहितꣳ सनेम मदेम शतहिमाः सुवीराः ॥ ४५४
1 5 2 07 09 a ऊर्जा मित्रो वरुणः पिन्वतेडाः पीवरीमिषं कृणुही न इन्द्र ॥ ४५५
1 5 2 07 10 a इन्द्रो विश्वस्य राजति ॥ ४५६

[स्व. ५ । उ. ४ । धा. ४१ । भ ॥]

अष्टमी दशतिः

1 5 2 08 01 a त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृम्पत्सोममपिबद्विष्णुना सुतं यथावशम् ।
1 5 2 08 01 b स ई ममाद महि कर्म कर्त्तवे महामुरुꣳ सैनꣳ सश्चद्देवो देवꣳ सत्य इन्दुः सत्यमिन्द्रम् ॥ ४५७
1 5 2 08 02 a अयꣳ सहस्रमानवो दृशः कवीनां मतिर्ज्योतिर्विधर्म ।
1 5 2 08 02 b ब्रध्नः समीचीरुषसः समैरयदरेपसः सोचेतसः स्वसरे मन्युमन्तश्चिता गोः ॥ ४५८
1 5 2 08 03 a एन्द्र याह्युप नः परावतो नायमच्छा विदथानीव सत्पतिरस्ता राजेव सत्पतिः ।
1 5 2 08 03 b हवामहे त्वा प्रयस्वन्तः सुतेष्वा पुत्रासो न पितरं वाजसातये मꣳहिष्ठं वाजसातये ॥ ४५९
1 5 2 08 04 a तमिन्द्रं जोहवीमि मघवानमुग्रꣳ सत्रा दधानमप्रतिष्कुतꣳ श्रवाꣳसि भूरिः ।
1 5 2 08 04 b मꣳहिष्ठो गीर्भिरा च यज्ञियो ववर्त्त राये नो विश्वा सुपथा कृणोतु वज्री ॥ ४६०
1 5 2 08 05 a अस्तु श्रौष्टपुरो अग्निं धिया दध आ नु त्यच्छर्धो दिव्यं वृणीमह इन्द्रवायू वृणीमहे ।
1 5 2 08 05 b यद्ध क्राणा विवस्वते नाभा सन्दाय नव्यसे ।
1 5 2 08 05 c अध प्र नूनमुप यन्ति धीतयो देवाꣳअच्छा न धीतयः ॥ ४६१
1 5 2 08 06 a प्र वो महे मतयो यन्तु विष्णवे मरुत्वते गिरिजा एवयामरुत् ।
1 5 2 08 06 b प्र शर्धाय प्र यज्यवे सुखादये तवसे भन्ददिष्टये धुनिव्रताय शवसे ॥ ४६२
1 5 2 08 07 a अया रुचा हरिण्या पुनानो विश्वा द्वेषाꣳसि तरति सयुग्वभिः सूरो न सयुग्वभिः ।
1 5 2 08 07 b धारा पृष्ठस्य रोचते पुनानो अरुषो हरिः ।
1 5 2 08 07 c विश्वा यद्रूपा परियास्यृक्वभिः सप्तास्येभिर्ऋक्वभिः ॥ ४६३
1 5 2 08 08 a अभि त्यं देवꣳ सवितारमोण्योः कविक्रतुमर्चामि सत्यसवꣳ रत्नधामभि प्रियं मतिम्
1 5 2 08 08 b ऊर्ध्वा यस्यामतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः ॥ ४६४
1 5 2 08 09 a अग्निꣳ होतारं मन्ये दास्वन्तं वसोः सूनुꣳ सहसो जातवेदसं विप्रं न जातवेदसम् ।
1 5 2 08 09 b य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा ।
1 5 2 08 09 b घृतस्य विभ्राष्टिमनु शुक्रशोचिष आजुह्वानस्य सर्पिषः ॥ ४६५
1 5 2 08 10 a तव त्यन्नर्यं नृतोऽप इन्द्र प्रथमं पूर्व्यं दिवि प्रवाच्यं कृतम् ।
1 5 2 08 10 b यो देवस्य शवसा प्रारिणा असु रिणन्नपः ।
1 5 2 08 10 c भुवो विश्वमभ्यदेवमोजसा विदेदूर्जꣳ शतक्रतुर्विदेदिषम् ॥ ४६६

[स्व. ३ । उ. ६ । धा. १० । ट ॥]

॥ इत्यैन्द्रं पर्व काण्डम् ॥

पावमान काण्ड

नवमी दशतिः

1 5 2 09 01 a उच्चा ते जातमन्धसो दिवि सद्भूम्या ददे ।
1 5 2 09 01 b उग्रꣳ शर्म महि श्रवः ॥ ४६७
1 5 2 09 02 a स्वादिष्ठया मदिष्ठया पवस्व सोम धारया ।
1 5 2 09 02 b इन्द्राय पातवे सुतः ॥ ४६८
1 5 2 09 03 a वृषा पवस्व धारया मरुत्वते च मत्सरः ।
1 5 2 09 03 b विश्वा दधान ओजसा ॥ ४६९
1 5 2 09 04 a यस्ते मदो वरेण्यस्तेना पवस्वान्धसा ।
1 5 2 09 04 b देवावीरघशꣳसहा ॥ ४७०
1 5 2 09 05 a तिस्रो वाच उदीरते गावो मिमन्ति धेनवः ।
1 5 2 09 05 b हरिरेति कनिक्रदत् ॥ ४७१
1 5 2 09 06 a इन्द्रायेन्दो मरुत्वते पवस्व मधुमत्तमः ।
1 5 2 09 06 b अर्कस्य योनिमासदम् ॥ ४७२
1 5 2 09 07 a असाव्यꣳशुर्मदायाप्सु दक्षो गिरिष्ठाः ।
1 5 2 09 07 b श्येनो न योनिमासदत् ॥ ४७३
1 5 2 09 08 a पवस्व दक्षसाधनो देवेभ्यः पीतये हरे ।
1 5 2 09 08 b मरुद्भयो वायवे मदः ॥ ४७४
1 5 2 09 09 a परि स्वानो गिरिष्ठाः पवित्रे सोमो अक्षरत् ।
1 5 2 09 09 b मदेषु सर्वधा असि ॥ ४७५
1 5 2 09 10 a परि प्रिया दिवः कविर्वयाꣳसि नप्त्योर्हितः ।
1 5 2 09 10 b स्वानैर्याति कविक्रतुः ॥ ४७६

[स्व. ६ । उ. ३ । धा. ४२ । गा ॥]

दशमी दशतिः

1 5 2 10 01 a प्र सोमासो मदच्युतः श्रवसे नो मघोनः ।
1 5 2 10 01 b सुता विदथे अक्रमुः ॥ ४७७
1 5 2 10 02 a प्र सोमासो विपश्चितोऽपो नयन्त ऊर्मयः ।
1 5 2 10 02 b वनानि महिषा इव ॥ ४७८
1 5 2 10 03 a पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने ।
1 5 2 10 03 b विश्वा अप द्विषो जहि ॥ ४७९
1 5 2 10 04 a वृषा ह्यसि भानुना द्युमन्तं त्वा हवामहे ।
1 5 2 10 04 b पवमान स्वर्दृशम् ॥ ४८०
1 5 2 10 05 a इन्दुः पविष्ट चेतनः प्रियः कवीनां मतिः ।
1 5 2 10 05 b सृजदश्वꣳ रथीरिव ॥ ४८१
1 5 2 10 06 a असृक्षत प्र वाजिनो गव्या सोमासो अश्वया ।

1 5 2 10 06 b शुक्रासो वीरयाशवः ॥ ४८२
1 5 2 10 07 a पवस्व देव आयुषगिन्द्रं गच्छतु ते मदः ।
1 5 2 10 07 b वायुमा रोह धर्मणा ॥ ४८३
1 5 2 10 08 a पवमानो अजीजनद्दिवश्चित्रं न तन्यतुम् ।
1 5 2 10 08 b ज्योतिर्वैश्वानरं बृहत् ॥ ४८४
1 5 2 10 09 a परि स्वानास इन्दवो मदाय बर्हणा गिरा ।
1 5 2 10 09 b मधो अर्षन्ति धारया ॥ ४८५
1 5 2 10 10 a परि प्रासिष्यदत्कविः सिन्धोरूर्मावधि श्रितः ।
1 5 2 10 10 b कारुं बिभ्रत्पुरुस्पृहम् ॥ ४८६

[स्व. ११। उ. ना। धा. ४९। हो ॥]

इति पञ्चमप्रपाठके द्वितीयोऽर्धः ॥

इति पञ्चमः प्रपाठकश्च समाप्तः ॥

षष्ठ प्रपाठकः । प्रथमोऽर्धः

प्रथमा दशतिः

1 6 1 01 01 a उपो षु जातमप्तुरं गोभिर्भङ्गं परिष्कृतम् ।
1 6 1 01 01 b इन्दुं देवा अयासिषुः ॥ ४८७
1 6 1 01 02 a पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः ।
1 6 1 01 02 b शुम्भन्ति विप्रं धीतिभिः ॥ ४८८
1 6 1 01 03 a आविशन्कलशꣳ सुतो विश्वा अर्षन्नभि श्रियः ।
1 6 1 01 03 b इन्दुरिन्द्राय धीयते ॥ ४८९
1 6 1 01 04 a असर्जि रथ्यो यथा पवित्रे चम्वोः सुतः ।
1 6 1 01 04 b कार्ष्मन्वाजी न्यक्रमीत् ॥ ४९०
1 6 1 01 05 a प्र यद्गावो न भूर्णयस्त्वेषा अयासो अक्रमुः ।
1 6 1 01 05 b घ्नन्तः कृष्णामप त्वचम् ॥ ४९१
1 6 1 01 06 a अपघ्नन्पवसे मृधः क्रतुवित्सोम मत्सरः ।
1 6 1 01 06 b नुदस्वादेवयुं जनम् ॥ ४९२
1 6 1 01 07 a अया पवस्व धारया यया सूर्यमरोचयः ।
1 6 1 01 07 b हिन्वानो मानुषीरपः ॥ ४९३
1 6 1 01 08 a स पवस्व य आविथेन्द्रं वृत्राय हन्तवे ।
1 6 1 01 08 b वव्रिवाꣳसं महीरपः ॥ ४९४
1 6 1 01 09 a अया वीती परि स्रव यस्त इन्दो मदेष्वा ।
1 6 1 01 09 b अवाहन्नवतीर्नव ॥ ४९५
1 6 1 01 10 a परि द्युक्षꣳ सनद्रयिं भरद्वाजं नो अन्धसा ।
1 6 1 01 10 b स्वानो अर्ष पवित्र आ ॥ ४९६

[स्व. ९ । उ. ६ । धा. ३५ । तु ॥]

द्वितीया दशतिः

1 6 1 02 01 a अचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः ।
1 6 1 02 01 b सꣳ सूर्येण दिद्युते ॥ ४९७
1 6 1 02 02 a आ ते दक्षं मयोभुवं वह्निमद्या वृणीमहे ।
1 6 1 02 02 b पान्तमा पुरुस्पृहम् ॥ ४९८
1 6 1 02 03 a अध्वर्यो अद्रिभिः सुतꣳ सोमं पवित्र आ नय ।
1 6 1 02 03 b पुनीहीन्द्राय पातवे ॥ ४९९
1 6 1 02 04 a तरत्स मन्दी धावति धारा सुतस्यान्धसः ।
1 6 1 02 04 b तरत्स मन्दी धावति ॥ ५००
1 6 1 02 05 a आ पवस्व सहस्रिणꣳ रयिꣳ सोम सुवीर्यम् ।
1 6 1 02 05 b अस्मे श्रवाꣳसि धारय ॥ ५०१
1 6 1 02 06 a अनु प्रत्नास आयवः पदं नवीयो अक्रमुः ।
1 6 1 02 06 b रुचे जनन्त सूर्यम् ॥ ५०२
1 6 1 02 07 a अर्षा सोम द्युमत्तमोऽभि द्रोणानि रोरुवत् ।
1 6 1 02 07 b सीदन्योनौ योनेष्वा ॥ ५०३
1 6 1 02 08 a वृषा सोम द्युमाꣳ असि वृषा देव वृषव्रतः ।
1 6 1 02 08 b वृषा धर्माणि दध्रिषे ॥ ५०४
1 6 1 02 09 a इषे पवस्व धारया मृज्यमानो मनीषिभिः ।
1 6 1 02 09 b इन्दो रुचाभि गा इहि ॥ ५०५
1 6 1 02 10 a मन्द्रया सोम धारया वृषा पवस्व देवयुः ।
1 6 1 02 10 b अव्यो वारेभिरस्मयुः ॥ ५०६
1 6 1 02 11 a अया सोम सुकृत्यपा महान्त्सन्नभ्यवर्धथाः ।
1 6 1 02 11 b हिन्दान इद्वृषायसे ॥ ५०७
1 6 1 02 12 a अयं विचर्षणिर्हितः पवमानः स चेतति ।
1 6 1 02 12 b हिन्वान आप्यं बृहत् ॥ ५०८
1 6 1 02 13 a प्र ण इन्दो महे तु न ऊर्मिं न बिभ्रदर्षसि ।
1 6 1 02 13 b अभि देवाꣳ अयास्यः ॥ ५०९
1 6 1 02 14 a अपघ्नन्पवते मृधोऽप सोमो अराव्णः ।
1 6 1 02 14 b गच्छन्निन्द्रस्य निष्कृतम् ॥ ५१०

[स्व. १५ । उ. २ । धा. ५७ । फो ॥]

तृतीया दशतिः

1 6 1 03 01 a पुनानः सोम धारयापो वसानो अर्षसि ।
1 6 1 03 01 b आ रत्नधा योनिमृतस्य सीदस्युत्सो देवो हिरण्ययः ॥ ५११
1 6 1 03 02 a परीतो षिञ्चता सुतꣳ सोमो य उत्तमꣳ हविः ।
1 6 1 03 02 b दधन्वाꣳ यो नर्यो अप्स्वा३न्तरा सुषाव सोममद्रिभिः ॥ ५१२

1 6 1 03 03 a आ सोम स्वानो अद्रिभिस्तिरो वाराण्यव्यया ।
1 6 1 03 03 b जनो न पुरि चम्वोर्विशद्धरिः सदो वनेषु दध्रिषे ॥ ५१३
1 6 1 03 04 a प्र सोम देववीतये सिन्धुर्न पिप्ये अर्णसा ।
1 6 1 03 04 b अꣳशोः पयसा मदिरो न जागृविरच्छा कोशं मधुश्चुतम् ॥ ५१४
1 6 1 03 05 a सोम उ ष्वाणः सोतृभिरधि ष्णुभिरवीनाम् ।
1 6 1 03 05 b अश्वयेव हरिता याति धारया मन्द्रया याति धारया ॥ ५१५
1 6 1 03 06 a तवाहꣳ सोम रारण सख्य इन्दो दिवेदिवे ।
1 6 1 03 06 b पुरूणि बभ्रो नि चरन्ति मामव परिधीꣳरति ताꣳ इहि ॥ ५१६
1 6 1 03 07 a मृज्यमानः सुहस्त्या समुद्रे वाचमिन्वसि ।
1 6 1 03 07 b रयिं पिशङ्गं बहुलं पुरुस्पृहं पवमानाभ्यर्षसि ॥ ५१७
1 6 1 03 08 a अभि सोमास आयवः पवन्ते मद्यं मदम् ।
1 6 1 03 08 b समुद्रस्याधि विष्टपे मनीषिणो मत्सरासो मदच्युतः ॥ ५१८
1 6 1 03 09 a पुनानः सोम जागृविरव्या वारैः परि प्रियः ।
1 6 1 03 09 b त्वं विप्रो अभवोऽङ्गिरस्तम मध्वा यज्ञं मिमिक्ष णः ॥ ५१९
1 6 1 03 10 a इन्द्राय पवते मदः सोमो मरुत्वते सुतः ।
1 6 1 03 10 b सहस्रधारो अत्यव्यमर्षति तमी मृजन्त्यायवः ॥ ५२०
1 6 1 03 11 a पवस्व वाजसातमोऽभि विश्वानि वार्या ।
1 6 1 03 11 b त्वꣳ समुद्रः प्रथमे विधर्मं देवेभ्यं सोम मत्सरः ॥ ५२१
1 6 1 03 12 a पवमाना असृक्षत पवित्रमति धारया ।
1 6 1 03 12 b मरुत्वन्तो मत्सरा इन्द्रिया हया मेधामभि प्रयाꣳसि च ॥ ५२२

[स्व. १९ । उ. ३ । धा. ९१ । द ॥]

चतुर्थी दशतिः

1 6 1 04 01 a प्र तु द्रव परि कोशं नि षीद नृभिः पुनानो अभि वाजमर्ष ।
1 6 1 04 01 b अश्वं न त्वा वाजिनं मर्जयन्तोऽच्छा बर्ही रशनाभिर्नयन्ति ॥ ५२३
1 6 1 04 02 a प्र काव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति ।
1 6 1 04 02 b महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्येति रेभन् ॥ ५२४
1 6 1 04 03 a तिस्रो वाच ईरयति प्र वह्निर्ऋतस्य धीतिं ब्रह्मणो मनीषाम् ।
1 6 1 04 03 b गावो यन्ति गोपतिं पृच्छमानाः सोमं यन्ति मतयो वावशानाः ॥ ५२५
1 6 1 04 04 a अस्य प्रेषा हेमना पूयमानो देवो देवेभिः समपृक्त रसम् ।
1 6 1 04 04 b सुतः पवित्रं पर्येति रेभन्मितेव सद्म पशुमन्ति होता ॥ ५२६
1 6 1 04 05 a सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः ।
1 6 1 04 05 b जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ॥ ५२७
1 6 1 04 06 a अभि त्रिपृष्ठं वृषणं वयोधामाङ्गोषिणमवावशन्त वाणीः ।
1 6 1 04 06 b वना वसानो वरुणो न सिन्धूर्वि रत्नधा दयते वार्याणि ॥ ५२८
1 6 1 04 07 a अक्रान्त्समुद्रः प्रथमे विधर्मं जनयन्प्रजा भुवनस्य गोपाः ।
1 6 1 04 07 b वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे स्वानो अद्रिः ॥ ५२९
1 6 1 04 08 a कनिक्रन्ति हरिरा सृज्यमानः सीदन्वनस्य जठरे पुनानः ।
1 6 1 04 08 b नृभिर्यतः कृणुते निर्णिजं गामतो मतिं जनयत स्वधाभिः ॥ ५३०

1 6 1 04 09 a एष स्य ते मधुमाꣳ इन्द्र सोमो वृषा वृष्णः परि पवित्रे अक्षाः ।
1 6 1 04 09 b सहस्रदाः शतदा भूरिदावा शश्वत्तमं बर्हिरा वाज्यस्थात् ॥ ५३१
1 6 1 04 10 a पवस्व सोम मधुमाꣳ ऋतावापो वसानो अधि सानो अव्ये ।
1 6 1 04 10 b अव द्रोणानि घृतवन्ति रोह मदिन्तमो मत्सर इन्द्रपानः ॥ ५३२

[स्व. १८ । उ. ३ । धा. ८७ । डे ॥]

पञ्चमी दशतिः

1 6 1 05 01 a प्र सेनानीः शूरो अग्रे रथानां गव्यन्नेति हर्षते अस्य सेना ।
1 6 1 05 01 b भद्रान्कृण्वन्निन्द्रहवान्त्सखिभ्य आ सोमो वस्त्रा रभसानि दत्ते ॥ ५३३
1 6 1 05 02 a प्र ते धारा मधुमतीरसृग्रन्वारं यत्पूतो अत्येष्यव्यम् ।
1 6 1 05 02 b पवमान पवसे धाम गोनां जनयन्त्सूर्यमपिन्वो अर्कैः ॥ ५३४
1 6 1 05 03 a प्र गायताभ्यर्चाम देवान्त्सोमꣳ हिनोत महते धनाय ।
1 6 1 05 03 b स्वादुः पवतामति वारमव्यमा सीदतु कलशं देव इन्दुः ॥ ५३५
1 6 1 05 04 a प्र हिन्वानो जनिता रोदस्यो रथो न वाजꣳ सनिषन्नयासीत् ।
1 6 1 05 04 b इन्द्रं गच्छन्नायुधा सꣳशिशानो विश्वा वसु हस्तयोरादधानः ॥ ५३६
1 6 1 05 05 a तक्षद्यदी मनसो वेनतो वाग्ज्येष्ठस्य धर्मं द्युक्षोरनीके ।
1 6 1 05 05 b आदीमायन्वरमा वावशाना जुष्टं पतिं कलशे गाव इन्दुम् ॥ ५३७
1 6 1 05 06 a साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः ।
1 6 1 05 06 b हरिः पर्यद्रवज्जाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी ॥ ५३८
1 6 1 05 07 a अधि यदस्मिन्वाजिनीव शुभः स्पर्धन्ते धियः सूरे न विशः ।
1 6 1 05 07 b अपो वृणानः पवते कवीयन्व्रजं न पशुवर्धनाय मन्म ॥ ५३९
1 6 1 05 08 a इन्दुर्वाजी पवते गोन्योघा इन्द्रे सोमः सह इन्वन्मदाय ।
1 6 1 05 08 b हन्ति रक्षो बाधते पर्यरातिं वरिवस्कृण्वन्वृजनस्य राजा ॥ ५४०
1 6 1 05 09 a अया पवा पवस्वैना वसूनि माꣳश्चत्व इन्द्रो सरसि प्र धन्व ।
1 6 1 05 09 b ब्रघ्नश्चिद्यस्य वातो न जूतिं पुरुमेधाश्चित्तकवे नरं धात् ॥ ५४१
1 6 1 05 10 a महत्तत्सोमो महिषश्चकारापां यद्गर्भोऽवृणीत देवान् ।
1 6 1 05 10 b अदधादिन्द्रे पवमान ओजोऽजनयत्सूर्ये ज्योतिरिन्दुः ॥ ५४२
1 6 1 05 11 a असर्जि वक्वा रथ्ये यथाजौ धिया मनोता प्रथमा मनीष ।
1 6 1 05 11 b दश स्वसारो अधि सानो अव्ये मृजन्ति वह्निꣳ सदनेष्वच्छ ॥ ५४३
1 6 1 05 12 a अपामिवेदूर्मयस्तर्त्तुराणाः प्र मनीषा ईरते सोममच्छ ।
1 6 1 05 12 b नमस्यन्तीरुप च यन्ति सं चाच विशन्त्युशतीरुशन्तम् ॥ ५४४

[स्व. १९ । उ. ३ । धा. ८२ । दा ॥]

इति षष्ठप्रपाठके प्रथमोऽर्धः ॥

षष्ठ प्रपाठकः । द्वितीयोऽर्धः

षष्ठी दशतिः

1 6 2 06 01 a पुरोजिती वो अन्धसः सुताय मादयित्नवे ।
1 6 2 06 01 b अप श्वानꣳ श्नथिष्टन सखायो दीर्घजिह्व्यम् ॥ ५४५
1 6 2 06 02 a अयं पूषा रयिर्भगः सोमः पुनानो अर्षति ।
1 6 2 06 02 b पतिर्विश्वस्य भूमनो व्यख्यद्रोदसी उभे ॥ ५४६
1 6 2 06 03 a सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः ।
1 6 2 06 03 b पवित्रवन्तो अक्षरन्देवान्गच्छन्तु वो मदाः ॥ ५४७
1 6 2 06 04 a सोमाः पवन्त इन्दवोऽस्मभ्यं गातुवित्तमाः ।
1 6 2 06 04 b मित्राः स्वाना अरेपसः स्वाध्यः स्वर्विदः ॥ ५४८
1 6 2 06 05 a अभी नो वाजसातमꣳ रयिमर्ष शतस्पृहम् ।
1 6 2 06 05 b इन्दो सहस्रभर्णसं तुविद्युम्नं विभासहम् ॥ ५४९
1 6 2 06 06 a अभी नवन्ते अद्रुहः प्रियमिन्द्रस्य काम्यम् ।
1 6 2 06 06 b वत्सं न पूर्व आयुनि जातꣳ रिहन्ति मातरः ॥ ५५०
1 6 2 06 07 a आ हर्यताय धृष्णवे धनुष्टन्वन्ति पौꣳस्यम् ।
1 6 2 06 07 b शुक्रा वि यन्त्यसुराय निर्णिजे विपामग्रे महीयुवः ॥ ५५१
1 6 2 06 08 a परि त्यꣳ हर्यतꣳ हरिं बभ्रुं पुनन्ति वारेण ।
1 6 2 06 08 b यो देवान्विश्वाꣳ इत्परि मदेन सह गच्छति ॥ ५५२
1 6 2 06 09 a प्र सुन्वानास्यान्धसो मर्तो न वष्ट तद्वचः ।
1 6 2 06 09 b अप श्वानमराधसꣳ हता मखं न भृगवः ॥ ५५३

[स्व. १०। उ. ५। धा. ६१। म ॥]

सप्तमी दशतिः

1 6 2 07 01 a अभि प्रियाणि पवते चनोहितो नामानि यह्वो अधि येषु वर्धते ।
1 6 2 07 01 b आ सूर्यस्य बृहतो बृहन्नधि रथं विष्वञ्चमरुहद्विचक्षणः ॥ ५५४
1 6 2 07 02 a अचोदसो नो धन्वन्त्विन्दवः प्र स्वानासो बृहद्देवेषु हरयः ।
1 6 2 07 02 b वि चिदश्नाना इषयो अरातयोऽर्यो नः सन्तु सनिषन्तु नो धियः ॥ ५५५
1 6 2 07 03 a एष प्र कोशे मधुमाꣳ अचिक्रददिन्द्रस्य वज्रो वपुषो वपुष्टमः ।
1 6 2 07 03 b अभ्यृ३तस्य सुदुघा घृतश्चुतो वाश्रा अर्षन्ति पयसा च धेनवः ॥ ५५६
1 6 2 07 04 a प्रो अयासीदिन्दुरिन्द्रस्य निष्कृतꣳ सखा सख्युर्न प्र मिनाति सङ्गिरम् ।
1 6 2 07 04 b मर्य इव युवतिभिः समर्षति सोमः कलशे शतयामना पथा ॥ ५५७
1 6 2 07 05 a धर्ता दिवः पवते कृत्व्यो रसो दक्षो देवानामनुमाद्यो नृभिः ।
1 6 2 07 05 b हरिः सृजानो अत्यो न सत्वभिर्वृथा पाजाꣳसि कृणुषे नदीष्वा ॥ ५५८
1 6 2 07 06 a वृषा मतीनां पवते विचक्षणः सोमो अह्नां प्रतरीतोषसां दिवः ।
1 6 2 07 06 b प्राणा सिन्धूनां कलशाꣳ अचिक्रददिन्द्रस्य हार्द्याविशन्मनीषिभिः ॥ ५५९
1 6 2 07 07 a त्रिरस्मै सप्त धेनवो दुदुह्रिरे सत्यामाशिरं परमे व्योमनि ।
1 6 2 07 07 b चत्वार्यन्या भुवनानि निर्णिजे चारूणि चक्रे यदृतैरवर्धत ॥ ५६०
1 6 2 07 08 a इन्द्राय सोम सुषुतः परि स्रवापामीवा भवतु रक्षसा सह ।
1 6 2 07 08 b मा ते रसस्य मत्सत द्वयाविनो द्रविणस्वन्त इह सन्त्विन्दवः ॥ ५६१

1 6 2 07 09 a असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अचिक्रदत् ।
1 6 2 07 09 b पुनानो वारमत्येष्यव्ययꣳ श्येनो न योनिं घृतवन्तमासदत् ॥ ५६२
1 6 2 07 10 a प्र देवमच्छा मधुमन्त इन्दवोऽसिष्यदन्त गाव आ न धेनवः ।
1 6 2 07 10 b बर्हिषदो वचनावन्त ऊधभिः परिस्रुतमुस्रिया निर्णिजं धिरे ॥ ५६३
1 6 2 07 11 a अञ्जते व्यञ्जते समञ्जते क्रतुꣳ रिहन्ति मध्वाभ्यञ्जते ।
1 6 2 07 11 b सिन्धोरुऽच्छ्वासे पतयन्तमुक्षणꣳ हिरण्यपावाः पशुमप्सु गृभ्णते ॥ ५६४
1 6 2 07 12 a पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ।
1 6 2 07 12 b अतप्ततनूर्न तदामो अश्नुते शृतास इद्वहन्तः सं तदाशत ॥ ५६५

[स्व. १५ । उ. ११ । धा. १३७ । पे ॥]

अष्टमी दशतिः

1 6 2 08 01 a इन्द्रमच्छ सुता इमे वृषणं यन्तु हरयः ।
1 6 2 08 01 b श्रुष्टे जातास इन्दवः स्वर्विदः ॥ ५६६
1 6 2 08 02 a प्र धन्वा सोम जागृविरिन्द्रायेन्दो परि स्रव ।
1 6 2 08 02 b द्युमन्तꣳ शुष्ममा भर स्वर्विदम् ॥ ५६७
1 6 2 08 03 a सखाय आ नि षीदत पुनानाय प्र गायत ।
1 6 2 08 03 b शिशुं न यज्ञैः परि भूषत श्रिये ॥ ५६८
1 6 2 08 04 a तं वः सखायो मदाय पुनानमभि गायत ।
1 6 2 08 04 b शिशुं न हव्यैः स्वदयन्त गूर्तिभिः ॥ ५६९
1 6 2 08 05 a प्राणा शिशुर्महीनाꣳ हिन्वन्नृतस्य दीधितिम् ।
1 6 2 08 05 b विश्वा परि प्रिया भुवदध द्विता ॥ ५७०
1 6 2 08 06 a पवस्व देववीतय इन्दो धाराभिरोजसा ।
1 6 2 08 06 b आ कलशं मधुमान्त्सोम नः सदः ॥ ५७१
1 6 2 08 07 a सोमः पुनान ऊर्मिणाव्यं वारं वि धावति ।
1 6 2 08 07 b अग्रे वाचः पवमानः कनिक्रदत् ॥ ५७२
1 6 2 08 08 a प्र पुनानाय वेधसे सोमाय वच उच्यते ।
1 6 2 08 08 b भृतिं न भरा मतिभिर्जुजोषते ॥ ५७३
1 6 2 08 09 a गोमन्न इन्दो अश्ववत्सुतः सुदक्ष धनिव ।
1 6 2 08 09 b शुचिं च वर्णमधि गोषु धार्य ॥ ५७४
1 6 2 08 10 a अस्मभ्यं त्वा वसुविदमभि वाणीरनूषत ।
1 6 2 08 10 b गोभिष्टे वर्णमभि वासयामसि ॥ ५७५
1 6 2 08 11 a पवते हर्यतो हरिरति ह्वराꣳसि रꣳह्या ।
1 6 2 08 11 b अभ्यर्ष स्तोतृभ्यो वीरवद्यशः ॥ ५७६
1 6 2 08 12 a परि कोशं मधुश्चुतꣳ सोमः पुनानो अर्षति ।
1 6 2 08 12 b अभि वाणीर्ऋषीणाꣳ सप्ता नूषत ॥ ५७७

[स्व. ८ । उ. ३ । धा. ४६ । ठ ॥]

नवमी दशतिः

1 6 2 09 01 a पवस्व मधुमत्तम इन्द्राय सोम क्रतुवित्तमो मदः ।
1 6 2 09 01 b महि द्युक्षतमो मदः ॥ ५७८
1 6 2 09 02 a अभि द्युम्नं बृहद्यश इषस्पते दिदीहि देव देवयुम् ।
1 6 2 09 02 b वि कोशं मध्यमं युव ॥ ५७९
1 6 2 09 03 a आ सोता परि षिञ्चताश्वं न स्तोममप्तुरꣳ रजस्तुरम् ।
1 6 2 09 03 b वनप्रक्षमुदप्रुतम् ॥ ५८०
1 6 2 09 04 a एतमु त्यं मदच्युतꣳ सहस्रधारं वृषभं दिवोदुहम् ।
1 6 2 09 04 b विश्वा वसूनि बिभ्रतम् ॥ ५८१
1 6 2 09 05 a स सुन्वे यो वसूनां यो रायामानेता य इडानाम् ।
1 6 2 09 05 b सोमो यः सुक्षितीनाम् ॥ ५८२
1 6 2 09 06 a त्वꣳ ह्या३ङ्ग दैव्या पवमान जनिमानि द्युमत्तमः ।
1 6 2 09 06 b अमृतत्वाय घोषयन् ॥ ५८३
1 6 2 09 07 a एष स्य धारया सुतोऽव्यो वारेभिः पवते मदिन्तमः ।
1 6 2 09 07 b क्रीडन्नूर्मिरपामिव ॥ ५८४
1 6 2 09 08 a य उस्रिया अपि या अन्तरश्मनि निर्गा अकृन्तदोजसा ।
1 6 2 09 08 b अभि व्रजं तत्निषे गव्यमश्व्यं वर्मीव धृष्णवा रुज ।
1 6 2 09 08 c ॐ वर्मीव धृष्णवा रुज ॥ ५८५

[स्व. ७ । उ. १ । धा. ४३ । चि ॥]

इति षष्ठप्रपाठके द्वितीयोऽर्धः ॥

इति षष्ठप्रपाठकश्च समाप्तः ॥

॥ इति सौम्यं पावमानं पर्व काण्डम् ॥

॥ इति पूर्वार्चिकः ॥

आरण्य आर्चिक

आरण्य काण्ड

प्रथमा दशतिः

2 0 0 01 01 a इन्द्र ज्येष्ठं न आ भर ओजिष्ठं पुपुरि श्रवः ।
2 0 0 01 01 b यद्दिधृक्षेम वज्रहस्त रोदसी ओभे सुशिप्र पप्राः ॥ ५८६
2 0 0 01 02 a इन्द्रो राजा जगतश्चर्षणीनामधिक्षमा विश्वरूपं यदस्य ।
2 0 0 01 02 b ततो ददाति दाशुषे वसूनि चोदद्राध उपस्तुतं चिदर्वाक् ॥ ५८७
2 0 0 01 03 a यस्येदमा रजोयुजस्तुजे जने वनꣳ स्वः ।
2 0 0 01 03 b इन्द्रस्य रन्त्यं बृहत् ॥ ५८८
2 0 0 01 04 a उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमꣳ श्रथाय ।
2 0 0 01 04 b अथादित्य व्रते वयं तवानागसो अदितये स्याम ॥ ५८९
2 0 0 01 05 a त्वया वयं पवमानेन सोम भरे कृतं वि चिनुयाम शश्वत् ।
2 0 0 01 05 b तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ५९०
2 0 0 01 06 a इमं वृषणं कृणुतैकमिन्माम् ॥ ५९१
2 0 0 01 07 a स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः ।
2 0 0 01 07 b वरिवोवित्परिस्रव ॥ ५९२
2 0 0 01 08 a एना विश्वान्यर्य आ द्युम्नानि मानुषाणाम् ।
2 0 0 01 08 b सिषासन्तो वनामहे ॥ ५९३
2 0 0 01 09 a अहमस्मि प्रथमजा ऋतस्य पूर्वं देवेभ्यो अमृतस्य नाम ।
2 0 0 01 09 b यो मा ददाति स इदेवमावदहमन्नमन्नमदन्तमद्मि ॥ ५९४

द्वितीया दशतिः

2 0 0 02 01 a त्वमेतदधारयः कृष्णासु रोहिणीषु च ।
2 0 0 02 01 b परुष्णीषु रुशत्पयः ॥ ५९५
2 0 0 02 02 a अरूरुचदुषसः पृश्निरग्रिय उक्षा मिमेति भुवनेषु वाजयुः ।
2 0 0 02 02 b मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमादधुः ॥ ५९६
2 0 0 02 03 a इन्द्र इद्धर्योः सचा सम्मिश्ल आ वचोयुजा ।
2 0 0 02 03 b इन्द्रो वज्री हिरण्ययः ॥ ५९७
2 0 0 02 04 a इन्द्र वाजेषु नोऽव सहस्रप्रधनेषु च ।
2 0 0 02 04 b उग्र उग्राभिरूतिभिः ॥ ५९८
2 0 0 02 05 a प्रथश्च यस्य सप्रथश्च नामानुष्टुभस्य हविषो हविर्यत् ।
2 0 0 02 05 b धातुर्द्युतानात्सवितुश्च विष्णो रथन्तरमा जभारा वसिष्ठः ॥ ५९९

2 0 0 02 06 a नियुत्वान्वायवा गह्ययꣳ शुक्रो अयामि ते ।
2 0 0 02 06 b गन्तासि सुन्वतो गृहम् ॥ ६००
2 0 0 02 07 a यज्जायथा अपूर्व्य मघवन्वृत्रहत्याय ।
2 0 0 02 07 b तत्पृथिवीमप्रथयस्तदस्तभ्ना उतो दिवम् ॥ ६०१

तृतीया दशतिः

2 0 0 03 01 a मयि वर्चो अथो यशोऽथो यज्ञस्य यत्पयः ।
2 0 0 03 01 b परमेष्ठी प्रजापतिर्दिवि द्यामिव दृꣳहतु ॥ ६०२
2 0 0 03 02 a सं ते पयाꣳसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः ।
2 0 0 03 02 b आप्यायमानो अमृताय सोम दिवि श्रवाꣳस्युत्तमानि धिष्व ॥ ६०३
2 0 0 03 03 a त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः ।
2 0 0 03 03 b त्वमातनोरुर्वा३न्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ ॥ ६०४
2 0 0 03 04 a अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम् ।
2 0 0 03 04 b होतारं रत्नधातमम् ॥ ६०५
2 0 0 03 05 a ते मन्वत प्रथमं नाम गोनां त्रिः सप्त परमं नाम जनान् ।
2 0 0 03 05 b ता जानतीरभ्यनूषत क्षा आविर्भुवन्नरुणीर्यशसा गावः ॥ ६०६
2 0 0 03 06 a समन्या यन्त्युपयन्त्यन्याः समानमूर्वं नद्यस्पृणन्ति ।
2 0 0 03 06 b तमू शुचिꣳ शुचयो दीदिवाꣳसमपान्नपातमुप यन्त्यापः ॥ ६०७
2 0 0 03 07 a आ प्रागाद्भद्रा युवतिरह्नः केतून्त्समीर्त्सति ।
2 0 0 03 07 b अभूद्भद्रा निवेशनी विश्वस्य जगतो रात्री ॥ ६०८
2 0 0 03 08 a प्रक्षस्य वृष्णो अरुषस्य नू महः प्र नो वचो विदथा जातवेदसे ।
2 0 0 03 08 b वैश्वानराय मतिर्नव्यसे शुचिः सोम इव पवते चारुरग्नये ॥ ६०९
2 0 0 03 09 a विश्वे देवा मम शृण्वन्तु यज्ञमुभे रोदसी अपां नपाच्च मन्म ।
2 0 0 03 09 b मा वो वचाꣳसि परिचक्ष्याणि वोचꣳ सुम्नेष्विद्वो अन्तमा मदेम ॥ ६१०
2 0 0 03 10 a यशो मा द्यावापृथिवी यशो मेन्द्रबृहस्पती ।
2 0 0 03 10 b यशो भगस्य विन्दतु यशो मा प्रतिमुच्यताम् ।
2 0 0 03 10 c यशस्व्या३स्याः सꣳ सदोऽहं प्रवदिता स्याम् ॥ ६११
2 0 0 03 11 a इन्द्रस्य नु वीर्याणि प्रवोचं यानि चकार प्रथमानि वज्री ।
2 0 0 03 11 b अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत्पर्वतानाम् ॥ ६१२
2 0 0 03 12 a अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन् ।
2 0 0 03 12 b त्रिधातुरर्को रजसो विमानोऽजस्रं ज्योतिर्हविरस्मि सर्वम् ॥ ६१३
2 0 0 03 13 a पात्यग्निर्विपो अग्रं पदं वेः पाति यह्वश्चरणꣳ सूर्यस्य ।
2 0 0 03 13 b पाति नाभा सप्तशीर्षाणमग्निः ॥ ६१४

चतुर्थी दशतिः

2 0 0 04 01 a भ्राजन्त्यग्ने समिधान दीदिवो जिह्वा चरत्यन्तरासनि ।
2 0 0 04 01 b स त्वं नो अग्ने पयसा वसुविद्रयिं वर्चो दृशेऽदाः ॥ ६१५
2 0 0 04 02 a वसन्त इन्नु रन्त्यो ग्रीष्म इन्नु रन्त्यः ।

2 0 0 04 02 b वर्षाण्यनु शरदो हेमन्तः शिशिर इन्नु रन्त्यः ॥ ६१६
2 0 0 04 03 a सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
2 0 0 04 03 b स भूमिꣳ सर्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ ६१७
2 0 0 04 04 a त्रिपादूर्ध्व उदैत्पुरुषः पदोऽस्येहाभवत्पुनः ।
2 0 0 04 04 b तथा विष्वङ् व्यक्रामदशनानशने अभि ॥ ६१८
2 0 0 04 05 a पुरुष एवेदꣳ सर्वं यद्भूतं यच्च भाव्यम् ।
2 0 0 04 05 b पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि ॥ ६१९
2 0 0 04 06 a तावानस्य महिमा ततो ज्यायाꣳश्च पूरुषः ।
2 0 0 04 06 b उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ ६२०
2 0 0 04 07 a ततो विराडजायत विराजो अधि पूरुषः ।
2 0 0 04 07 b स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥ ६२१
2 0 0 04 08 a मन्ये वाꣳ द्यावापृथिवी सुभोजसौ ये अप्रथेथाममितमभि योजनम् ।
2 0 0 04 08 b द्यावापृथिवी भवतꣳ स्योने ते नो मुञ्चतमꣳहसः ॥ ६२२
2 0 0 04 09 a हरी त इन्द्र श्मश्रूण्युतो ते हरितौ हरि ।
2 0 0 04 09 b तं त्वा स्तुवन्ति कवयः पुरुषासो वनर्गवः ॥ ६२३
2 0 0 04 10 a यद्वर्चो हिरण्यस्य यद्वा वर्चो गवामुत ।
2 0 0 04 10 b सत्यस्य ब्रह्मणो वर्चस्तेन मा सꣳ सृजामसि ॥ ६२४
2 0 0 04 11 a सहस्तन्न इन्द्र दद्ध्योज ईशे ह्यस्य महतो विरप्शिन् ।
2 0 0 04 11 b क्रतुं न नृम्णꣳ स्थविरं च वाजं वृत्रेषु शत्रून्त्सुहना कृधी नः ॥ ६२५
2 0 0 04 12 a सहर्षभाः सहवत्सा उदेत विश्वा रूपाणी बिभ्रतीर्द्व्यूध्नीः ।
2 0 0 04 12 b उरुः पृथुरयं वो अस्तु लोक इमा आपः सुप्रपाणा इह स्त ॥ ६२६

पञ्चमी दशतिः

2 0 0 05 01 a अग्न आयूꣳषि पवस आसुवोर्जमिषं च नः ।
2 0 0 05 01 b आरे बाधस्व दुच्छुनाम् ॥ ६२७
2 0 0 05 02 a विभ्राड्बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतम् ।
2 0 0 05 02 b वातजूतो यो अभिरक्षति त्मना प्रजाः पिपर्ति बहुधा वि राजति ॥ ६२८
2 0 0 05 03 a चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
2 0 0 05 03 b आप्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च ॥ ६२९
2 0 0 05 04 a आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः ।
2 0 0 05 04 b पितरं च प्रयन्त्स्वः ॥ ६३०
2 0 0 05 05 a अन्तश्चरति रोचनास्य प्राणादपानती ।
2 0 0 05 05 b व्यख्यन्महिषो दिवम् ॥ ६३१
2 0 0 05 06 a त्रिꣳशद्धाम वि राजति वाक्पतङ्गाय धीयते ।
2 0 0 05 06 b प्रति वस्तोरह द्युभिः ॥ ६३२
2 0 0 05 07 a अप त्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः ।
2 0 0 05 07 b सूराय विश्वचक्षसे ॥ ६३३
2 0 0 05 08 a अदृश्रन्नस्य केतवो वि रश्मयो जनाꣳ अनु ।
2 0 0 05 08 b भ्राजन्तो अग्नयो यथा ॥ ६३४

2 0 0 05 09 a तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य ।
2 0 0 05 09 b विश्वमाभासि रोचनम् ॥ ६३५
2 0 0 05 10 a प्रत्यङ् देवानां विशः प्रत्यङ्ङुदेषि मानुषान् ।
2 0 0 05 10 b प्रत्यङ् विश्वꣳ स्वर्दृशे ॥ ६३६
2 0 0 05 11 a येना पावक चक्षसा भुरण्यन्तं जनाꣳ अनु ।
2 0 0 05 11 b त्वं वरुण पश्यसि ॥ ६३७
2 0 0 05 12 a उद्द्यामेषि रजः पृथ्वहा मिमानो अक्तुभिः ।
2 0 0 05 12 b पश्यञ्जन्मानि सूर्य ॥ ६३८
2 0 0 05 13 a अयुक्त सप्त शुन्ध्युवः सूरो रथस्य नप्त्र्यः ।
2 0 0 05 13 b ताभिर्याति स्वयुक्तिभिः ॥ ६३९
2 0 0 05 14 a सप्त त्वा हरितो रथे वहन्ति देव सूर्य ।
2 0 0 05 14 b शोचिष्केशं विचक्षण ॥ ६४०

॥ इत्यारण्यं पर्व काण्डम् ॥

महानाम्न्य आर्चिक

3 0 0 00 01 a विदा मघवन् विदा गातुमनुशꣳसिषो दिशः ।
3 0 0 00 01 b शिक्षा शचीनां पते पूर्वीणां पुरूवसो ॥ ६४१
3 0 0 00 02 a आभिष्ट्वमभिष्टिभिः स्वाऽ३र्न्नाꣳशुः ।
3 0 0 00 02 b प्रचेतन प्रचेतयेन्द्र द्युम्नाय न इषे ॥ ६४२
3 0 0 00 03 a एवा हि शक्रो राये वाजाय वज्रिवः ।
3 0 0 00 03 b शविष्ठ वज्रिन्नृञ्जसे मꣳहिष्ठ वज्रिन्नृञ्जस ।
3 0 0 00 03 c आ याहि पिब मत्स्व ॥ ६४३
3 0 0 00 04 a विदा राये सुवीर्यं भवो वाजानां पतिर्वशाꣳ अनु ।
3 0 0 00 04 b मꣳहिष्ठ वज्रिन्नृञ्जसे यः शविष्ठः शूराणाम् ॥ ६४४
3 0 0 00 05 a यो मꣳहिष्ठो मघोनामꣳशुर्न्न शोचिः ।
3 0 0 00 05 b चिकित्वो अभि नो नयेंद्रो विदे तमु स्तुहि ॥ ६४५
3 0 0 00 06 a ईशे हि शक्रस्तमूतये हवामहे जेतारमपराजितम् ।
3 0 0 00 06 b स नः स्वर्षदति द्विषः क्रतुश्छन्द ऋतं बृहत् ॥ ६४६
3 0 0 00 07 a इन्द्रं धनस्य सातये हवामहे जेतारमपराजितम् ।
3 0 0 00 07 b स नः स्वर्षदति द्विषः स नः स्वर्षदति द्विषः ॥ ६४७
3 0 0 00 08 a पूर्वस्य यत्ते अद्रिवोꣳऽशुर्मदाय ।
3 0 0 00 08 b सुम्न आ धेहि नो वसो पूर्तिः शविष्ठ शस्यते ।
3 0 0 00 08 c वशी हि शक्रो नूनं तन्नव्यꣳ संन्यसे ॥ ६४८
3 0 0 00 09 a प्रभो जनस्य वृत्रहन्त्समर्येषु ब्रवावहै ।
3 0 0 00 09 b शूरो यो गोषु गच्छति सखा सुशेवो अद्वयुः ॥ ६४९

अथ पञ्च पुरीषपदानि

3 0 0 00 10 a एवाह्योऽ३ऽ३ऽ३वा । एवा ह्यग्ने । एवाहीन्द्र ।
3 0 0 00 10 b एवा हि पूषन् । एवा हि देवाः ॐ एवाहि देवाः ॥ ६५०

॥ इति पञ्च पुरीषपदानि ॥

॥ इति महानाम्न्यार्चिकः ॥

उत्तर आर्चिक

प्रथम प्रपाठकः । प्रथमोऽर्धः

प्रथमा सूक्त

(असितः काश्यपो देवलो वा। गायत्री। पवमानः सोमः।)

4 1 1 01 01 a उपास्मै गायता नरः पवमानायेन्दवे ।
4 1 1 01 01 b अभि देवाँ इयक्षते ॥ ६५१
4 1 1 01 02 a अभि ते मधुना पयोऽथर्वाणो अशिश्रयुः ।
4 1 1 01 02 b देवं देवाय देवयु ॥ ६५२
4 1 1 01 03 a स नः पवस्व शं गवे शं जनाय शमर्वते ।
4 1 1 01 03 b शँ राजन्नोषधीभ्यः ॥ ६५३

[धा. १४। उ. १। स्व. ४। ती ॥]

द्वितीया सूक्त

(कश्यपो मारीचः। गायत्री। पवमानः सोमः।)

4 1 1 02 01 a दविद्युतत्या रुचा परिष्टोभन्त्या कृपा ।
4 1 1 02 01 b सोमाः शुक्रा गवाशिरः ॥ ६५४
4 1 1 02 02 a हिन्वानो हेतृभिर्हित आ वाजं वाज्यक्रमीत् ।
4 1 1 02 02 b सीदन्तो वनुषो यथा ॥ ६५५
4 1 1 02 03 a ऋधक्सोम स्वस्तये संजग्मानो दिवा कवे ।
4 1 1 02 03 b पवस्व सूर्यो दृशे ॥ ६५६

[धा. १२। उ. ना। स्व. ३। यि ॥]

तृतीया सूक्त

(शतं वैखानसाः। गायत्री। पवमानः सोमः।)

4 1 1 03 01 a पवमानस्य ते कवे वाजिन्त्सर्गा असृक्षते ।
4 1 1 03 01 b अर्वन्तो न श्रवस्यवः ॥ ६५७
4 1 1 03 02 a अच्छा कोशं मधुश्चुतमसृग्रं वारे अव्यये ।

4 1 1 03 02 b अवावशन्त धीतयः ॥ ६५८
4 1 1 03 03 a अच्छा समुद्रमिन्दवोऽस्तं गावो न धेनवः ।
4 1 1 03 03 b अग्मन्नृतस्य योनिमा ॥ ६५९

[धा. ११। उ. १। स्व. ना। कौ ॥]

चतुर्था सूक्त

(भरद्वाजो बार्हस्पत्यः। गायत्री। अग्निः।)

4 1 1 04 01 a अग्न आ याहि वीतये गृणानो हव्यदातये ।
4 1 1 04 01 b नि होता सत्सि बर्हिषि ॥ ६६०
4 1 1 04 02 a तं त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि ।
4 1 1 04 02 b बृहच्छोचा यविष्ठ्य ॥ ६६१
4 1 1 04 03 a स नः पृथु श्रवाय्यमच्छा देव विवाससि ।
4 1 1 04 03 b बृहदग्ने सुवीर्यम् ॥ ६६२

[धा. ९। उ. ना। स्व. १। ल ॥]

पञ्चमा सूक्त

(विश्वामित्रो गाथिनः जमदग्निर्वा। गायत्री। मित्रावरुणौ।)

4 1 1 05 01 a आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम् ।
4 1 1 05 01 b मध्वा रजाꣳसि सुक्रतू ॥ ६६३
4 1 1 05 02 a उरुशꣳसा नमोवृधा मह्ना दक्षस्य राजथः ।
4 1 1 05 02 b द्राघिष्ठाभिः शुचिव्रता ॥ ६६४
4 1 1 05 03 a गृणाना जमदग्निना योनावृतस्य सीदतम् ।
4 1 1 05 03 b पातꣳ सोममृतावृधा ॥ ६६५

[धा. १२। उ. ना। स्व. ३। यि ॥]

षष्ठा सूक्त

(इरीम्बिठिः काण्वः। गायत्री। इन्द्रः।)

4 1 1 06 03 a आ याहि सुषुमा हि त इन्द्र सोमं पिबा इमम् ।
4 1 1 06 03 b एदं बर्हिः सदो मम ॥ ६६६
4 1 1 06 03 a आ त्वा ब्रह्मयुजा हरी वहतामिन्द्र केशिना ।
4 1 1 06 03 b उप ब्रह्माणि नः शृणु ॥ ६६७
4 1 1 06 03 a ब्रह्माणस्त्वा युजा वयꣳ सोमपामिन्द्र सोमिनः ।
4 1 1 06 03 b सुतावन्तो हवामहे ॥ ६६८

[धा. १०। उ. २। स्व. ना। फौ ॥]

सप्तमा सूक्त

(विश्वामित्रो गाथिनः। गायत्री। इन्द्राग्नी।)

4 1 1 07 01 a इन्द्राग्नी आ गतꣳ सुतं गीर्भिर्नभो वरेण्यम् ।
4 1 1 07 01 b अस्य पातं धियेषिता ॥ ६६९
4 1 1 07 02 a इन्द्राग्नी जरितुः सचा यज्ञो जिगाति चेतनः ।
4 1 1 07 02 b अया पातमिमꣳ सुतम् ॥ ६७०
4 1 1 07 03 a इन्द्रमग्निं कविच्छदा यज्ञस्य जूत्या वृणे ।
4 1 1 07 03 b ता सोमस्येह तृम्पताम् ॥ ६७१

[धा. ९। उ. १। स्व. २। ता ॥]

अष्टमा सूक्त

(अमहीयुराङ्गिरसः। गायत्री। पवमानः सोमः।)

4 1 1 08 01 a उच्चा ते जातमन्धसो दिवि सद्भूम्या ददे ।
4 1 1 08 01 b उग्रꣳ शर्म महि श्रवः ॥ ६७२
4 1 1 08 02 a स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः ।
4 1 1 08 02 b वरिवोवित्परि स्रव ॥ ६७३
4 1 1 08 03 a एना विश्वान्यर्य आ द्युम्नानि मानुषाणाम् ।
4 1 1 08 03 b सिषासन्तो वनामहे ॥ ६७४

[धा. १३। उ. २। स्व. ४। ठी ॥]

नवमा सूक्त

4 1 1 09 01 a पुनानः सोम धारयापो वसानो अर्षसि ।
4 1 1 09 01 b आ रत्नधा योनिमृतस्य सीदस्युत्सो देवो हिरण्ययः ॥ ६७५
4 1 1 09 02 a दुहान ऊधर्दिव्यं मधु प्रियं प्रत्नꣳ सधस्थमासदत् ।
4 1 1 09 02 b आपृच्छ्यं धरुणं वाज्यर्षसि नृभिर्धौतो विचक्षणः ॥ ६७६

[धा. ९। उ. ना। स्व. ५। लु ॥]

दशमा सूक्त

4 1 1 10 01 a प्र तु द्रव परि कोशं नि षीद नृभिः पुनानो अभि वाजमर्ष ।
4 1 1 10 01 b अश्वं न त्वा वाजिनं मर्जयन्तोऽच्छा बर्ही रशनाभिर्नयन्ति ॥ ६७७
4 1 1 10 02 a स्वायुधः पवते देव इन्दुरशस्तिहा वृजना रक्षमाणः ।
4 1 1 10 02 b पिता देवानां जनिता सुदक्षो विष्टम्भो दिवो धरुणः पृथिव्याः ॥ ६७८
4 1 1 10 03 a ऋषिर्विप्रः पुरएता जनानामृभुर्धीर उशना काव्येन ।

4 1 1 10 03 b स चिद्विवेद निहितं यदासामपीच्याउं गुह्यं नाम गोनाम् ॥ ६७९

[धा. २१ । उ. ना । स्व. ५ । हु ॥]

सूक्त ११

4 1 1 11 01 a अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः ।
4 1 1 11 01 b ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥ ६८०
4 1 1 11 02 a न त्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते ।
4 1 1 11 02 b अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे ॥ ६८१

[धा. २२ । उ. ना । स्व. ४ । यी ॥]

सूक्त १२

4 1 1 12 01 a कया नश्चित्र आ भुवदूती सदावृधः सखा ।
4 1 1 12 01 b कया शचिष्ठया वृता ॥ ६८२
4 1 1 12 02 a कस्त्वा सत्यो मदानां मँहिष्ठो मत्सदन्धसः ।
4 1 1 12 02 b दृढा चिदारुजे वसु ॥ ६८३
4 1 1 12 03 a अभी षु णः सखीनामविता जरितॄणाम् ।
4 1 1 12 03 b शतं भवास्यूतये ॥ ६८४

[धा. १३ । उ. १ । स्व. २ । टा ॥]

सूक्त १३

4 1 1 13 01 a तं वो दस्ममृतीषहं वसोर्मन्दानमन्धसः ।
4 1 1 13 01 b अभि वत्सं न स्वसरेषु धेनव इन्द्रं गीर्भिर्नवामहे ॥ ६८५
4 1 1 13 02 a द्युक्षँ सुदानुं तविषीभिरावृतं गिरिं न पुरुभोजसम् ।
4 1 1 13 02 b क्षुमन्तं वाजँ शतिनँ सहस्रिणं मक्षू गोमन्तमीमहे ॥ ६८६

[धा. ११ । उ. ना । स्व. ४ । ही ॥]

सूक्त १४

4 1 1 14 01 a तरोभिर्वो विदद्वसुमिन्द्रँ सबाध ऊतये ।
4 1 1 14 01 b बृहद्गायन्तः सुतसोमे अध्वरे हुवे भरं न कारिणम् ॥ ६८७
4 1 1 14 02 a न यं दुध्रा वरन्ते न स्थिरा मुरो मदेषु शिप्रमन्धसः ।
4 1 1 14 02 b य आदृत्या शशमानाय सुन्वते दाता जरित्र उक्थ्यम् ॥ ६८८

[धा. १७ । उ. ३ । स्व. ५ । जु ॥]

सूक्त १५

4 1 1 15 01 a स्वादिष्ठया मदिष्ठया पवस्व सोम धारया ।

4 1 1 15 01 b इन्द्राय पातवे सुतः ॥ ६८९
4 1 1 15 02 a रक्षोहा विश्वचर्षणिरभि योनिमयोहते ।
4 1 1 15 02 b द्रोणे सधस्थमासदत् ॥ ६९०
4 1 1 15 03 a वरिवोधातमो भुवो मꣳहिष्ठो वृत्रहन्तमः ।
4 1 1 15 03 b पर्षि राधो मघोनाम् ॥ ६९१

[धा. १५ । उ. १ । स्व. ना । पौ ॥]

सूक्त १६

4 1 1 16 01 a पवस्व मधुमत्तम इन्द्राय सोम क्रतुवित्तमो मदः ।
4 1 1 16 01 b महि द्युक्षतमो मदः ॥ ६९२
4 1 1 16 02 a यस्य ते पीत्वा वृषभो वृषायतेऽस्य पीत्वा स्वर्विदः ।
4 1 1 16 02 b स सुप्रकेतो अभ्यक्रमीदिषोऽच्छा वाजं नैतशः ॥ ६९३

[धा. १० । उ. १ । स्व. १ । प ॥]

सूक्त १७

4 1 1 17 01 a इन्द्रमच्छ सुता इमे वृषणं यन्तु हरयः ।
4 1 1 17 01 b श्रुष्टे जातास इन्दवः स्वर्विदः ॥ ६९४
4 1 1 17 02 a अयं भराय सानसिरिन्द्राय पवते सुतः ।
4 1 1 17 02 b सोमो जैत्रस्य चेतति यथा विदे ॥ ६९५
4 1 1 17 03 a अस्येदिन्द्रो मदेष्वा ग्राभं गृभ्णाति सानसिम् ।
4 1 1 17 03 b वज्रं च वृषणं भरत्समप्सुजित् ॥ ६९६

[धा. २१ । उ. १ । स्व. ३ । कि ॥]

सूक्त १८

4 1 1 18 01 a पुरोजिती वो अन्धसः सुताय मादयित्नवे ।
4 1 1 18 01 b अप श्वानꣳ श्नथिष्टन सखायो दीर्घजिह्व्यम् ॥ ६९७
4 1 1 18 02 a यो धारया पावकया परिप्रस्यन्दते सुतः ।
4 1 1 18 02 b इन्दुरश्वो न कृत्व्यः ॥ ६९८
4 1 1 18 03 a तं दुरोषमभी नरः सोमं विश्वाच्या धिया ।
4 1 1 18 03 b यज्ञाय सन्त्वद्रयः ॥ ६९९

[धा. १८ । उ. १ । स्व. ३ । टि ॥]

सूक्त १९

4 1 1 19 01 a अभि प्रियाणि पवते चनोहितो नामानि यह्वो अधि येषु वर्धते ।
4 1 1 19 01 b आ सूर्यस्य बृहतो बृहन्नधि रथं विष्वञ्चमरुहद्विचक्षणः॥ ७००
4 1 1 19 02 a ऋतस्य जिह्वा पवते मधु प्रियं वक्ता पतिर्धियो अस्या अदाभ्यः ।

4 1 1 19 02 b दधाति पुत्रः पित्रोरपीच्याꣳ नाम तृतीयमधि रोचनं दिवः ॥ ७०१
4 1 1 19 03 a अव द्युतानः कलशाꣳ अचिक्रदन्नृभिर्येमाणः कोश आ हिरण्यये ।
4 1 1 19 03 b अभी ऋतस्य दोहना अनूषताधि त्रिपृष्ठ उषसो वि राजसि ॥ ७०२

[धा. २९ । उ. ३ । स्व. ३ । दि ॥]

सूक्त २०

4 1 1 20 01 a यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे ।
4 1 1 20 01 b प्रप्र वयममृतं जातवेदसं प्रियं मित्रं न शꣳसिषम् ॥ ७०३
4 1 1 20 02 a ऊर्जो नपातꣳ स हिनायमस्मयुर्दाशेम हव्यदातये ।
4 1 1 20 02 b भुवद्वाजेष्वविता भुवद्वृध उत त्राता तनूनाम् ॥ ७०४

[धा. १२ । उ. ना । स्व. ५ । यु ॥]

सूक्त २१

4 1 1 21 01 a एह्यू षु ब्रवाणि तेऽग्न इत्थेतरा गिरः ।
4 1 1 21 01 b एभिर्वर्धास इन्दुभिः ॥ ७०५
4 1 1 21 02 a यत्र क्व च ते मनो दक्षं दधस उत्तरम् ।
4 1 1 21 02 b तत्रा योनिं कृणवसे ॥ ७०६
4 1 1 21 03 a न हि ते पूर्तमक्षिपद्भुवन्नेमानां पते ।
4 1 1 21 03 b अथा दुवो वनवसे ॥ ७०७

[धा. ७ । उ. ना । स्व. ४ । यी ॥]

सूक्त २२

4 1 1 22 01 a वयमु त्वामपूर्व्य स्थूरं न कच्चिद्भरन्तोऽवस्यवः ।
4 1 1 22 01 b वज्रिञ्चित्रꣳ हवामहे ॥ ७०८
4 1 1 22 02 a उप त्वा कर्मन्नूतये स नो युवोग्रश्चक्राम यो धृषत् ।
4 1 1 22 02 b त्वामिध्यवितारं ववृमहे सखाय इन्द्र सानसिम् ॥ ७०९

[धा. १२ । उ. १ । स्व. १ । च ॥]

सूक्त २३

4 1 1 23 01 a अधा हीन्द्र गिर्वण उप त्वा काम ईमहे ससृग्महे ।
4 1 1 23 01 b उदेव ग्मन्त उदभिः ॥ ७१०
4 1 1 23 02 a वार्ण त्वा यव्याभिर्वर्धन्ति शूर ब्रह्माणि ।
4 1 1 23 02 b ववृध्वाꣳसं चिदद्रिवो दिवेदिवे ॥ ७११
4 1 1 23 03 a युञ्जन्ति हरी इषिरस्य गाथयोरौ रथ उरुयुगे वचोयुजा ।
4 1 1 23 03 b इन्द्रवाहा स्वर्विदा ॥ ७१२

[धा. १७ । उ. ना । स्व. ३ । यि ॥]

इति प्रथमप्रपाठके प्रथमोऽर्धः ॥

प्रथम प्रपाठकः । द्वितीयोऽर्धः

सूक्त १

4 1 2 01 01 a पान्तमा वो अन्धस इन्द्रमभि प्र गायत ।
4 1 2 01 01 b विश्वासाहꣳ शतक्रतुं मꣳहिष्ठं चर्षणीनाम् ॥ ७१३
4 1 2 01 02 a पुरुहूतं पुरुष्टुतं गाथान्या३ꣳ सनश्रुतम् ।
4 1 2 01 02 b इन्द्र इति ब्रवीतन ॥ ७१४
4 1 2 01 03 a इन्द्र इन्नो महोनां दाता वाजानां नृतुः ।
4 1 2 01 03 b महाꣳ अभिज्ञ्वा यमत् ॥ ७१५

[धा. १० । उ. ना । स्व. २ । वा ॥]

सूक्त २

4 1 2 02 01 a प्र व इन्द्राय मादनꣳ हर्यश्वाय गायत ।
4 1 2 02 01 b सखायः सोमपाव्ने ॥ ७१६
4 1 2 02 02 a शꣳसेदुक्थꣳ सुदानव उत द्युक्षं यथ नरः ।
4 1 2 02 02 b चकृमा सत्यराधसे ॥ ७१७
4 1 2 02 03 a त्वं न इन्द्र वाजयुस्त्वं गव्युः शतक्रतो ।
4 1 2 02 03 b त्वꣳ हिरण्ययुर्वसो ॥ ७१८

[धा. ११ । उ. ३ । स्व. ना । गौ ॥]

सूक्त ३

4 1 2 03 01 a वयमु त्वा तदिदर्था इन्द्र त्वायन्तः सखायः ।
4 1 2 03 01 b कण्वा उक्थेभिर्जरन्ते ॥ ७१९
4 1 2 03 02 a न घेमन्यदा पपन वज्रिन्नपसो नविष्टौ ।
4 1 2 03 02 b तवेदु स्तोमैश्चिकेत ॥ ७२०
4 1 2 03 03 a इच्छन्ति देवाः सुन्वन्तं न स्वप्नाय स्पृहयन्ति ।
4 1 2 03 03 b यन्ति प्रमादमतन्द्राः ॥ ७२१

[धा. ५ । उ. १ । स्व. २ । पा ॥]

सूक्त ४

4 1 2 04 01 a इन्द्राय मद्वने सुतं परि ष्टोभन्तु नो गिरः ।
4 1 2 04 01 b अर्कमर्चन्तु कारवः ॥ ७२२

4 1 2 04 02 a यस्मिन्विश्वा अधि श्रियो रणन्ति सप्त सꣳसदः ।
4 1 2 04 02 b इन्द्रꣳ सुते हवामहे ॥ ७२३
4 1 2 04 03 a त्रिकद्रुकेषु चेतनं देवासो यज्ञमत्नत ।
4 1 2 04 03 b तमिद्वर्धन्तु नो गिरः ॥ ७२४

[धा. १४ । उ. ना । स्व. २ । ला ॥]

सूक्त ५

4 1 2 05 01 a अयं त इन्द्र सोमो निपूतो अधि बर्हिषि ।
4 1 2 05 01 b एहीमस्य द्रवा पिब ॥ ७२५
4 1 2 05 02 a शाचिगो शाचिपूजनायꣳ रणाय ते सुतः ।
4 1 2 05 02 b आखण्डल प्र हूयसे ॥ ७२६
4 1 2 05 03 a यस्ते शृङ्गवृषो णपात्प्रणपात्कुण्डपाय्यः ।
4 1 2 05 03 b न्यस्मिं दध्र आ मनः ॥ ७२७

[धा. १८ । उ. १ । स्व. ३ । टि ॥]

सूक्त ६

4 1 2 06 01 a आ तू न इन्द्र क्षुमन्तं चित्रं ग्राभꣳ सं गृभाय ।
4 1 2 06 01 b महाहस्ति दक्षिणेन ॥ ७२८
4 1 2 06 02 a विद्मा हि त्वा तुविकूर्मिं तुविदेष्णं तुवीमघम् ।
4 1 2 06 02 b तुविमात्रमवोभिः ॥ ७२९
4 1 2 06 03 a न हि त्वा शूर देवा न मर्तासो दित्सन्तम् ।
4 1 2 06 03 b भीमं न गां वारयन्ते ॥ ७३०

[धा. २१ । उ. १ । स्व. ७ । के ॥]

सूक्त ७

4 1 2 07 01 a अभि त्वा वृषभा सुते सुतꣳ सृजामि पीतये ।
4 1 2 07 01 b तृम्पा व्यश्नुही मदम् ॥ ७३१
4 1 2 07 02 a मा त्वा मूरा अविष्यवो मोपहस्वान आ दभन् ।
4 1 2 07 02 b मा कीं ब्रह्मद्विषं वनः ॥ ७३२
4 1 2 07 03 a इह त्वा गोपरीणसं महे मन्दन्तु राधसे ।
4 1 2 07 03 b सरो गौरो यथा पिब ॥ ७३३

[धा. १२ । उ. ना । स्व. १ । य ॥]

सूक्त ८

4 1 2 08 01 a इदम वसो सुतमन्धः पिबा सुपूर्णमुदरम् ।
4 1 2 08 01 b अनाभयिन्ररिमा ते ॥ ७३४

4 1 2 08 02 a नृभिर्धौतः सुतो अश्नैरव्या वारैः परिपूतः ।
4 1 2 08 02 b अश्वो न निक्तो नदीषु ॥ ७३५
4 1 2 08 03 a तं ते यवं यथा गोभिः स्वादुमकर्म श्रीणन्तः ।
4 1 2 08 03 b इन्द्र त्वास्मिंत्सधमादे ॥ ७३६

[धा. ९ । उ. २ । स्व. ना । थौ ॥]

सूक्त ९

4 1 2 09 01 a इदꣳ ह्यन्वोजसा सुतꣳ राधानां पते ।
4 1 2 09 01 b पिबा त्वा३स्य गिर्वणः ॥ ७३७
4 1 2 09 02 a यस्ते अनु स्वधामसत्सुते नि यच्छ तन्वम् ।
4 1 2 09 02 b स त्वा ममत्तु सोम्यम् ॥ ७३८
4 1 2 09 03 a प्र ते अश्नोतु कुक्ष्योः प्रेन्द्र ब्रह्मणा शिरः ।
4 1 2 09 03 b प्र बाहू शूर राधसा ॥ ७३९

[धा. १० । उ. १ । स्व. ४ । पी ॥]

सूक्त १०

4 1 2 10 01 a आ त्वेता नि षीदतेन्द्रमभि प्र गायत ।
4 1 2 10 01 b सखाय स्तोमवाहसः ॥ ७४०
4 1 2 10 02 a पुरूतमं पुरूणामीशानं वार्याणाम् ।
4 1 2 10 02 b इन्द्रꣳ सोमे सचा सुते ॥ ७४१
4 1 2 10 03 a स घा नो योग आ भुवत्स राये स पुरन्ध्या ।
4 1 2 10 03 b गमद्वाजेभिरा स नः ॥ ७४२

[धा. ८ । उ. १ । स्व. ४ । टी ॥]

सूक्त ११

4 1 2 11 01 a योगेयोगे तवस्तरं वाजेवाजे हवामहे ।
4 1 2 11 01 b सखाय इन्द्रमूतये ॥ ७४३
4 1 2 11 02 a अनु प्रत्नस्यौकसो हुवे तुविप्रतिं नरम् ।
4 1 2 11 02 b यं ते पूर्वं पिता हुवे ॥ ७४४
4 1 2 11 03 a आ घा गमद्यदि श्रवत्सहस्रिणीभिरूतिभिः ।
4 1 2 11 03 b वाजेभिरुप नो हवम् ॥ ७४५

[धा. ९ । उ. ना । स्व. २ । ला ॥]

सूक्त १२

4 1 2 12 01 a इन्द्र सुतेषु सोमेषु क्रतुं पुनीष उक्थ्यम् ।
4 1 2 12 01 b विदे वृधस्य दक्षस्य महाꣳ हि षः ॥ ७४६

4 1 2 12 02 a स प्रथमे व्योमनि देवानाꣳ सदने वृधः ।
4 1 2 12 02 b सुपारः सुश्रवस्तमः समप्सुजित् ॥ ७४७
4 1 2 12 03 a तमु हुवे वाजसातय इन्द्रं भराय शुष्मिणम् ।
4 1 2 12 03 b भवा नः सुम्ने अन्तमः सखा वृधे ॥ ७४८

[धा. १५ । उ. ना । स्व. २ । वा ॥]

सूक्त १३

4 1 2 13 01 a एना वो अग्निं नमसोर्जो नपातमा हुवे ।
4 1 2 13 01 b प्रियं चेतिष्ठमरतिꣳ स्वध्वरं विश्वस्य दूतममृतम् ॥ ७४९
4 1 2 13 02 a स योजते अरुषा विश्वभोजसा स दुद्रवत्स्वाहुतः ।
4 1 2 13 02 b सुब्रह्मा यज्ञः सुशमी वसूनां देवꣳ राधो जनानाम् ॥ ७५०

[धा. १४ । उ. १ । स्व. ५ । तु ॥]

सूक्त १४

4 1 2 14 01 a प्रत्यु अदर्श्यायत्यू३च्छन्ती दुहिता दिवः ।
4 1 2 14 01 b अपो मही वृणुते चक्षुषा तमो ज्योतिष्कृणोति सूनरी ॥ ७५१
4 1 2 14 02 a उदुस्रियाः सृजते सूर्यः सचा उद्यन्नक्षत्रमर्चिवत् ।
4 1 2 14 02 b तवेदुषो व्युषि सूर्यस्य च सं भक्तेन गमेमहि ॥ ७५२

सूक्त १५

4 1 2 15 01 a इमा उ वां दिविष्टय उस्रा हवन्ते अश्विना ।
4 1 2 15 01 b अयं वामह्वेऽवसे शचीवसू विशंविशꣳ हि गच्छथः ॥ ७५३
4 1 2 15 02 a युवं चित्रं ददथुर्भोजनं नरा चोदेथाꣳ सूनृतावते ।
4 1 2 15 02 b अर्वाग्रथꣳ समनसा नि यच्छतं पिबतꣳ सोम्यं मधु ॥ ७५४

सूक्त १६

4 1 2 16 01 a अस्य प्रत्नामनु द्युतꣳ शुक्रं दुदुह्रे अह्रयः ।
4 1 2 16 01 b पयः सहस्रसामृषिम् ॥ ७५५
4 1 2 16 02 a अयꣳ सूर्य इवोपदृगयꣳ सराꣳसि धावति ।
4 1 2 16 02 b सप्त प्रवत आ दिवम् ॥ ७५६
4 1 2 16 03 a अयं विश्वानि तिष्ठति पुनानो भुवनोपरि ।
4 1 2 16 03 b सोमो देवो न सूर्यः ॥ ७५७

सूक्त १७

4 1 2 17 01 a एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः ।

4 1 2 17 01 b हरिः पवित्रे अर्षति ॥ ७५८
4 1 2 17 02 a एष प्रत्नेन मन्मना देवो देवेभ्यस्परि ।
4 1 2 17 02 b कविर्विप्रेण वावृधे ॥ ७५९
4 1 2 17 03 a दुहानः प्रत्नमित्पयः पवित्रे परि षिच्यसे ।
4 1 2 17 03 b क्रन्दं देवाँ अजीजनः ॥ ७६०

सूक्त १८

4 1 2 18 01 a उप शिक्षापतस्थुषो भियसमा धेहि शत्रवे ।
4 1 2 18 01 b पवमान विदा रयिम् ॥ ७६१
4 1 2 18 02 a उषो षु जातमप्तुरं गोभिर्भङ्गं परिष्कृतम् ।
4 1 2 18 02 b इन्दुं देवा अयासिषुः ॥ ७६२
4 1 2 18 03 a उपास्मै गायता नरः पवमानायेन्दवे ।
4 1 2 18 03 b अभि देवाँ इयक्षते ॥ ७६३

सूक्त १९

4 1 2 19 01 a प्र सोमासो विपश्चितोऽपो नयन्त ऊर्मयः ।
4 1 2 19 01 b वनानि महिषा इव ॥ ७६४
4 1 2 19 02 a अभि द्रोणानि बभ्रवः शुक्रा ऋतस्य धारया ।
4 1 2 19 02 b वाजं गोमन्तमक्षरन् ॥ ७६५
4 1 2 19 03 a सुता इन्द्राय वायवे वरुणाय मरुद्भ्यः ।
4 1 2 19 03 b सोमा अर्षन्तु विष्णवे ॥ ७६६

सूक्त २०

4 1 2 20 01 a प्र सोम देववीतये सिन्धुर्न पिप्ये अर्णसा ।
4 1 2 20 01 b अꣳशोः पयसा मदिरो न जागृविरच्छा कोशं मधुश्चुतम् ॥ ७६७
4 1 2 20 02 a आ हर्यतो अर्जुनो अत्के अव्यत प्रियः सूनुर्न मर्ज्यः ।
4 1 2 20 02 b तमीँ हिन्वन्त्यपसो यथा रथं नदीष्वा गभस्त्योः ॥ ७६८

सूक्त २१

4 1 2 21 01 a प्र सोमासो मदच्युतः श्रवसे नो मघोनाम् ।
4 1 2 21 01 b सुता विदथे अक्रमुः ॥ ७६९
4 1 2 21 02 a आदीँ हꣳसो यथा गणं विश्वस्यावीवशन्मतिम् ।
4 1 2 21 02 b अत्यो न गोभिरज्यते ॥ ७७०
4 1 2 21 03 a आदीं त्रितस्य योषणो हरिँ हिन्वन्त्यद्रिभिः ।
4 1 2 21 03 b इन्दुमिन्द्राय पीतये ॥ ७७१

सूक्त २२

4 1 2 22 01 a अया पवस्व देवयु रेभन्पवित्रं पर्येषि विश्वतः ।
4 1 2 22 01 b मधोर्धारा असृक्षत ॥ ७७२
4 1 2 22 02 a पवते हर्यतो हरिरति ह्वरांꣳसि रꣳह्या ।
4 1 2 22 02 b अभ्यर्ष स्तोतृभ्यो वीरवद्यशः ॥ ७७३
4 1 2 22 03 a प्र सुन्वानास्यान्धसो मर्तो न वष्ट तद्वचः ।
4 1 2 22 03 b अप श्वानमराधसꣳ हता मखं न भृगवः ॥ ७७४

इति प्रथमप्रपाठके द्वितीयोऽर्धः ॥

इति प्रथमः प्रपाठकश्च समाप्तः ॥

द्वितीय प्रपाठकः । प्रथमोऽर्धः

सूक्त १

4 2 1 01 01 a पवस्व वाचो अग्रियः सोम चित्राभिरूतिभिः ।
4 2 1 01 01 b अभि विश्वानि काव्या ॥ ७७५
4 2 1 01 02 a त्वꣳ समुद्रिया अपोऽग्रियो वाच ईरयन् ।
4 2 1 01 02 b पवस्व विश्वचर्षणे ॥ ७७६
4 2 1 01 03 a तुभ्येमा भुवना कवे महिम्ने सोम तस्थिरे ।
4 2 1 01 03 b तुभ्यं धावन्ति धेनवः ॥ ७७७

सूक्त २

4 2 1 02 01 a पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने ।
4 2 1 02 01 b विश्वा अप द्विषो जहि ॥ ७७८
4 2 1 02 02 a यस्य ते सख्ये वयꣳ सासह्याम पृतन्यतः ।
4 2 1 02 02 b तवेन्दो द्युम्न उत्तमे ॥ ७७९
4 2 1 02 03 a या ते भीमान्यायुधा तिग्मानि सन्ति धूर्वणे ।
4 2 1 02 03 b रक्षा समस्य नो निदः ॥ ७८०

सूक्त ३

4 2 1 03 01 a वृषा सोम द्युमाꣳ असि वृषा देव वृषव्रतः ।
4 2 1 03 01 b वृषा धर्माणि दध्रिषे ॥ ७८१
4 2 1 03 02 a वृष्णस्ते वृष्ण्यꣳ शवो वृषा वनं वृषा सुतः ।
4 2 1 03 02 b स त्वं वृषन्वृषेदसि ॥ ७८२

4 2 1 03 03 a अश्वो न चक्रदो वृषा सं गा इन्दो समर्वतः ।
4 2 1 03 03 b वि नो राये दुरो वृधि ॥ ७८३

सूक्त ४

4 2 1 04 01 a वृषा ह्यसि भानुना द्युमन्तं त्वा हवामहे ।
4 2 1 04 01 b पवमान स्वर्दृशम् ॥ ७८४
4 2 1 04 02 a यदद्भिः परिशिच्यसे मर्मृज्यमान आयुभिः ।
4 2 1 04 02 b द्रोणे सधस्थमश्नुषे ॥ ७८५
4 2 1 04 03 a आ पवस्व सुवीर्यं मन्दमानः स्वायुध ।
4 2 1 04 03 b इहो ष्विन्दवा गहि ॥ ७८६

सूक्त ५

4 2 1 05 01 a पवमानस्य ते वयं पवित्रमभ्युन्दतः ।
4 2 1 05 01 b सखित्वमा वृणीमहे ॥ ७८७
4 2 1 05 02 a ये ते पवित्रमूर्मयोऽभिक्षरन्ति धारया ।
4 2 1 05 02 b तेभिर्नः सोम मृडय ॥ ७८८
4 2 1 05 03 a स नः पुनान आ भर रयिं वीरवतीमिषम्
4 2 1 05 03 b ईशानः सोम विश्वतः ॥ ७८९

सूक्त ६

4 2 1 06 01 a अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् ।
4 2 1 06 01 b अस्य यज्ञस्य सुक्रतुम् ॥ ७९०
4 2 1 06 02 a अग्निमग्निꣳ हवीमभिः सदा हवन्त विश्पतिम् ।
4 2 1 06 02 b हव्यवाहं पुरुप्रियम् ॥ ७९१
4 2 1 06 03 a अग्ने देवाꣳ इहा वह जज्ञानो वृक्तबर्हिषे ।
4 2 1 06 03 b असि होता न ईड्यः ॥ ७९२

सूक्त ७

4 2 1 07 01 a मित्रं वयꣳ हवामहे वरुणꣳ सोमपीतये ।
4 2 1 07 01 b य जाता पूतदक्षसा ॥ ७९३
4 2 1 07 02 a ऋतेन यावृतावृधावृतस्य ज्योतिषस्पती ।
4 2 1 07 02 b ता मित्रावरुणा हुवे ॥ ७९४
4 2 1 07 03 a वरुणः प्राविता भुवन्मित्रो विश्वाभिरूतिभिः ।
4 2 1 07 03 b करतां नः सुराधसः ॥ ७९५

सूक्त ८

4 2 1 08 01 a इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः ।
4 2 1 08 01 b इन्द्रं वाणीरनूषत ॥ ७९६
4 2 1 08 02 a इन्द्र इद्धर्योः सचा सम्मिश्ल आ वचोयुजा ।
4 2 1 08 02 b इन्द्रो वज्री हिरण्ययः ॥ ७९७
4 2 1 08 03 a इन्द्र वाजेषु नोऽव सहस्रप्रधनेषु च ।
4 2 1 08 03 b उग्र उग्राभिरूतिभिः ॥ ७९८
4 2 1 08 04 a इन्द्रो दीर्घाय चक्षस आ सूर्यꣳ रोहयद्दिवि ।
4 2 1 08 04 b वि गोभिरद्रिमैरयत् ॥ ७९९

सूक्त ९

4 2 1 09 01 a इन्द्रे अग्ना नमो बृहत्सुवृक्तिमेरयामहे ।
4 2 1 09 01 b धिया धेना अवस्यवः ॥ ८००
4 2 1 09 02 a ता हि शश्वन्त ईडत इत्था विप्रास ऊतये ।
4 2 1 09 02 b सबाधो वाजसातये ॥ ८०१
4 2 1 09 03 a ता वां गीर्भिर्विपन्युवः प्रयस्वन्तो हवामहे ।
4 2 1 09 03 b मेधसाता सनिष्यवः ॥ ८०२

सूक्त १०

4 2 1 10 01 a वृषा पवस्व धारया मरुत्वते च मत्सरः ।
4 2 1 10 01 b दिश्वा दधान ओजसा ॥ ८०३
4 2 1 10 02 a तं त्वा धर्त्तारमोण्यो३ः पवमान स्वर्दृशम् ।
4 2 1 10 02 b हिन्वे वाजेषु वाजिनम् ॥ ८०४
4 2 1 10 03 a अया चित्तो विपानया हरिः पवस्व धारया ।
4 2 1 10 03 b युजं वाजेषु चोदय ॥ ८०५

सूक्त ११

4 2 1 11 01 a वृषा शोणो अभिकनिक्रदद्गा नदयन्नेषि पृथिवीमुत द्याम् ।
4 2 1 11 01 b इन्द्रस्येव वग्नुरा शृण्व आजौ प्रचोदयन्नर्षसि वाचमेमाम् ॥ ८०६
4 2 1 11 02 a रसाय्यः पयसा पिन्वमान ईरयन्नेषि मधुमन्तमꣳशुम् ।
4 2 1 11 02 b पवमान सन्तनिमेषि कृण्वन्निन्द्राय सोम परिषिच्यमानः ॥ ८०७
4 2 1 11 03 a एवा पवस्व मदिरो मदायोदग्राभस्य नमयन्वधस्नुम् ।
4 2 1 11 03 b परि वर्णं भरमाणो रुशन्तं गव्युर्नो अर्ष परि सोम सिक्तः ॥ ८०८

सूक्त १२

4 2 1 12 01 a त्वामिद्धि हवामहे सातौ वाजस्य कारवः ।
4 2 1 12 01 b त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥ ८०९
4 2 1 12 02 a स त्वं नश्चित्र वज्रहस्त धृष्णुया मह स्तवानो अद्रिवः ।
4 2 1 12 02 b गामश्वꣳ रथ्यमिन्द्र सं किर सत्रा वाजं न जिग्युषे ॥ ८१०

सूक्त १३

4 2 1 13 01 a अभि प्र वः सुराधसमिन्द्रमर्च यथा विदे ।
4 2 1 13 01 b यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति ॥ ८११
4 2 1 13 02 a शतानीकेव प्र जिगाति धृष्णुया हन्ति वृत्राणि दाशुषे ।
4 2 1 13 02 b गिरेरिव प्र रसा अस्य पिन्विरे दत्राणि पुरुभोजसः ॥ ८१२

सूक्त १४

4 2 1 14 01 a त्वामिदा ह्यो नरोऽपीप्यन्वज्रिन्भूर्णयः ।
4 2 1 14 01 b स इन्द्र स्तोमवाहस इह श्रुध्युप स्वसरमा गहि ॥ ८१३
4 2 1 14 02 a मत्स्वा सुशिप्रिन्हरिवस्तमीमहे त्वया भूषन्ति वेधसः ।
4 2 1 14 02 b तव श्रवाꣳस्युपमान्युक्थ्य सुतेष्विन्द्र गिर्वणः ॥ ८१४

सूक्त १५

4 2 1 15 01 a यस्ते मदो वरेण्यस्तेना पवस्वान्धसा ।
4 2 1 15 01 b देवावीरघशꣳसहा ॥ ८१५
4 2 1 15 02 a जघ्निर्वृत्रममित्रियꣳ सस्निर्वाजं दिवेदिवे ।
4 2 1 15 02 b गोषातिरश्वसा असि ॥ ८१६
4 2 1 15 03 a सम्मिश्लो अरुषो भुवः सूपस्थाभिर्न धेनुभि ।
4 2 1 15 03 b सीदं च्छ्येनो न योनिमा ॥ ८१७

सूक्त १६

4 2 1 16 01 a अयं पूषा रयिर्भगः सोमः पुनानो अर्षति ।
4 2 1 16 01 b पतिर्विश्वस्य भूमनो व्यख्यद्रोदसी उभे ॥ ८१८
4 2 1 16 02 a समु प्रिया अनूषत गावो मदाय घृष्वयः ।
4 2 1 16 02 b सोमासः कृण्वते पथः पवमानास इन्दवः ॥ ८१९
4 2 1 16 03 a य ओजिष्ठस्तमा भर पवमान श्रवाय्यम् ।
4 2 1 16 03 b यः पञ्च चर्षणीरभि रयिं येन वनामहे ॥ ८२०

सूक्त १७

4 2 1 17 01 a वृषा मतीनां पवते विचक्षणः सोमो अह्नां प्रतरीतोषसां दिवः ।

4 2 1 17 01 b प्राणा सिन्धूनां कलशाꣳ अचिक्रददिन्द्रस्य हार्द्याविशन्मनीषिभिः ॥ ८२१
4 2 1 17 02 a मनीषिभिः पवते पूर्व्यः कविर्नृभिर्यतः परि कोशाꣳ असिष्यदत् ।
4 2 1 17 02 b त्रितस्य नाम जनयन्मधु क्षरन्निन्द्रस्य वायूꣳ सख्याय वर्धयन् ॥ ८२२
4 2 1 17 03 a अयं पुनान उषसो अरोचयदयꣳ सिन्धुभ्यो अभवदु लोककृत् ।
4 2 1 17 03 b अयं त्रिः सप्त दुदुहान आशिरꣳ सोमो हृदे पवते चारु मत्सरः ॥ ८२३

सूक्त १८

4 2 1 18 01 a एवा ह्यसि वीरयुरेवा शूर उत स्थिरह ।
4 2 1 18 01 b एवा ते राध्यं मनः ॥ ८२४
4 2 1 18 02 a एवा रातिस्तुवीमघ विश्वेभिर्धायि धातृभिः ।
4 2 1 18 02 b अधा चिदिन्द्र नः सचा ॥ ८२५
4 2 1 18 03 a मो षु ब्रह्मेव तदिन्द्रयुर्भुवो वाजानां पते ।
4 2 1 18 03 b मत्स्वा सुतस्य गोमतः ॥ ८२६

सूक्त १९

4 2 1 19 01 a इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः ।
4 2 1 19 01 b रथीतमꣳ रथीनां वाजानाꣳ सत्पतिं पतिम् ॥ ८२७
4 2 1 19 02 a सख्ये त इन्द्र वाजिनो मा भेम शवसस्पते ।
4 2 1 19 02 b त्वामभि प्र नोनुमो जेतारमपराजितम् ॥ ८२८
4 2 1 19 03 a पूर्वीरिन्द्रस्य रातयो न वि दस्यन्त्यूतयः ।
4 2 1 19 03 b यदा वाजस्य गोमत स्तोतृभ्यो मꣳहते मघम् ॥ ८२९

इति द्वितीयप्रपाठके प्रथमोऽर्धः ॥

द्वितीय प्रपाठकः । द्वितीयोऽर्धः

सूक्त १

4 2 2 01 01 a एत असृग्रमिन्दवस्तिरः पवित्रमाशवः ।
4 2 2 01 01 b विश्वान्यभि सौभगा ॥ ८३०
4 2 2 01 02 a विघ्नन्तो दुरिता पुरु सुगा तोकाय वाजिनः ।
4 2 2 01 02 b त्मना कृण्वन्तो अर्वतः ॥ ८३१
4 2 2 01 03 a कृण्वन्तो वरिवो गवेऽभ्यर्षन्ति सुष्टुतिम् ।
4 2 2 01 03 b इडामस्मभ्यꣳ संयतम् ॥ ८३२

सूक्त २

4 2 2 02 01 a राजा मेधाभिरीयते पवमानो मनावधि ।

4 2 2 02 01 b अन्तरिक्षेण यातवे ॥ ८३३
4 2 2 02 02 a आ नः सोम सहो जुवो रूपं न वर्चसे भर ।
4 2 2 02 02 b सुष्वाणो देववीतये ॥ ८३४
4 2 2 02 03 a आ न इन्दो शतग्विनं गवां पोषꣳ स्वश्व्यम् ।
4 2 2 02 03 b वहा भगत्तिमूतये ॥ ८३५

सूक्त ३

4 2 2 03 01 a तं त्वा नृम्णानि बिभ्रतꣳ सधस्थेषु महो दिवः ।
4 2 2 03 01 b चारुꣳ सुकृत्ययेमहे ॥ ८३६
4 2 2 03 02 a संवृक्तधृष्णुमुक्थ्यं महामहिव्रतं मदम् ।
4 2 2 03 02 b शतं पुरो रुरुक्षणिम् ॥ ८३७
4 2 2 03 03 a अतस्त्वा रयिरभ्ययद्राजानꣳ सुक्रतो दिवः ।
4 2 2 03 03 b सुपर्णो अव्यथी भरत् ॥ ८३८
4 2 2 03 04 a अधा हिन्वान इन्द्रियं ज्यायो महित्वमानशे ।
4 2 2 03 04 b अभिष्टिकृद्विचर्षणिः ॥ ८३९
4 2 2 03 05 a विश्वस्मा इत्स्वर्दृशे साधारणꣳ रजस्तुरम् ।
4 2 2 03 05 b गोपामृतस्य विर्भरत् ॥ ८४०

सूक्त ४

4 2 2 04 01 a इषे पवस्व धारया मृज्यमानो मनीषिभिः ।
4 2 2 04 01 b इन्दो रुचाभि गा इहि ॥ ८४१
4 2 2 04 02 a पुनानो वरिवस्कृध्यूर्जं जनाय गिर्वणः ।
4 2 2 04 02 b हरे सृजान आशिरम् ॥ ८४२
4 2 2 04 03 a पुनानो देववीतय इन्द्रस्य याहि निष्कृतम् ।
4 2 2 04 03 b द्युतानो वाजिभिर्हितः ॥ ८४३

सूक्त ५

4 2 2 05 01 a अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा ।
4 2 2 05 01 b हव्यवाड्जुह्वास्यः ॥ ८४४
4 2 2 05 02 a यस्त्वामग्ने हविष्पतिर्दूतं देव सपर्यति ।
4 2 2 05 02 b तस्य स्म प्राविता भव ॥ ८४५
4 2 2 05 03 a यो अग्निं देववीतये हविष्माꣳ आविवासति ।
4 2 2 05 03 b तस्मै पावक मृडय ॥ ८४६

सूक्त ६

4 2 2 06 01 a मित्रꣳ हुवे पूतदक्षं वरुणं च रिशादसम् ।

4 2 2 06 01 b धियं घृताचीꣳ साधन्ता ॥ ८४७
4 2 2 06 02 a ऋतेन मित्रावरुणावृतावृधावृतस्पृशा ।
4 2 2 06 02 b क्रतुं बृहन्तमाशाथे ॥ ८४८
4 2 2 06 03 a कवी नो मित्रावरुणा तुविजाता उरुक्षया ।
4 2 2 06 03 b दक्षं दधाते अपसम् ॥ ८४९

सूक्त ७

4 2 2 07 01 a इन्द्रेण सꣳ हि दृक्षसे संजग्मानो अबिभ्युषा ।
4 2 2 07 01 b मन्दू समानवर्च्चसा ॥ ८५०
4 2 2 07 02 a आदह स्वधामनु पुनर्गर्भत्वमेरिरे ।
4 2 2 07 02 b दधाना नाम यज्ञियम् ॥ ८५१
4 2 2 07 03 a वीडु चिदारुजत्नुभिर्गुहा चिदिन्द्र वह्निभिः ।
4 2 2 07 03 b अविन्द उस्रिया अनु ॥ ८५२

सूक्त ८

4 2 2 08 01 a ता हुवे ययोरिदं पप्ने विश्वं पुरा कृतम् ।
4 2 2 08 01 b इन्द्राग्नी न मर्धतः ॥ ८५३
4 2 2 08 02 a उग्रा विघनिना मृध इन्द्राग्नी हवामहे ।
4 2 2 08 02 b ता नो मृडात ईदृशे ॥ ८५४
4 2 2 08 03 a हथो वृत्राण्यार्या हथो दासानि सत्पती ।
4 2 2 08 03 b हथो विश्वा अप द्विषः ॥ ८५५

सूक्त ९

4 2 2 09 01 a अभि सोमास आयवः पवन्ते मद्यं मदम् ।
4 2 2 09 01 b समुद्रस्याधि विष्टपे मनीषिणो मत्सरासो मदच्युतः ॥ ८५६
4 2 2 09 02 a तरत्समुद्रं पवमान ऊर्मिणा राजा देव ऋतं बृहत् ।
4 2 2 09 02 b अर्षा मित्रस्य वरुणस्य धर्मणा प्र हिन्वान ऋतं बृहत् ॥ ८५७
4 2 2 09 03 a नृभिर्येमाणो हर्यतो विचक्षणो राजा देवः समुद्र्यः ॥ ८५८

सूक्त १०

4 2 2 10 01 a तिस्रो वाच ईरयति प्र वह्निर्ऋतस्य धीतिं ब्रह्मणो मनीषाम् ।
4 2 2 10 01 b गावो यन्ति गोपतिं पृच्छमानाः सोमं यन्ति मतयो वावशानाः ॥ ८५९
4 2 2 10 02 a सोमं गावो धेनवो वावशानाः सोमं विप्रा मतिभिः पृच्छमानाः ।
4 2 2 10 02 b सोमः सुत ऋच्यते पूयमानः सोमे अर्कास्त्रिष्टुभः सं नवन्ते ॥ ८६०
4 2 2 10 03 a एवा नः सोम परिषिच्यमान आ पवस्व पूयमानः स्वस्ति ।
4 2 2 10 03 b इन्द्रमा विश बृहता मदेन वर्धया वाचं जनया पुरन्धिम् ॥ ८६१

सूक्त ११

4 2 2 11 01 a यद्द्याव इन्द्र ते शतꣳशतं भूमीरुत स्युः ।
4 2 2 11 01 b न त्वा वज्रिन्त्सहस्रꣳ सुर्या अनु न जातमष्ट रोदसी ॥ ८६२
4 2 2 11 02 a आ पप्राथ महिना वृष्ण्या वृषन्विश्वा शविष्ठ शवसा ।
4 2 2 11 02 b अस्माꣳ अव मघवन्गोमति व्रजे वज्रिञ्चित्राभिरूतिभिः ॥ ८६३

सूक्त १२

4 2 2 12 01 a वयं घ त्वा सुतावन्त आपो न वृक्तबर्हिषः ।
4 2 2 12 01 b पवित्रस्य प्रस्रवणेषु वृत्रहन्परि स्तोतार आसते ॥ ८६४
4 2 2 12 02 a स्वरन्ति त्वा सुते नरो वसो निरेक उक्थिनः ।
4 2 2 12 02 b कदा सुतं तृषाण ओक आ गम इन्द्र स्वब्दीव वꣳसगः ॥ ८६५
4 2 2 12 03 a कण्वेभिर्धृष्णवा धृषद्वाजं दर्षि सहस्रिणम् ।
4 2 2 12 03 b पिशङ्गरूपं मघवन्विचर्षणे मक्षू गोमन्तमीमहे ॥ ८६६

सूक्त १३

4 2 2 13 01 a तरणिरित्सिषासति वाजं पुरन्ध्या युजा ।
4 2 2 13 01 b आ व इन्द्रं पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्रुवम् ॥ ८६७
4 2 2 13 02 a न दुष्टुतिर्द्रविणोदेषु शस्यते न स्रेधन्तꣳ रयिर्नशत् ।
4 2 2 13 02 b सुशक्तिरिन्मघवं तुभ्यं मावते देष्णं यत्पार्ये दिवि ॥ ८६८

सूक्त १४

4 2 2 14 01 a तिस्रो वाच उदीरते गावो मिमन्ति धेनवः ।
4 2 2 14 01 b हरिरेति कनिक्रदत् ॥ ८६९
4 2 2 14 02 a अभि ब्रह्मीरनूषत यह्वीर्ऋतस्य मातरः ।
4 2 2 14 02 b मर्जयन्तीर्दिवः शिशुम् ॥ ८७०
4 2 2 14 03 a रायः समुद्राꣳश्चतुरोऽस्मभ्यꣳ सोम विश्वतः ।
4 2 2 14 03 b आ पवस्व सहस्रिणः ॥ ८७१

सूक्त १५

4 2 2 15 01 a सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः ।
4 2 2 15 01 b पवित्रवन्तो अक्षरं देवान्गच्छन्तु वो मदाः ॥ ८७२
4 2 2 15 02 a इन्दुरिन्द्राय पवत इति देवासो अब्रुवन् ।
4 2 2 15 02 b वाचस्पतिर्मखस्यते विश्वस्येशान ओजसाः ॥ ८७३
4 2 2 15 03 a सहस्रधारः पवते समुद्रो वाचमीङ्खयः ।

4 2 2 15 03 b सोमस्पती रयीणाꣳ सखेन्द्रस्य दिवेदिवे ॥ ८७४

सूक्त १६

4 2 2 16 01 a पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ।
4 2 2 16 01 b अतप्ततनूर्न तदामो अश्नुते शृतास इद्वहन्तः सं तदाशत ॥ ८७५
4 2 2 16 02 a तपोष्पवित्रं विततं दिवस्पदेऽर्चन्तो अस्य तन्तवो व्यस्थिरन् ।
4 2 2 16 02 b अवन्त्यस्य पवीतारमाशवो दिवः पृष्ठमधि रोहन्ति तेजसा ॥ ८७६
4 2 2 16 03 a अरूरुचदुषसः पृश्निरग्रिय उक्षा मिमेति भुवनेषु वाजयुः ।
4 2 2 16 03 b मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमा दधुः ॥ ८७७

सूक्त १७

4 2 2 17 01 a प्र मꣳहिष्ठाय गायत ऋताव्ने बृहते शुक्रशोचिषे ।
4 2 2 17 01 b उपस्तुतासो अग्नये ॥ ८७८
4 2 2 17 02 a आ वꣳसते मघवा वीरवद्यशः समिद्धो द्युम्न्याहुतः ।
4 2 2 17 02 b कुविन्नो अस्य सुमतिर्भवीयस्यच्छा वाजेभिरागमत् ॥ ८७९

सूक्त १८

4 2 2 18 01 a तं ते मदं गृणीमसि वृषणं पृक्षु सासहिम् ।
4 2 2 18 01 b उ लोककृत्नुमद्रिवो हरिश्रियम् ॥ ८८०
4 2 2 18 02 a येन ज्योतीꣳष्यायवे मनवे च विवेदिथ ।
4 2 2 18 02 b मन्दानो अस्य बर्हिषो वि राजसि ॥ ८८१
4 2 2 18 03 a तदद्या चित्त उक्थिनोऽनु ष्टुवन्ति पूर्वथा ।
4 2 2 18 03 b वृषपत्नीरपो जया दिवेदिवे ॥ ८८२

सूक्त १९

4 2 2 19 01 a श्रुधी हवं तिरश्च्या इन्द्र यस्त्वा सपर्यति ।
4 2 2 19 01 b सुवीर्यस्य गोमतो रायस्पूर्धि महाꣳ असि ॥ ८८३
4 2 2 19 02 a यस्त इन्द्र नवीयसीं गिरं मन्द्रामजीजनत् ।
4 2 2 19 02 b चिकित्विन्मनसं धियं प्रत्नामृतस्य पिप्युषीम् ॥ ८८४
4 2 2 19 03 a तमु ष्टवाम यं गिर इन्द्रमुक्थानि वावृधुः ।
4 2 2 19 03 b पुरूण्यस्य नौꣳस्या सिषासन्तो वनामहे ॥ ८८५

इति द्वितीयप्रपाठक द्वितीयोऽर्धः ॥

इति द्वितीयः प्रपाठकश्च समाप्तः ॥

तृतीय प्रपाठकः । प्रथमोऽर्धः

सूक्त १

4 3 1 01 01 a प्र त आश्विनीः पवमान धेनवो दिव्या असृग्रन्पयसा धरीमणि ।
4 3 1 01 01 b प्रान्तरिक्षात्स्थाविरीस्ते असृक्षत ये त्वा मृजन्त्यृषिषाण वेधसः ॥ ८८६
4 3 1 01 02 a उभयतः पवमानस्य रश्मयो ध्रुवस्य सतः परि यन्ति केतवः ।
4 3 1 01 02 b यदी पवित्रे अधि मृज्यते हरिः सत्ता नि योनौ कलशेषु सीदति ॥ ८८७
4 3 1 01 03 a विश्वा धामानि विश्वचक्ष ऋभ्वसः प्रभोष्टे सतः परि यन्ति केतवः ।
4 3 1 01 03 b व्यानशी पवसे सोम धर्मणा पतिर्विश्वस्य भुवनस्य राजसि ॥ ८८८

सूक्त २

4 3 1 02 01 a पवमानो अजीजनद्दिवश्चित्रं न तन्यतुम् ।
4 3 1 02 01 b ज्योतिर्वैश्वानरं बृहत् ॥ ८८९
4 3 1 02 02 a पवमान रसस्तव मदो राजन्नदुच्छुनः ।
4 3 1 02 02 b वि वारमव्यमर्षति ॥ ८९०
4 3 1 02 03 a पवमानस्य ते रसो दक्षो वि राजति द्युमान् ।
4 3 1 02 03 b ज्योतिर्विश्वꣳ स्वर्दृशे ॥ ८९१

सूक्त ३

4 3 1 03 01 a प्र यद्गावो न भूर्णयस्त्वेषा अयासो अक्रमुः ।
4 3 1 03 01 b घ्नन्तः कृष्णामप त्वचम् ॥ ८९२
4 3 1 03 02 a सुवितस्य मनामहेऽति सेतुं दुराय्यम् ।
4 3 1 03 02 b साह्याम दस्युमव्रतम् ॥ ८९३
4 3 1 03 03 a शृण्वे वृष्टेरिव स्वनः पवमानस्य शुष्मिणः ।
4 3 1 03 03 b चरन्ति विद्युतो दिवि ॥ ८९४
4 3 1 03 04 a आ पवस्व महीमिषं गोमदिन्दो हिरण्यवत् ।
4 3 1 03 04 b अश्ववत्सोम वीरवत् ॥ ८९५
4 3 1 03 05 a पवस्व विश्वचर्षण आ मही रोदसी पृण ।
4 3 1 03 05 b उषाः सूर्यो न रश्मिभिः ॥ ८९६
4 3 1 03 06 a परि नः शर्मयन्त्या धारया सोम विश्वतः ।
4 3 1 03 06 b सरा रसेव विष्टपम् ॥ ८९७

सूक्त ४

4 3 1 04 01 a आशुरर्ष बृहन्मते परि प्रियेण धाम्ना ।
4 3 1 04 01 b यत्र देवा इति ब्रुवन् ॥ ८९८
4 3 1 04 02 a परिष्कृण्वन्ननिष्कृतं जनाय यातयन्निषः ।

4 3 1 04 02 b वृष्टिं दिवः परि स्रव ॥ ८९९
4 3 1 04 03 a अयꣳ स यो दिवस्परि रघुयामा पवित्र आ ।
4 3 1 04 03 b सिन्धोरूर्मा व्यक्षरत् ॥ ९००
4 3 1 04 04 a सुत एति पवित्र आ त्विषिं दधान ओजसा ।
4 3 1 04 04 b विचक्षाणो विरोचयन् ॥ ९०१
4 3 1 04 05 a आविवासन्परावतो अथो अर्वावतः सुतः ।
4 3 1 04 05 b इन्द्राय सिच्यते मधु ॥ ९०२
4 3 1 04 00 a समीचीना अनूषत हरिꣳ हिन्वन्त्यद्रिभिः ।
4 3 1 04 00 b इन्दुमिन्द्राय पीतये ॥ ९०३

सूक्त ५

4 3 1 05 01 a हिन्वन्ति सूरमुस्रयः स्वसारो जामयस्पतिम् ।
4 3 1 05 01 b महामिन्दुं महीयुवः ॥ ९०४
4 3 1 05 02 a पवमान रुचारुचा देवो देवेभ्यः सुतः ।
4 3 1 05 02 b विश्वा वसून्या विश ॥ ९०५
4 3 1 05 03 a आ पवमान सुष्टुतिं वृष्टिं देवेभ्यो दुवः ।
4 3 1 05 03 b इषे पवस्व संयतम् ॥ ९०६

सूक्त ६

4 3 1 06 01 a जनस्य गोपा अजनिष्ट जागृविरग्निः सुदक्षः सुविताय नव्यसे ।
4 3 1 06 01 b घृतप्रतीको बृहता दिविस्पृषा द्युमद्वि भाति भरतेभ्यः शुचिः ॥ ९०७
4 3 1 06 02 a त्वामग्ने अङ्गिरसो गुहा हितमन्वविन्दञ्छिश्रियाणं वनेवने ।
4 3 1 06 02 b स जायसे मथ्यमानः सहो महत्वामाहुः सहसस्पुत्रमङ्गिरः ॥ ९०८
4 3 1 06 03 a यज्ञस्य केतुं प्रथमं पुरोहितमग्निं नरस्त्रिषधस्थे समिन्धते ।
4 3 1 06 03 b इन्द्रेण देवैः सरथꣳ स बर्हिषि सीदन्नि होता यजथाय सुक्रतुः ॥ ९०९

सूक्त ७

4 3 1 07 01 a अयं वां मित्रावरुणा सुतः सोम ऋतावृधा ।
4 3 1 07 01 b ममेदिह श्रुतꣳ हवम् ॥ ९१०
4 3 1 07 02 a राजानावनभिद्रुहा ध्रुवे सदस्युत्तमे ।
4 3 1 07 02 b सहस्रस्थूण आशाते ॥ ९११
4 3 1 07 03 a ता सम्राजा घृतासुती आदित्या दानुनस्पती ।
4 3 1 07 03 b सचेते अनवह्वरम् ॥ ९१२

सूक्त ८

4 3 1 08 01 a इन्द्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः ।

4 3 1 08 01 b जघान नवतीर्नव ॥ ९१३
4 3 1 08 02 a इच्छन्नश्वस्य यच्छिरः पर्वतेष्वपश्रितम् ।
4 3 1 08 02 b तद्विदच्छर्यणावति ॥ ९१४
4 3 1 08 03 a अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम् ।
4 3 1 08 03 b इत्था चन्द्रमसो गृहे ॥ ९१५

सूक्त ९

4 3 1 09 01 a इयं वामस्य मन्मन इन्द्राग्नी पूर्व्यस्तुतिः ।
4 3 1 09 01 b अभ्राद्वृष्टिरिवाजनि ॥ ९१६
4 3 1 09 02 a शृणुतं जरितुर्हवमिन्द्राग्नी वनतं गिरः ।
4 3 1 09 02 b ईशाना पिप्यतं धियः ॥ ९१७
4 3 1 09 03 a मा पापत्वाय नो नरेन्द्राग्नी माभिशस्तये ।
4 3 1 09 03 b मा नो रीरधतं निदे ॥ ९१८

सूक्त १०

4 3 1 10 01 a पवस्व दक्षसाधनो देवेभ्यः पीतये हरे ।
4 3 1 10 01 b मरुद्भयो वायवे मदः ॥ ९१९
4 3 1 10 02 a सं देवैः शोभते वृषा कविर्योनावधि प्रियः ।
4 3 1 10 02 b पवमानो अदाभ्यः ॥ ९२०
4 3 1 10 03 a पवमान धिया हितो३ऽभि योनिं कनिक्रदत् ।
4 3 1 10 03 b धर्मणा वायुमारुहः ॥ ९२१

सूक्त ११

4 3 1 11 01 a तवाहꣳ सोम रारण सख्य इन्दो दिवेदिवे ।
4 3 1 11 01 b पुरूणि बभ्रो नि चरन्ति मामव परिधीꣳ रति ताꣳइहि ॥ ९२२
4 3 1 11 02 a तवाहं नक्तमुत सोम ते दिवा दुहानो बभ्र ऊधनि ।
4 3 1 11 02 b घृणा तपन्तमति सूर्यं परः शकुना इव पप्तिम ॥ ९२३

सूक्त १२

4 3 1 12 01 a पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः ।
4 3 1 12 01 b शुम्भन्ति विप्रं धीतिभिः ॥ ९२४
4 3 1 12 02 a आ योनिमरुणो रुहद्गमदिन्द्रं वृषा सुतम् ।
4 3 1 12 02 b ध्रुवे सदसि सीदतु ॥ ९२५
4 3 1 12 03 a नू नो रयिं महामिन्दोऽस्मभ्यꣳ सोम विश्वतः ।
4 3 1 12 03 b आ पवस्व सहस्रिणम् ॥ ९२६

सूक्त १३

4 3 1 13 01 a पिबा सोममिन्द्र मदन्तु त्वा यं ते सुषाव हर्यश्वाद्रिः ।
4 3 1 13 01 b सोतुर्बाहुभ्या꣡ꣳ सुयतो नार्वा ॥ ९२७
4 3 1 13 02 a यस्ते मदो युज्यश्चारुरस्ति येन वृत्राणि हर्यश्व ह꣡ꣳसि ।
4 3 1 13 02 b स त्वामिन्द्र प्रभूवसो ममत्तु ॥ ९२८
4 3 1 13 03 a बोधा सु मे मघवन्वाचमेमां यां ते वसिष्ठो अर्चति प्रशस्तिम् ।
4 3 1 13 03 b इमा ब्रह्म सधमादे जुषस्व ॥ ९२९

सूक्त १४

4 3 1 14 01 a विश्वाः पृतना अभिभूतरं नरः सजूस्ततक्षुरिन्द्रं जजनुश्च राजसे ।
4 3 1 14 01 b क्रत्वे वरे स्थेमन्यामुरीमुतोग्रमोजिष्ठं तरसं तरस्विनम् ॥ ९३०
4 3 1 14 02 a नेमिं नमन्ति चक्षसा मेषं विप्रा अभिस्वरे ।
4 3 1 14 02 b सुदीतयो वो अद्रुहोऽपि कर्णे तरस्विनः समृक्वभिः ॥ ९३१
4 3 1 14 03 a समु रेभसो अस्वरन्निन्द्र꣡ꣳ सोमस्य पीतये ।
4 3 1 14 03 b स्वःपतिर्यदी वृधे धृतव्रतो ह्योजसा समूतिभिः ॥ ९३२

सूक्त १५

4 3 1 15 01 a यो राजा चर्षणीनां याता रथेभिरध्रिगुः ।
4 3 1 15 01 b विश्वासां तरुता पृतनानां ज्येष्ठं यो वृत्रहा गृणे ॥ ९३३
4 3 1 15 02 a इन्द्रं त꣡ꣳ शुम्भ्य पुरुहन्मन्नवसे यस्य द्विता विधर्त्तरि ।
4 3 1 15 02 b हस्तेन वज्रः प्रति धायि दर्शतो महां देवो न सूर्यः ॥ ९३४

सूक्त १६

4 3 1 16 01 a परि प्रिया दिवः कविर्वया꣡ꣳसि नप्त्योर्हितः ।
4 3 1 16 01 b स्वानैर्याति कविक्रतुः ॥ ९३५
4 3 1 16 02 a स सूनुर्मातरा शुचिर्जातो जाते अरोचयत् ।
4 3 1 16 02 b महान्मही ऋतावृधा ॥ ९३६
4 3 1 16 03 a प्रप्र क्षयाय पन्यसे जनाय जुष्टो अद्रुहः ।
4 3 1 16 03 b वीत्यर्ष पनिष्टये ॥ ९३७

सूक्त १७

4 3 1 17 01 a त्व꣡ꣳ ह्या३꣡ꣳङ्ग दैव्या पवमान जनिमानि द्युमत्तमः ।
4 3 1 17 01 b अमृतत्वाय घोषयन् ॥ ९३८
4 3 1 17 02 a येना नवग्वो दध्यङ्ङपोर्णुते येन विप्रास आपिरे ।
4 3 1 17 02 b देवाना꣡ꣳ सुम्ने अमृतस्य चारुणो येन श्रवा꣡ꣳस्याशत ॥ ९३९

सूक्त १८

4 3 1 18 01 a सोमः पुनान ऊर्मिणाव्यं वारं वि धावति ।
4 3 1 18 01 b अग्रे वाचः पवमानः कनिक्रदत् ॥ ९४०
4 3 1 18 02 a धीभिर्मृजन्ति वाजिनं वने क्रीडन्तमत्यविम् ।
4 3 1 18 02 b अभि त्रिपृष्ठं मतयः समस्वरन् ॥ ९४१
4 3 1 18 03 a असर्जि कलशाँ अभि मीढ्वान्त्सप्तिर्न वाजयुः ।
4 3 1 18 03 b पुनानो वाचं जनयन्नसिष्यदत् ॥ ९४२

सूक्त १९

4 3 1 19 01 a सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः ।
4 3 1 19 01 b जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ॥ ९४३
4 3 1 19 02 a ब्रह्मा देवानां पदवीः कवीनां ऋषिर्विप्राणां महिषोमृगाणाम् ।
4 3 1 19 02 b श्येनो गृध्राणाँ स्वधितिर्वनानाँ सोमः पवित्रमत्येति रेभन् ॥ ९४४
4 3 1 19 03 a प्रावीविपद्वाच ऊर्मिं न सिन्धुर्गिर स्तोमान्पवमानो मनीषाः ।
4 3 1 19 03 b अन्तः पश्यन्वृजनेमावराण्या तिष्ठति वृषभो गोषु जानन् ॥ ९४५

सूक्त २०

4 3 1 20 01 a अग्निं वो वृधन्तमध्वराणां पुरूतमम् ।
4 3 1 20 01 b अच्छा नप्त्रे सहस्वते ॥ ९४६
4 3 1 20 02 a अयं यथा न आभुवत्त्वष्टा रूपेव तक्ष्या ।
4 3 1 20 02 b अस्य क्रत्वा यशस्वतः ॥ ९४७
4 3 1 20 03 a अयं विश्वा अभि श्रियोऽग्निर्देवेषु पत्यते ।
4 3 1 20 03 b आ वाजैरुप नो गमत् ॥ ९४८

सूक्त २१

4 3 1 21 01 a इममिन्द्र सुतं पिब ज्येष्ठममर्त्यं मदम् ।
4 3 1 21 01 b शुक्रस्य त्वाभ्यक्षरन्धारा ऋतस्य सादने ॥ ९४९
4 3 1 21 02 a न किष्टवद्रथीतरो हरी यदिन्द्र यच्छसे ।
4 3 1 21 02 b न किष्टवानु मज्मना न किः स्वश्व आनशे ॥ ९५०
4 3 1 21 03 a इन्द्राय नूनमर्चतोक्थानि च ब्रवीतन ।
4 3 1 21 03 b सुता अमत्सुरिन्दवो ज्येष्ठं नमस्यता सहः ॥ ९५१

सूक्त २२

4 3 1 22 01 a इन्द्र जुषस्व प्र वहा याहि शूर हरिह ।

4 3 1 22 01 b पिबा सुतस्य मतिर्न मधोश्चकानश्चारुर्मदाय ॥ ९५२
4 3 1 22 02 a इन्द्र जठरं नव्यं न पृणस्व मधोर्दिवो न ।
4 3 1 22 02 b अस्य सुतस्य स्वा३र्नोप त्वा मदाः सुवाचो अस्थुः ॥ ९५३
4 3 1 22 03 a इन्द्रस्तुराषाण्मित्रो न जघान वृत्रं यतिर्न ।
4 3 1 22 03 b बिभेद वलं भृगुर्न ससाहे शत्रून्मदे सोमस्य ॥ ९५४

इति तृतीयप्रपाठके प्रथमोऽर्धः ॥

तृतीय प्रपाठकः । द्वितीयोऽर्धः

सूक्त १

4 3 2 01 01 a गोवित्पवस्व वसुविद्धिरण्यविद्रेतोधा इन्दो भुवनेष्वर्पितः ।
4 3 2 01 01 b त्वꣳ सुवीरो असि सोम विश्ववित्तं त्वा नर उप गिरेम आसते ॥ ९५५
4 3 2 01 02 a त्वं नृचक्षा असि सोम विश्वतः पवमान वृषभ ता वि धावसि ।
4 3 2 01 02 b स नः पवस्व वसुमद्धिरण्यवद्वयꣳ स्याम भुवनेषु जीवसे ॥ ९५६
4 3 2 01 03 a ईशान इमा भुवनानि ईयसे युजान इन्दो हरितः सुपर्ण्यः ।
4 3 2 01 03 b तास्ते क्षरन्तु मधुमद्घृतं पयस्तव व्रते सोम तिष्ठन्तु कृष्टयः ॥ ९५७

सूक्त २

4 3 2 02 01 a पवमानस्य विश्ववित्प्र ते सर्गा असृक्षत ।
4 3 2 02 01 b सूर्यस्येव न रश्मयः ॥ ९५८
4 3 2 02 02 a केतुं कृण्वं दिवस्परि विश्वा रूपाभ्यर्षसि ।
4 3 2 02 02 b समुद्रः सोम पिन्वसे ॥ ९५९
4 3 2 02 03 a जज्ञानो वाचमिष्यसि पवमान विधर्मणि ।
4 3 2 02 03 b क्रन्दं देवो न सूर्यः ॥ ९६०

सूक्त ३

4 3 2 03 01 a प्र सोमासो अधन्विषुः पवमानास इन्दवः ।
4 3 2 03 01 b श्रीणाना अप्सु वृञ्जते ॥ ९६१
4 3 2 03 02 a अभि गावो अधन्विषुरापो न प्रवता यतीः ।
4 3 2 03 02 b पुनाना इन्द्रमाशत ॥ ९६२
4 3 2 03 03 a प्र पवमान धन्वसि सोमेन्द्राय मादनः ।
4 3 2 03 03 b नृभिर्यतो वि नीयसे ॥ ९६३
4 3 2 03 04 a इन्दो यदद्रिभिः सुतः पवित्रं परिदीयसे ।
4 3 2 03 04 b अरमिन्द्रस्य धाम्ने ॥ ९६४
4 3 2 03 05 a त्वꣳ सोम नृमादनः पवस्व चर्षणीधृतिः ।
4 3 2 03 05 b सस्निर्यो अनुमाद्यः ॥ ९६५

4 3 2 03 06 a पवस्व वृत्रहन्तम उक्थेभिरनुमाद्यः ।
4 3 2 03 06 b शुचिः पावको अद्भुतः ॥ ९६६
4 3 2 03 07 a शुचिः पावक उच्यते सोमः सुतः स मधुमान् ।
4 3 2 03 07 b देवावीरघशꣳसहा ॥ ९६७

सूक्त ४

4 3 2 04 01 a प्र कविर्देववीतयेऽव्या वारेभिरव्यत ।
4 3 2 04 01 b साह्वान्विश्वा अभि स्पृधः ॥ ९६८
4 3 2 04 02 a स हि ष्मा जरितृभ्य आ वाजं गोमन्तमिन्वति ।
4 3 2 04 02 b पवमानः सहस्रिणम् ॥ ९६९
4 3 2 04 03 a परि विश्वानि चेतसा मृज्यसे पवसे मती ।
4 3 2 04 03 b स नः सोम श्रवो विदः ॥ ९७०
4 3 2 04 04 a अभ्यर्ष बृहद्यशो मघवद्भ्यो ध्रुवꣳ रयिम् ।
4 3 2 04 04 b इषꣳ स्तोतृभ्य आ भर ॥ ९७१
4 3 2 04 05 a त्वꣳ राजेव सुव्रतो गिरः सोमाविवेशिथ ।
4 3 2 04 05 b पुनानो वह्ने अद्भुत ॥ ९७२
4 3 2 04 06 a स वह्निरप्सु दुष्टरो मृज्यमानो गभस्त्योः ।
4 3 2 04 06 b सोमश्चमूषु सीदति ॥ ९७३
4 3 2 04 07 a क्रीडुर्मखो न मꣳहयुः पवित्रꣳ सोम गच्छसि ।
4 3 2 04 07 b दधत्स्तोत्रे सुवीर्यम् ॥ ९७४

सूक्त ५

4 3 2 05 01 a यवंयवं नो अन्धसा पुष्टंपुष्टं परि स्रव ।
4 3 2 05 01 b विश्वा च सोम सौभगा ॥ ९७५
4 3 2 05 02 a इन्दो यथा तव स्तवो यथा ते जातमन्धसः ।
4 3 2 05 02 b नि बर्हिषि प्रिये सदः ॥ ९७६
4 3 2 05 03 a उत नो गोविदश्ववित्पवस्व सोमान्धसा ।
4 3 2 05 03 b मक्षूतमेभिरहभिः ॥ ९७७
4 3 2 05 04 a यो जिनाति न जीयते हन्ति शत्रुमभीत्य ।
4 3 2 05 04 b स पवस्व सहस्रजित् ॥ ९७८

सूक्त ६

4 3 2 06 01 a यास्ते धारा मधुश्चुतोऽसृग्रमिन्द ऊतये ।
4 3 2 06 01 b ताभिः पवित्रमासदः ॥ ९७९
4 3 2 06 02 a सो अर्षेन्द्राय पीतये तिरो वाराण्यव्यया ।
4 3 2 06 02 b सीदन्नृतस्य योनिमा ॥ ९८०
4 3 2 06 03 a त्वꣳ सोम परि स्रव स्वादिष्ठो अङ्गिरोभ्यः ।

4 3 2 06 03 b वरिवोविद्भूतं पयः ॥ ९८१

सूक्त ७

4 3 2 07 01 a तव श्रियो वर्ष्यस्येव विद्युतोग्नेश्चिकित्र उषसामिवेतयः ।
4 3 2 07 01 b यदोषधीरभिसृष्टो वनानि च परि स्वयं चिनुषे अन्नमासनि ॥ ९८२
4 3 2 07 02 a वातोपजूत इषितो वशाँ अनु तृषु यदन्ना वेविषद्वितिष्ठसे ।
4 3 2 07 02 b आ ते यतन्ते रथ्यो३ यथा पृथक्शर्धाँस्यग्ने अजरस्य धक्षतः ॥ ९८३
4 3 2 07 03 a मेधाकारं विदथस्य प्रसाधनमग्निँ होतारं परिभूतरं मतिम् ।
4 3 2 07 03 b त्वामर्भस्य हविषः समानमित्तवां महो वृणते नान्यं त्वत् ॥ ९८४

सूक्त ८

4 3 2 08 01 a पुरूरुणा चिद्ध्यस्त्यवो नूनं वां वरुण ।
4 3 2 08 01 b मित्र वँसि वाँ सुमतिम् ॥ ९८५
4 3 2 08 02 a ता वाँ सम्यगद्रुह्वाणेषमश्याम धाम च ।
4 3 2 08 02 b वयं वां मित्रा स्याम ॥ ९८६
4 3 2 08 03 a पातं नो मित्रा पायुभिरुत त्रायेथाँ सुत्रात्रा ।
4 3 2 08 03 b साह्याम दस्यूं तनूभिः ॥ ९८७

सूक्त ९

4 3 2 09 01 a उत्तिष्ठन्नोजसा सह पीत्वा शिप्रे अवेपयः ।
4 3 2 09 01 b सोममिन्द्र चमूसुतम् ॥ ९८८
4 3 2 09 02 a अनु त्वा रोदसी उभे स्पर्धमानमददेताम् ।
4 3 2 09 02 b इन्द्र यद्दस्युहाभवः ॥ ९८९
4 3 2 09 03 a वाचमष्टापदीमहं नवस्रक्तिमृतावृधम् ।
4 3 2 09 03 b इन्द्रात्परितन्वं ममे ॥ ९९०

सूक्त १०

4 3 2 10 01 a इन्द्राग्नी युवामिमे३ऽभि स्तोमा अनूषत ।
4 3 2 10 01 b पिबतँ शम्भुवा सुतम् ॥ ९९१
4 3 2 10 02 a या वाँ सन्ति पुरुस्पृहो नियुतो दाशुषे नरा ।
4 3 2 10 02 b इन्द्राग्नी ताभिरा गतम् ॥ ९९२
4 3 2 10 03 a ताभिरा गच्छतं नरोपेदँ सवनँ सुतम् ।
4 3 2 10 03 b इन्द्राग्नी सोमपीतये ॥ ९९३

सूक्त ११

4 3 2 11 01 a अर्षा सोम द्युमत्तमोऽभि द्रोणानि रोरुवत् ।
4 3 2 11 01 b सीदन्योनौ योनेष्वा ॥ ९९४
4 3 2 11 02 a अप्सा इन्द्राय वायवे वरुणाय मरुद्भ्यः ।
4 3 2 11 02 b सोमा अर्षन्तु विष्णवे ॥ ९९५
4 3 2 11 03 a इषं तोकाय नो दधदस्मभ्यꣳ सोम विश्वतः ।
4 3 2 11 03 b आ पवस्व सहस्रिणम् ॥ ९९६

सूक्त १२

4 3 2 12 01 a सोम उ ष्वाणः सोतृभिरधि ष्णुभिरवीनाम् ।
4 3 2 12 01 b अश्वयेव हरिता याति धारया मन्द्रया याति धारया ॥ ९९७
4 3 2 12 02 a अनूपे गोमान्गोभिरक्षाः सोमो दुग्धाभिरक्षाः ।
4 3 2 12 02 b समुद्रं न संवरणान्यग्मन्मन्दी मदाय तोशते ॥ ९९८

सूक्त १३

4 3 2 13 01 a यत्सोम चित्रमुक्थ्यं दिव्यं पार्थिवं वसु ।
4 3 2 13 01 b तन्नः पुनान आ भर ॥ ९९९
4 3 2 13 02 a वृषा पुनान आयुꣳषि स्तनयन्नधि बर्हिषि ।
4 3 2 13 02 b हरिः सन्योनिमासदः ॥ १०००
4 3 2 13 03 a युवꣳ हि स्थः स्वःपती इन्द्रश्च सोम गोपती ।
4 3 2 13 03 b ईशाना पिप्यतं धियः ॥ १००१

सूक्त १४

4 3 2 14 01 a इन्द्रो मदाय वावृधे शवसे वृत्रहा नृभिः ।
4 3 2 14 01 b तमिन्महत्स्वाजिषूतिमर्भे हवामहे स वाजेषु प्र नोऽविषत् ॥ १००२
4 3 2 14 02 a असि हि वीर सेन्योऽसि भूरि परादृदिः ।
4 3 2 14 02 b असि दभ्रस्य चिद्वृधो यजमानाय शिक्षसि सुन्वते भूरि ते वसु ॥ १००३
4 3 2 14 03 a यदुदीरत आजयो धृष्णवे धीयते धनाम् ।
4 3 2 14 03 b युङ्क्ष्वा मदच्युता हरी कं हनः कं वसौ दधोऽस्मां इन्द्र वसौ दधः ॥ १००४

सूक्त १५

4 3 2 15 01 a स्वादोरित्था विषूवतो मध्वः पिबन्ति गौर्यः ।
4 3 2 15 01 b या इन्द्रेण सयावरीर्वृष्णा मदन्ति शोभसे वस्वीरनु स्वराज्यम् ॥ १००५
4 3 2 15 02 a ता अस्य पृशनायुवः सोमꣳ श्रीणन्ति पृश्नयः ।
4 3 2 15 02 b प्रिया इन्द्रस्य धेनवो वज्रꣳ हिन्वन्ति सायकं वस्वीरनु स्वराज्यम् ॥ १००६
4 3 2 15 03 a ता अस्य नमसा सहः सपर्यन्ति प्रचेतसः ।
4 3 2 15 03 b व्रतान्यस्य सश्चिरे पुरूणि पूर्वचित्तये वस्वीरनु स्वराज्यम् ॥ १००७

सूक्त १६

4 3 2 16 01 a असाव्यꣳशुर्मदायाप्सु दक्षो गिरिष्ठाः ।
4 3 2 16 01 b श्येनो न योनिमासदत् ॥ १००८
4 3 2 16 02 a शुभ्रमन्धो देववातमप्सु धौतं नृभिः सुतम् ।
4 3 2 16 02 b स्वदन्ति गावः पयोभिः ॥ १००९
4 3 2 16 03 a आदीमश्वं न हेतारमशूशुभन्नमृताय ।
4 3 2 16 03 b मधो रसꣳ सधमादे ॥ १०१०

सूक्त १७

4 3 2 17 01 a अभि द्युम्नं बृहद्यश इषस्पते दीदिहि देव देवयुम् ।
4 3 2 17 01 b वि कोशं मध्यमं युव ॥ १०११
4 3 2 17 02 a आ वच्यस्व सुदक्ष चम्वोः सुतो विशां वह्निर्न विश्पतिः ।
4 3 2 17 02 b वृष्टिं दिवः पवस्व रीतिमपो जिन्वन्गाविष्टये धियः ॥ १०१२

सूक्त १८

4 3 2 18 01 a प्राणा शिशुर्महीनाꣳ हिन्वन्नृतस्य दीधितिम् ।
4 3 2 18 01 b विश्वा परि प्रिया भुवदध द्विता ॥ १०१३
4 3 2 18 02 a उप त्रितस्य पाष्यो३रभक्त यद्गुहा पदम् ।
4 3 2 18 02 b यज्ञस्य सप्त धामभिरध प्रियम् ॥ १०१४
4 3 2 18 03 a त्रीणि त्रितस्य धारया पृष्टेष्वैरयद्रयिम् ।
4 3 2 18 03 b मिमीते अस्य योजना वि सुक्रतुः ॥ १०१५

सूक्त १९

4 3 2 19 01 a पवस्व वाजसातये पवित्रे धारया सुतः ।
4 3 2 19 01 b इन्द्राय सोम विष्णवे देवेभ्यो मधुमत्तरः ॥ १०१६
4 3 2 19 02 a त्वाꣳ रिहन्ति धीतयो हरिं पवित्रे अद्रुहः ।
4 3 2 19 02 b वत्सं जातं न मातरः पवमान विधर्मणि ॥ १०१७
4 3 2 19 03 a त्वं द्यां च महिव्रत पृथिवीं चाति जभ्रिषे ।
4 3 2 19 03 b प्रति द्रापिममुञ्चथाः पवमान महित्वना ॥ १०१८

सूक्त २०

4 3 2 20 01 a इन्दुर्वाजी पवते गोन्योघा इन्द्रे सोमः सह इन्वन्मदाय ।
4 3 2 20 01 b हन्ति रक्षो बाधते पर्यरातिं वरिवस्कृण्वन्वृजनस्य राजा ॥ १०१९
4 3 2 20 02 a अध धारया मध्वा पृचानस्तिरो रोम पवते अद्रिदुग्धः ।

4 3 2 20 02 b इन्दुरिन्द्रस्य सख्यं जुषाणो देवो देवस्य मत्सरो मदाय ॥ १०२०
4 3 2 20 03 a अभि व्रतानि पवते पुनानो देवो देवान्त्स्वेन रसेन पृञ्चन् ।
4 3 2 20 03 b इन्दुर्धर्माण्यृतुथा वसानो दश क्षिपो अव्यत सानो अव्ये ॥ १०२१

सूक्त २१

4 3 2 21 01 a आ ते अग्न इधीमहि द्युमन्तं देवाजरम् ।
4 3 2 21 01 b युद्ध स्या ते पनीयसी समिद्दीदयति द्यवीषꣳ स्तोतृभ्य आ भर ॥ १०२२
4 3 2 21 02 a आ ते अग्न ऋचा हविः शुक्रस्य ज्योतिषस्पते ।
4 3 2 21 02 b सुश्चन्द्र दस्म विश्पते हव्यवाट्तुभ्यꣳ हूयत इषꣳ स्तोतृभ्य आ भर ॥ १०२३
4 3 2 21 03 a ओभे सुश्चन्द्र विश्पते दर्वी श्रीणीष आसनि ।
4 3 2 21 03 b उतो न उत्पुपूर्या उक्थेषु शवसस्पत इषꣳ स्तोतृभ्य आ भर ॥ १०२४

सूक्त २२

4 3 2 22 01 a इन्द्राय साम गायत विप्राय बृहते बृहत् ।
4 3 2 22 01 b ब्रह्माकृते विपश्चिते पनस्यवे ॥ १०२५
4 3 2 22 02 a त्वमिन्द्राभिभूरसि त्वꣳ सूर्यमरोचयः ।
4 3 2 22 02 b विश्वकर्मा विश्वदेवो महाꣳ असि ॥ १०२६
4 3 2 22 03 a विभ्राजं ज्योतिषा त्व३रगच्छो रोचनं दिवः ।
4 3 2 22 03 b देवास्त इन्द्र सख्याय येमिरे ॥ १०२७

सूक्त २३

4 3 2 23 01 a असावि सोम इन्द्र ते शविष्ठ धृष्णवा गहि ।
4 3 2 23 01 b आ त्वा पृणक्त्विन्द्रियꣳ रजः सूर्यो न रश्मिभिः ॥ १०२८
4 3 2 23 02 a आ तिष्ठ वृत्रहन्रथं युक्ता ते ब्रह्मणा हरी ।
4 3 2 23 02 b अर्वाचीनꣳ सु ते मनो ग्रावा कृणोतु वग्नुना ॥ १०२९
4 3 2 23 03 a इन्द्रमिद्धरी वहतोऽप्रतिधृष्टशवसम् ।
4 3 2 23 03 b ऋषीणाꣳ सुष्टुतीरुप यज्ञं च मानुषाणाम् ॥ १०३०

इति तृतीयप्रपाठके द्वितीयोऽर्धः ॥

इति तृतीयः प्रपाठकश्च समाप्तः ॥

चतुर्थ प्रपाठकः । प्रथमोऽर्धः

सूक्त १

4 4 1 01 01 a ज्योतिर्यज्ञस्य पवते मधु प्रियं पिता देवानां जनिता विभूवसुः ।

4 4 1 01 01 b दधाति रत्नꣳ स्वधयोरपीच्यं मदिन्तमो मत्सर इन्द्रियो रसः ॥ १०३१
4 4 1 01 02 a अभिक्रन्दन्कलशं वाज्यर्षति पतिर्दिवः शतधारो विचक्षणः ।
4 4 1 01 02 b हरिर्मित्रस्य सदनेषु सीदति मर्मृजानोऽविभिः सिन्धुभिर्वृषा ॥ १०३२
4 4 1 01 03 a अग्रे सिन्धूनां पवमानो अर्षत्यग्रे वाचो अग्रियो गोषु गच्छसि ।
4 4 1 01 03 b अग्रे वाजस्य भजसे महद्धनꣳ स्वायुधः सोतृभिः सोम सूयसे ॥ १०३३

सूक्त २

4 4 1 02 01 a असृक्षत प्र वाजिनो गव्या सोमासो अश्वया ।
4 4 1 02 01 b शुक्रासो वीरयाशवः ॥ १०३४
4 4 1 02 02 a शुम्भमानो ऋतायुभिर्मृज्यमाना गभस्त्योः ।
4 4 1 02 02 b पवन्ते वारे अव्यये ॥ १०३५
4 4 1 02 03 a ते विश्वा दाशुषे वसु सोमा दिव्यानि पार्थिवा ।
4 4 1 02 03 b पवन्तामान्तरिक्ष्या ॥ १०३६

सूक्त ३

4 4 1 03 01 a पवस्व देववीरति पवित्रꣳ सोम रꣳह्या ।
4 4 1 03 01 b इन्द्रमिन्दो वृषा विश ॥ १०३७
4 4 1 03 02 a आ वच्यस्व महि प्सरो वृषेन्दो द्युम्नवत्तमः ।
4 4 1 03 02 b आ योनिं धर्णसिः सदः ॥ १०३८
4 4 1 03 03 a अधुक्षत प्रियं मधु धारा सुतस्य वेधसः ।
4 4 1 03 03 b अपो वसिष्ट सुक्रतुः ॥ १०३९
4 4 1 03 04 a महान्तं त्वा महीरन्वापो अर्षन्ति सिन्धवः ।
4 4 1 03 04 b यद्गोभिर्वासयिष्यसे ॥ १०४०
4 4 1 03 05 a समुद्रो अप्सु मामृजे विष्टम्भो धरुणो दिवः ।
4 4 1 03 05 b सोमः पवित्रे अस्मयुः ॥ १०४१
4 4 1 03 06 a अचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः ।
4 4 1 03 06 b सꣳ सूर्येण दिद्युते ॥ १०४२
4 4 1 03 07 a गिरस्त इन्द ओजसा मर्मृज्यन्ते अपस्युवः ।
4 4 1 03 07 b याभिर्मदाय शुम्भसे ॥ १०४३
4 4 1 03 08 a तं त्वा मदाय घृष्वय उ लोककृत्नुमीमहे ।
4 4 1 03 08 b तव प्रशस्तये महे ॥ १०४४
4 4 1 03 09 a गोषा इन्दो नृषा अस्यश्वसा वाजसा उत ।
4 4 1 03 09 b आत्मा यज्ञस्य पूर्व्यः ॥ १०४५
4 4 1 03 10 a अस्मभ्यमिन्दविन्द्रियं मधोः पवस्व धारया ।
4 4 1 03 10 b पर्जन्यो वृष्टिमाꣳ इव ॥ १०४६

सूक्त ४

4 4 1 04 01 a सना च सोम जेषि च पवमान महि श्रवः ।
4 4 1 04 01 b अथा नो वस्यसस्कृधि ॥ १०४७
4 4 1 04 02 a सना ज्योतिः सना स्वा३र्विश्वा च सोम सौभगा ।
4 4 1 04 02 b अथा नो वस्यसस्कृधि ॥ १०४८
4 4 1 04 03 a सना दक्षमुत क्रतुमप सोम मृधो जहि ।
4 4 1 04 03 b अथा नो वस्यसस्कृधि ॥ १०४९
4 4 1 04 04 a पवीतारः पुनीतन सोममिन्द्राय पातवे ।
4 4 1 04 04 b अथा नो वस्यसस्कृधि ॥ १०५०
4 4 1 04 05 a त्वꣳ सूर्ये न आ भज तव क्रत्वा तवोतिभिः ।
4 4 1 04 05 b अथा नो वस्यसस्कृधि ॥ १०५१
4 4 1 04 06 a तव क्रत्वा तवोतिभिर्ज्योक्पश्येम सूर्यम् ।
4 4 1 04 06 b अथा नो वस्यसस्कृधि ॥ १०५२
4 4 1 04 07 a अभ्यर्ष स्वायुध सोम द्विबर्हसꣳ रयिम् ।
4 4 1 04 07 b अथा नो वस्यसस्कृधि ॥ १०५३
4 4 1 04 08 a अभ्या३र्षानपच्युतो वाजिन्त्समत्सु सासहिः ।
4 4 1 04 08 b अथा नो वस्यसस्कृधि ॥ १०५४
4 4 1 04 09 a त्वां यज्ञैरवीवृधन्पवमान विधर्मणि ।
4 4 1 04 09 b अथा नो वस्यसस्कृधि ॥ १०५५
4 4 1 04 10 a रयिं नश्चित्रमश्विनमिन्दो विश्वायुमा भर ।
4 4 1 04 10 b अथा नो वस्यसस्कृधि ॥ १०५६

सूक्त ५

4 4 1 05 01 a तरत्स मन्दी धावति धारा सुतस्यान्धसः ।
4 4 1 05 01 b तरत्स मन्दी धावति ॥ १०५७
4 4 1 05 02 a उस्रा वेद वसूनां मर्त्तस्य देव्यवसः ।
4 4 1 05 02 b तरत्स मन्दी धावति ॥ १०५८
4 4 1 05 03 a ध्वस्रयोः पुरुषन्त्योरा सहस्राणि दद्महे ।
4 4 1 05 03 b तरत्स मन्दी धावति ॥ १०५९
4 4 1 05 04 a आ ययोस्त्रिꣳशतं तना सहस्राणि च दद्महे ।
4 4 1 05 04 b तरत्स मन्दी धावति ॥ १०६०

सूक्त ६

4 4 1 06 01 a एते सोमा असृक्षत गृणानाः शवसे महे ।
4 4 1 06 01 b मदिन्तमस्य धारया ॥ १०६१
4 4 1 06 02 a अभि गव्यानि वीतये नृम्णा पुनानो अर्षसि ।
4 4 1 06 02 b सनद्वाजः परि स्रव ॥ १०६२
4 4 1 06 03 a उत नो गोमतीरिषो विश्वा अर्ष परिष्टुभः ।
4 4 1 06 03 b गृणानो जमदग्निना ॥ १०६३

सूक्त ७

4 4 1 07 01 a इम꣡ स्तोममर्हते जातवेदसे रथमिव सं महेमा मनीषया ।
4 4 1 07 01 b भद्रा हि नः प्रमतिरस्य स꣡सद्यग्ने सख्ये मा रिषामा वयं तव ॥ १०६४
4 4 1 07 02 a भरामेध्मं कृणवामा हवी꣡षि ते चितयन्तः पर्वणापर्वणा वयम् ।
4 4 1 07 02 b जीवातवे प्रतर꣡ साधया धियोऽग्ने सख्ये म रिषामा वयं तव ॥ १०६५
4 4 1 07 03 a शकेम त्वा समिध꣡ साधया धियस्त्वे देवा हविरदन्त्याहुतम् ।
4 4 1 07 03 b त्वमादित्या꣡ आ वह तान्ह्यू३श्मस्यग्ने सख्ये मा रिषामा वयं तव ॥ १०६६

सूक्त ८

4 4 1 08 01 a प्रति वा꣡ सूर उदिते मित्रं गृणीषे वरुणम् ।
4 4 1 08 01 b अर्यमण꣡ रिशादसम् ॥ १०६७
4 4 1 08 02 a राया हिरण्यया मतिरियमवृकाय शवसे ।
4 4 1 08 02 b इयं विप्रामेधसातये ॥ १०६८
4 4 1 08 03 a ते स्याम देव वरुण ते मित्र सूरिभिः सह ।
4 4 1 08 03 b इष꣡ स्वश्च धीमहि ॥ १०६९

सूक्त ९

4 4 1 09 01 a भिन्धि विश्वा अप द्विषः परि बाधो जही मृधः ।
4 4 1 09 01 b वसु स्पार्हं तदा भर ॥ १०७०
4 4 1 09 02 a यस्य ते विश्वमानुषग्भूरेर्दत्तस्य वेदति ।
4 4 1 09 02 b वसु स्पार्हं तदा भर ॥ १०७१
4 4 1 09 03 a यद्वीडाविन्द्र यत्स्थिरे यत्पर्शाने पराभृतम् ।
4 4 1 09 03 b वसु स्पार्हं तदा भर ॥ १०७२

सूक्त १०

4 4 1 10 01 a यज्ञस्य हि स्थ ऋत्विजा सस्नी वाजेषु कर्मसु ।
4 4 1 10 01 b इन्द्राग्नी तस्य बोधतम् ॥ १०७३
4 4 1 10 02 a तोशासा रथयावाना वृत्रहणापराजिता ।
4 4 1 10 02 b इन्द्राग्नी तस्य बोधतम् ॥ १०७४
4 4 1 10 03 a इदं वां मदिरं मध्वधुक्षन्नद्रिभिर्नरः ।
4 4 1 10 03 b इन्द्राग्नी तस्य बोधतम् ॥ १०७५

सूक्त ११

4 4 1 11 01 a इन्द्रायेन्दो मरुत्वते पवस्व मधुमत्तमः ।

4 4 1 11 01 b अर्कस्य योनिमासदम् ॥ १०७६
4 4 1 11 02 a तं त्वा विप्रा वचोविदः परिष्कृण्वन्ति धर्णसिम् ।
4 4 1 11 02 b सं त्वा मृजन्त्यायवः ॥ १०७७
4 4 1 11 03 a रसं ते मित्रो अर्यमा पिबन्तु वरुणः कवे ।
4 4 1 11 03 b पवमानस्य मरुतः ॥ १०७८

सूक्त १२

4 4 1 12 01 a मृज्यमानः सुहस्त्य समुद्रे वाचमिन्वसि ।
4 4 1 12 01 b रयिं पिशङ्गं बहुलं पुरुस्पृहं पवमानाभ्यर्षसि ॥ १०७९
4 4 1 12 02 a पुनानो वरे पवमनो अव्यये वृषो अचिक्रदद्वने ।
4 4 1 12 02 b देवाना꣡ꣳ सोम पवमान निष्कृतं गोभिरञ्जानो अर्षसि ॥ १०८०

सूक्त १३

4 4 1 13 01 a एतमु त्यं दश क्षिपो मृजन्ति सिन्धुमातरम् ।
4 4 1 13 01 b समादित्येभिरख्यत ॥ १०८१
4 4 1 13 02 a समिन्द्रेणोत वायुना सुत एति पवित्र आ ।
4 4 1 13 02 b स꣡ꣳ सूर्यस्य रश्मिभिः ॥ १०८२
4 4 1 13 03 a स नो भगाय वायवे पूष्णे पवस्व मधुमान् ।
4 4 1 13 03 b चारुर्मित्रे वरुणे च ॥ १०८३

सूक्त १४

4 4 1 14 01 a रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः ।
4 4 1 14 01 b क्षुमन्तो याभिर्मदेम ॥ १०८४
4 4 1 14 02 a आ घ त्वावां त्मना युक्तः स्तोतृभ्यो धृष्णवीयानः ।
4 4 1 14 02 b ऋणोरक्षं न चक्र्योः ॥ १०८५
4 4 1 14 03 a आ यद्दुवः शतक्रतवा कामं जरितॄणाम् ।
4 4 1 14 03 b ऋणोरक्षं न शचीभिः ॥ १०८६

सूक्त १५

4 4 1 15 01 a सुरूपकृत्नुमूतये सुदुघामिव गोदुहे ।
4 4 1 15 01 b जुहूमसि द्यविद्यवि ॥ १०८७
4 4 1 15 02 a उप नः सवना गहि सोमस्य सोमपाः पिब ।
4 4 1 15 02 b गोदा इद्रेवतो मदः ॥ १०८८
4 4 1 15 03 a अथा ते अन्तमानां विद्याम सुमतीनाम् ।
4 4 1 15 03 b मा नो अति ख्य आ गहि ॥ १०८९

सूक्त १६

4 4 1 16 01 a उभे यदिन्द्र रोदसी आपप्राथोषा इव ।
4 4 1 16 01 b महान्तं त्वा महीना॑ सम्राजं चर्षणीनाम् ।
4 4 1 16 01 c देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥१०९०
4 4 1 16 02 a दीर्घ॑ ह्यङ्कुशं यथा शक्तिं बिभर्षि मन्तुमः ।
4 4 1 16 02 b पूर्वेण मघवन्पदा वयामजो यथा यमः ।
4 4 1 16 02 c देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥१०९१
4 4 1 16 03 a अव स्म दुर्हृणायतो मर्त्तस्य तनुहि स्थिरम् ।
4 4 1 16 03 b अधस्पदं तमीं कृधि यो अस्मा॑ अभिदासति ।
4 4 1 16 03 c देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥१०९२

सूक्त १७

4 4 1 17 01 a परि स्वानो गिरिष्ठाः पवित्रे सोमो अक्षरत् ।
4 4 1 17 01 b मदेषु सर्वधा असि ॥१०९३
4 4 1 17 02 a त्वं विप्रस्त्वं कविर्मधु प्र जातमन्धसः ।
4 4 1 17 02 b मदेषु सर्वधा असि ॥१०९४
4 4 1 17 03 a त्वे विश्वे सजोषसो देवासः पीतिमाशत ।
4 4 1 17 03 b मदेषु सर्वधा असि ॥१०९५

सूक्त १८

4 4 1 18 01 a स सुन्वे यो वसूनां यो रायामानेता य इडानाम् ।
4 4 1 18 01 b सोमो यः सुक्षितीनाम् ॥१०९६
4 4 1 18 02 a यस्य त इन्द्रः पिबाद्यस्य मरुतो यस्य वार्यमणा भगः ।
4 4 1 18 02 b आ येन मित्रावरुणा करामह एन्द्रमवसे महे ॥१०९७

सूक्त १९

4 4 1 19 01 a तं वः सखायो मदाय पुनानमभि गायत ।
4 4 1 19 01 b शिशुं न हव्यैः स्वदयन्त गूर्तिभिः ॥१०९८
4 4 1 19 02 a सं वत्स इव मातृभिरिन्दुर्हिन्वानो अज्यते ।
4 4 1 19 02 b देवावीर्मदो मतिभिः परिष्कृतः ॥१०९९
4 4 1 19 03 a अयं दक्षाय साधनोऽयं॑ शर्धाय वीतये ।
4 4 1 19 03 b अयं देवेभ्यो मधुमत्तरः सुतः ॥११००

सूक्त २०

4 4 1 20 01 a सोमाः पवन्त इन्दवोऽस्मभ्यं गातुवित्तमाः ।

4 4 1 20 01 b मित्राः सुवाना अरेपसः स्वाध्यः स्वर्विदः ॥ ११०१
4 4 1 20 02 a ते पूतासो विपश्चितः सोमासो दध्याशिरः ।
4 4 1 20 02 b सूरासो न दर्शतासो जिगत्नवो ध्रुवा घृते ॥ ११०२
4 4 1 20 03 a सुष्वाणासो व्यद्रिभिश्चिताना गोरधि त्वचि ।
4 4 1 20 03 b इषमस्मभ्यमभितः समस्वरन्वसुविदः ॥ ११०३

सूक्त २१

4 4 1 21 01 a अया पवा पवस्वैना वसूनि माँश्चत्व इन्दो सरसि प्र धन्व ।
4 4 1 21 01 b ब्रघ्नश्चिद्यस्य वातो न जूतिं पुरुमेधाश्चित्तकवे नरं धात् ॥ ११०४
4 4 1 21 02 a उत न एना पवया पवस्वाधि श्रुते श्रवाय्यस्य तीर्थे ।
4 4 1 21 02 b षष्टिँ सहस्रा नैगुतो वसूनि वृक्षं न पक्वं धूनवद्रणाय ॥ ११०५
4 4 1 21 03 a महीमे अस्य वृष नाम शूषे माँश्चत्वे वा पृशने वा वधत्रे ।
4 4 1 21 03 b अस्वापयन्निगुतः स्नेहयच्चापामित्राँ अपाचितो अचेतः ॥ ११०६

सूक्त २२

4 4 1 22 01 a अग्ने त्वं नो अन्तम उत त्राता शिवो भुवो वरूथ्यः ॥ ११०७
4 4 1 22 02 a वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमो रयिं दाः ॥ ११०८
4 4 1 22 03 a तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ॥ ११०९

सूक्त २३

4 4 1 23 01 a इमा नु कं भुवना सीषधेमेन्द्रश्च विश्वे च देवाः ॥ १११०
4 4 1 23 02 a यज्ञं च नस्तन्वं च प्रजां चादित्यैरिन्द्रः सह सीषधातु ॥ ११११
4 4 1 23 03 a आदित्यैरिन्द्रः सगणो मरुद्भिरस्मभ्यं भेषजा करत् ॥ १११२

सूक्त २४

4 4 1 24 01 a प्र व इन्द्राय वृत्रहन्तमाय विप्राय गाथं गायत यं जुजोषते ॥ १११३
4 4 1 24 02 a अर्चन्त्यर्कं मरुतः स्वर्का आ स्तोभति श्रुतो युवा स इन्द्रः ॥ १११४
4 4 1 24 03 a उप प्रक्षे मधुमति क्षियन्तः पुष्येम रयिं धीमहे त इन्द्र ॥ १११५

इति चतुर्थप्रपाठके प्रथमोऽर्धः ॥

चतुर्थ प्रपाठकः । द्वितीयोऽर्धः

सूक्त १

4 4 2 01 01 a प्र काव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति ।

4 4 2 01 01 b महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्येति रेभन् ॥ १११६
4 4 2 01 02 a प्र हꣳसासस्तृपला वग्नुमच्छामादस्तं वृषगणा अयासुः ।
4 4 2 01 02 b आङ्गोषिणं पवमानꣳ सखायो दुर्मर्षं वाणं प्र वदन्ति साकम् ॥ १११७
4 4 2 01 03 a स योजत उरुगायस्य जूतिं वृथा क्रीडन्तं मिमते न गावः ।
4 4 2 01 03 b परीणसं कृणुते तिग्मशृङ्गो दिवा हरिर्ददृशे नक्तमृज्रः ॥ १११८
4 4 2 01 04 a प्र स्वानासो रथा इवार्वन्तो न अवस्यवः ।
4 4 2 01 04 b सोमासो राये अक्रमुः ॥ १११९
4 4 2 01 05 a हिन्वानासो रथा इव दधन्विरे गभस्त्योः ।
4 4 2 01 05 b भरासः कारिणामिव ॥ ११२०
4 4 2 01 06 a राजानो न प्रशस्तिभिः सोमासो गोभिरञ्जते ।
4 4 2 01 06 b यज्ञो न सप्त धातृभिः ॥ ११२१
4 4 2 01 07 a परि स्वानास इन्दवो मदाय बर्हणा गिरा ।
4 4 2 01 07 b मधो अर्षन्ति धारया ॥ ११२२
4 4 2 01 08 a आपानासो विवस्वतो जिन्वन्त उषसो भगम् ।
4 4 2 01 08 b सूरा अण्वं वि तन्वते ॥ ११२३
4 4 2 01 09 a अप द्वारा मतीनां प्रत्ना ऋण्वन्ति कारवः ।
4 4 2 01 09 b वृष्णो हरस आयवः ॥ ११२४
4 4 2 01 10 a समीचीनास आशत होतारः सप्तजानयः ।
4 4 2 01 10 b पदमेकस्य पिप्रतः ॥ ११२५
4 4 2 01 11 a नाभा नाभिं न आ ददे चक्षुषा सूर्यं दृशे ।
4 4 2 01 11 b कवेरपत्यमा दुहे ॥ ११२६
4 4 2 01 12 a अभि प्रियं दिवस्पदमध्वर्युभिर्गुहा हितम् ।
4 4 2 01 13 b सूरः पस्यति चक्षसा ॥ ११२७

सूक्त २

4 4 2 02 01 a असृग्रमिन्दवः पथा धर्मन्नृतस्य सुश्रियः ।
4 4 2 02 01 b विदाना अस्य योजना ॥ ११२८
4 4 2 02 02 a प्र धारा मधो अग्रियो महीरपो वि गाहते ।
4 4 2 02 02 b हविर्हविःषु वन्द्यः ॥ ११२९
4 4 2 02 03 a प्र युजा वाचो अग्रियो वृषो अचिक्रदद्वने ।
4 4 2 02 03 b सद्माभि सत्यो अध्वरः ॥ ११३०
4 4 2 02 04 a परि यत्काव्या कविर्नृम्णा पुनानो अर्षति ।
4 4 2 02 04 b स्वर्वाजी सिषासति ॥ ११३१
4 4 2 02 05 a पवमानो अभि स्पृधो विशो राजेव सीदति ।
4 4 2 02 05 b यदीमृण्वन्ति वेधसः ॥ ११३२
4 4 2 02 06 a अव्या वारे परि प्रियो हरिर्वनेषु सीदति ।
4 4 2 02 06 b रेभो वनुष्यते मति । ११३३
4 4 2 02 07 a स वायुमिन्द्रमश्विना साकं मदेन गच्छति ।
4 4 2 02 07 b रणा यो अस्य धर्मणा ॥ ११३४

4 4 2 02 08 a आ मित्रे वरुणे भगे मधोः पवन्त ऊर्मयः ।
4 4 2 02 08 b विदाना अस्य शक्मभिः ॥ ११३५
4 4 2 02 09 a अस्मभ्यꣳ रोदसी रयिं मध्वो वाजस्य सातये ।
4 4 2 02 09 b श्रवो वसूनि सञ्जितम् ॥ ११३६
4 4 2 02 10 a आ ते दक्षं मयोभुवं वह्निमद्या वृणीमहे ।
4 4 2 02 10 b पान्तमा पुरुस्पृहम् ॥ ११३७
4 4 2 02 11 a आ मन्द्रमा वरेण्यमा विप्रमा मनीषिणम् ।
4 4 2 02 11 b पान्तमा पुरुस्पृहम् ॥ ११३८
4 4 2 02 12 a आ रयिमा सुचेतुनमा सुक्रतो तनूष्वा ।
4 4 2 02 12 b पान्तमा पुरुस्पृहम् ॥ ११३९

सूक्त ३

4 4 2 03 01 a मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् ।
4 4 2 03 01 b कविꣳ सम्राजमतिथिं जनानामासन्नः पात्रं जनयन्त देवाः ॥ ११४०
4 4 2 03 02 a त्वां विश्वे अमृत जायमानꣳ शिशुं न देवा अभि सं नवन्ते ।
4 4 2 03 02 b तव क्रतुभिरमृतत्वमायन्वैश्वानर यत्पित्रोरदीदेः ॥ ११४१
4 4 2 03 03 a नाभिं यज्ञानाꣳ सदनꣳ रयीणां महामाहावमभि सं नवन्त ।
4 4 2 03 03 b वैश्वानरꣳ रथ्यमध्वराणां यज्ञस्य केतुं जनयन्त देवाः ॥ ११४२

सूक्त ४

4 4 2 04 01 a प्र वो मित्राय गायत वरुणाय विपा गिरा ।
4 4 2 04 01 b महिक्षत्रावृतं बृहत् ॥ ११४३
4 4 2 04 02 a सम्राजा या घृतयोनी मित्रश्चोभा वरुणश्च ।
4 4 2 04 02 b देवा देवेषु प्रशस्ता ॥ ११४४
4 4 2 04 03 a ता नः शक्तं पर्थिवस्य महो रायो दिव्यस्य ।
4 4 2 04 03 b महि वां क्षत्रं देवेषु ॥ ११४५

सूक्त ५

4 4 2 05 01 a इन्द्रा याहि चित्रभानो सुता इमे त्वायवः ।
4 4 2 05 01 b अण्वीभिस्तना पूतासः ॥ ११४६
4 4 2 05 02 a इन्द्रा याहि धियेषितो विप्रजूतः सुतावतः ।
4 4 2 05 02 b उप ब्रह्माणि वाघतः ॥ ११४७
4 4 2 05 03 a इन्द्रा याहि तूतुजान उप ब्रह्माणि हरिवः ।
4 4 2 05 03 b सुते दधिष्व नश्चनः ॥ ११४८

सूक्त ६

4 4 2 06 01 a तमीडिष्व यो अर्चिषा वना विश्वा परिष्वजत् ।
4 4 2 06 01 b कृष्णा कृणोति जिह्वया ॥ ११४९
4 4 2 06 02 a य इद्ध आविवासति सुम्नमिन्द्रस्य मर्त्यः ।
4 4 2 06 02 b द्युम्नाय सुतरा अपः ॥ ११५०
4 4 2 06 03 a ता नो वाजवतीरिष आशून्पिपृतमर्वतः ।
4 4 2 06 03 b एन्द्रमग्निं च वोढवे ॥ ११५१

सूक्त ७

4 4 2 07 01 a प्रो अयासीदिन्दुरिन्द्रस्य निष्कृतꣳ सखा सख्युर्न प्र मिनाति सङ्गिरम् ।
4 4 2 07 01 b मर्य इव युवतिभिः समर्षति सोमः कलशे शतयाम्ना पथा ॥ ११५२
4 4 2 07 02 a प्र वो धियो मन्द्रयुवो विपन्युवः पनस्युवः संवरणेष्वक्रमुः ।
4 4 2 07 02 b हरिं क्रीडन्तमभ्यनूषत स्तुभोऽभि धेनवः पयसेदशिश्रयुः ॥ ११५३
4 4 2 07 03 a आ नः सोम संयतं पिप्युषीमिषमिन्दो पवस्व पवमान ऊर्मिणा ।
4 4 2 07 03 b या नो दोहते त्रिरहन्नसश्चुषी क्षुमद्वाजवन्मधुमत्सुवीर्यम् ॥ ११५४

सूक्त ८

4 4 2 08 01 a न किष्टं कर्मणा नशद्यश्चकार सदावृधम् ।
4 4 2 08 01 b इन्द्रं न यज्ञैर्विश्वगूर्त्तमृभ्वसमधृष्टं धृष्णुमोजसा ॥ ११५५
4 4 2 08 02 a अषाढमुग्रं पृतनासु सासहिं यस्मिन्महीरुरुज्रयः ।
4 4 2 08 02 b सं धेनवो जायमाने अनोनवुर्द्यावः क्षामीरनोनवुः ॥ ११५६

सूक्त ९

4 4 2 09 01 a सखाय आ नि षीदत पुनानाय प्र गायत ।
4 4 2 09 01 b शिशुं न यज्ञैः परि भूषत श्रिये ॥ ११५७
4 4 2 09 02 a समी वत्सं न मातृभिः सृजता गयसाधनम् ।
4 4 2 09 02 b देवाव्याꣳ मदमभि द्विशवसम् ॥ ११५८
4 4 2 09 03 a पुनाता दक्षसाधनं यथा शर्धाय वीतये ।
4 4 2 09 03 b यथा मित्राय वरुणाय शन्तमम् ॥ ११५९

सूक्त १०

4 4 2 10 01 a प्र वाज्यक्षाः सहस्रधारस्तिरः पवित्रं वि वारमव्यम् ॥ ११६०
4 4 2 10 02 a स वाज्यक्षाः सहस्ररेता अद्भिर्मृजानो गोभिः श्रीणानः ॥ ११६१
4 4 2 10 03 a प्र सोम याहीन्द्रस्य कुक्षा नृभिर्येमानो अद्रिभिः सुतः ॥ ११६२

सूक्त ११

4 4 2 11 01 a ये सोमासः परावति ये अर्वावति सुन्विरे ।
4 4 2 11 01 b ये वादः शर्यणावति ॥ ११६३
4 4 2 11 02 a य आर्जीकेषु कृत्वसु ये मध्ये पस्त्यानाम् ।
4 4 2 11 02 b ये वा जनेषु पञ्चसु ॥ ११६४
4 4 2 11 03 a ते नो वृष्टिं दिवस्परि पवन्तामा सुवीर्यम् ।
4 4 2 11 03 b स्वाना देवास इन्दवः ॥ ११६५

सूक्त १२

4 4 2 12 01 a आ ते वत्सो मनो यमत्परमाच्चित्सधस्थात् ।
4 4 2 12 01 b अग्ने त्वां कामये गिरा ॥ ११६६
4 4 2 12 02 a पुरुत्रा हि सदृङ्ङसि दिशो विश्वा अनु प्रभुः ।
4 4 2 12 02 b समत्सु त्वा हवामहे ॥ ११६७
4 4 2 12 03 a समत्स्वग्निमवसे वाजयन्तो हवामहे ।
4 4 2 12 03 b वाजेषु चित्रराधसम् ॥ ११६८

सूक्त १३

4 4 2 13 01 a त्वं न इन्द्रा भर ओजो नृम्णꣳ शतक्रतो विचर्षणे ।
4 4 2 13 01 b आ वीरं पृतनासहम् ॥ ११६९
4 4 2 13 02 a त्वꣳ हि नः पिता वसो त्वं माता शतक्रतो बभूविथ ।
4 4 2 13 02 b अथा ते सुम्नमीमहे ॥ ११७०
4 4 2 13 03 a त्वाꣳ शुष्मिन्पुरुहूत वाजयन्तमुप ब्रुवे सहस्कृत ।
4 4 2 13 03 b स नो रास्व सुवीर्यम् ॥ ११७१
4 4 2 13 04 a यदिन्द्र चित्र म इह नास्ति त्वादातमद्रिवः ।
4 4 2 13 04 b राधस्तन्नो विदद्वस उभयाहस्त्या भर ॥ ११७२
4 4 2 13 05 a यन्मन्यसे वरेण्यमिन्द्र द्युक्षं तदा भर ।
4 4 2 13 05 b विद्याम तस्य ते वयमकूपारस्य दावनः ॥ ११७३
4 4 2 13 06 a यत्ते दिक्षु प्रराध्यं मनो अस्ति श्रुतं बृहत् ।
4 4 2 13 06 b तेन दृढा चिदद्रिव आ वाजं दर्षि सातये ॥ ११७४

इति चतुर्थप्रपाठके द्वितीयोऽर्धः ॥

इति चतुर्थः प्रपाठकश्च समाप्तः ॥

पञ्चम प्रपाठकः । प्रथमोऽर्धः

सूक्त १

4 5 1 01 01 a शिशुं जज्ञानꣳ हर्यतं मृजन्ति शुम्भन्ति विप्रं मरुतो गणेन ।

4 5 1 01 01 b कविर्गीर्भिः काव्येना कविः सन्त्सोमः पवित्रमत्येति रेभन् ॥ ११७५
4 5 1 01 02 a ऋषिमना य ऋषिकृत्स्वर्षाः सहस्रनीथः पदवीः कवीनाम् ।
4 5 1 01 02 b तृतीयं धाम महिषः सिषासन्त्सोमो विराजमनु राजति ष्टुप् ॥ ११७६
4 5 1 01 03 a चमूषच्छ्येनः शकुनो विभृत्वा गोविन्दुर्द्रप्स आयुधानि बिभ्रत् ।
4 5 1 01 03 b अपामूर्मिꣳ सचमानः समुद्रं तुरीयं धाम महिषो विवक्ति ॥ ११७७

सूक्त २

4 5 1 02 01 a एते सोमा अभि प्रियमिन्द्रस्य काममक्षरन् ।
4 5 1 02 01 b वर्धन्तो अस्य वीर्यम् ॥ ११७८
4 5 1 02 02 a पुनानासश्चमूषदो गच्छन्तो वायुमश्विना ।
4 5 1 02 02 b ते नो धत्त सुवीर्यम् ॥ ११८१
4 5 1 02 03 a इन्द्रस्य सोम राधसे पुनानो हार्दि चोदय ।
4 5 1 02 03 b देवानां योनिमासदम् ॥ ११८०
4 5 1 02 04 a मृजन्ति त्वा देश क्षिपो हिन्वन्ति सप्त धीतयः ।
4 5 1 02 04 b अनु विप्रा अमादिषुः ॥ ११८१
4 5 1 02 05 a देवेभ्यस्त्वा मदाय कꣳ सृजानमति मेष्यः ।
4 5 1 02 05 b स गोभिर्वासयामसि ॥ ११८२
4 5 1 02 06 a पुनानः कलशेष्वा वस्त्राण्यरुषो हरिः ।
4 5 1 02 06 b परि गव्यान्यव्यत ॥ ११८३
4 5 1 02 07 a मघोन आ पवस्व नो जहि विश्वा अप द्विषः ।
4 5 1 02 07 b इन्दो सखायमा विश ॥ ११८४
4 5 1 02 08 a नृचक्षसं त्वा वयमिन्द्रपीतꣳ स्वर्विदम् ।
4 5 1 02 08 b भक्षीमहि प्रजामिषम् ॥ ११८५
4 5 1 02 09 a वृष्टिं दिवः परि स्रव द्युम्नं पृथिव्या अधि ।
4 5 1 02 09 b सहो नः सोम पृत्सु धाः ॥ ११८६

सूक्त ३

4 5 1 03 01 a सोमः पुनानो अर्षति सहस्रधारो अत्यविः ।
4 5 1 03 01 b वायोरिन्द्रस्य निष्कृतम् ॥ ११८७
4 5 1 03 02 a पवमानमवस्यवो विप्रमभि प्र गायत ।
4 5 1 03 02 b सुष्वाणं देववीतये ॥ ११८८
4 5 1 03 03 a पवन्ते वाजसातये सोमाः सहस्रपाजसः ।
4 5 1 03 03 b गृणाना देववीतये ॥ ११८९
4 5 1 03 04 a उत नो वाजसातये पवस्व बृहतीरिषः ।
4 5 1 03 04 b द्युमदिन्दो सुवीर्यम् ॥ ११९०
4 5 1 03 05 a अत्या हियाना न हेतृभिरसृग्रं वाजसातये ।
4 5 1 03 05 b वि वारमव्यमाशवः ॥ ११९१
4 5 1 03 06 a ते नः सहस्रिणꣳ रयिं पवन्तामा सुवीर्यम् ।

4 5 1 03 06 b सुवाना देवास इन्दवः ॥ ११९२
4 5 1 03 07 a वाश्रा अर्षन्तीन्दवोऽभि वत्सं न मातरः ।
4 5 1 03 07 b दधन्विरे गभस्त्योः ॥ ११९३
4 5 1 03 08 a जुष्ट इन्द्राय मत्सरः पवमान कनिक्रदत् ।
4 5 1 03 08 b विश्वा अप द्विषो जहि ॥ ११९४
4 5 1 03 09 a अपघ्नन्तो अराव्णः पवमानाः स्वर्दृशः ।
4 5 1 03 09 b योनावृतस्य सीदत ॥ ११९५

सूक्त ४

4 5 1 04 01 a सोमा असृग्रमिन्दवः सुता ऋतस्य धारया ।
4 5 1 04 01 b इन्द्राय मधुमत्तमाः ॥ ११९६
4 5 1 04 02 a अभि विप्रा अनूषत गावो वत्सं न धेनवः ।
4 5 1 04 02 b इन्द्रꣳ सोमस्य पीतये ॥ ११९७
4 5 1 04 03 a मदच्युत्क्षेति सादने सिन्धोरूर्मा विपश्चित् ।
4 5 1 04 03 b सोमो गौरी अधि श्रितः ॥ ११९८
4 5 1 04 04 a दिवो नाभा विचक्षणोऽव्यो वारे महीयते ।
4 5 1 04 04 b सोमो यः सुक्रतुः कविः ॥ ११९९
4 5 1 04 05 a यः सोमः कलशेष्वा अन्तः पवित्र आहितः ।
4 5 1 04 05 b तमिन्दुः परि षस्वजे ॥ १२००
4 5 1 04 06 a प्र वाचमिन्दुरिष्यति समुद्रस्याधि विष्टपि ।
4 5 1 04 06 b जिन्वन्कोशं मधुश्चुतम् ॥ १२०१
4 5 1 04 07 a नित्यस्तोत्रो वनस्पतिर्धेनामन्तः सबर्दुघाम् ।
4 5 1 04 07 b हिन्वानो मानुषा युजा ॥ १२०२
4 5 1 04 08 a आ पवमान धारय रयिꣳ सहस्रवर्चसम् ।
4 5 1 04 08 b अस्मे इन्दो स्वाभुवम् ॥ १२०३
4 5 1 04 09 a अभि प्रिया दिवः कविर्विप्रः स धारया सुतः ।
4 5 1 04 09 b सोमो हिन्वे परावति ॥ १२०४

सूक्त ५

4 5 1 05 01 a उत्ते शुष्मास ईरते सिन्धोरूर्मेरिव स्वनः ।
4 5 1 05 01 b वाणस्य चोदया पविम् ॥ १२०५
4 5 1 05 02 a प्रसवे त उदीरते तिस्रो वाचो मखस्युवः ।
4 5 1 05 02 b यदव्य एषि सानवि ॥ १२०६
4 5 1 05 03 a अव्या वारैः परि प्रियꣳ हरिꣳ हिन्वन्त्यद्रिभिः ।
4 5 1 05 03 b पवमानं मधुश्चुतम् ॥ १२०७
4 5 1 05 04 a आ पवस्व मदिन्तम पवित्रं धारया कवे ।
4 5 1 05 04 b अर्कस्य योनिमासदम् ॥ १२०८
4 5 1 05 05 a स पवस्व मदिन्तम गोभिरञ्जानो अक्तुभिः ।

4 5 1 05 05 b एन्द्रस्य जठरं विश ॥ १२०९

सूक्त ६

4 5 1 06 01 a अया वीती परि स्रव यस्त इन्दो मदेष्वा ।
4 5 1 06 01 b अवाहन्नवतीर्नव ॥ १२१०
4 5 1 06 02 a पुरः सद्य इत्थाधिये दिवोदासाय शंबरम् ।
4 5 1 06 02 b अध त्यं तुर्वशं यदुम् ॥ १२१च्लिस्दर
4 5 1 06 03 a परि नो अश्वमश्वविद्गोमदिन्दो हिरण्यवत् ।
4 5 1 06 03 b क्षरा सहस्रिणीरिषः ॥ १२१२

सूक्त ७

4 5 1 07 01 a अपघ्नन्पवते मृधोऽप सोमो अराव्णः ।
4 5 1 07 01 b गच्छन्निन्द्रस्य निष्कृतम् ॥ १२१३
4 5 1 07 02 a महो नो राय आ भर पवमान जही मृधः ।
4 5 1 07 02 b रास्वेन्दो वीरवद्यशः ॥ १२१४
4 5 1 07 03 a न त्वा शतं च न ह्रुतो राधो दित्सन्तमा मिनन् ।
4 5 1 07 03 b यत्पुनानो मखस्यसे ॥ १२१५

सूक्त ८

4 5 1 08 01 a अया पवस्व धारया यया सूर्यमरोचयः ।
4 5 1 08 01 b हिन्वानो मानुषीरपः ॥ १२१६
4 5 1 08 02 a अयुक्त सूर एतशं पवमानो मनावधि ।
4 5 1 08 02 b अन्तरिक्षेण यातवे ॥ १२१७
4 5 1 08 03 a उत त्या हरितो रथे सूरो अयुक्त यातवे ।
4 5 1 08 03 b इन्दुरिन्द्र इति ब्रुवन् ॥ १२१८

सूक्त ९

4 5 1 09 01 a अग्निं वो देवमग्निभिः सजोषा यजिष्ठं दूतमध्वरे कृणुध्वम् ।
4 5 1 09 01 b यो मर्त्येषु निध्रुविर्ऋतावा तपुर्मूर्धा घृतान्नः पावकः ॥ १२१९
4 5 1 09 02 a प्रोथदश्वो न यवसेऽविष्यन्यदा महः संवरणाद्व्यस्थात् ।
4 5 1 09 02 b आदस्य वातो अनु वाति शोचिरध स्म ते व्रजनं कृष्णमस्ति ॥ १२२०
4 5 1 09 03 a उद्यस्य ते नवजातस्य वृष्णोऽग्ने चरन्त्यजरा इधानाः ।
4 5 1 09 03 b अच्छा द्यामरुषो धूम एषि सं दूतो अग्न ईयसे हि देवान् ॥ १२२१

सूक्त १०

4 5 1 10 01 a तमिन्द्रं वाजयामसि महे वृत्राय हन्तवे ।
4 5 1 10 01 b स वृषा वृषभो भुवत् ॥१२२२
4 5 1 10 02 a इन्द्रः स दामने कृत ओजिष्ठः स बले हितः ।
4 5 1 10 02 b द्युम्नी श्लोकी स सोम्यः ॥१२२३
4 5 1 10 03 a गिरा वज्रो न सम्भृतः सबलो अनपच्युतः ।
4 5 1 10 03 b ववक्ष उग्रो अस्तृतः ॥१२२४

सूक्त ११

4 5 1 11 01 a अध्वर्यो अद्रिभिः सुतꣳ सोमं पवित्र आ नय ।
4 5 1 11 01 b पुनाहीन्द्राय पातवे ॥१२२५
4 5 1 11 02 a तव त्य इन्दो अन्धसो देवा मधोर्व्याशत ।
4 5 1 11 02 b पवमानस्य मरुतः ॥१२२६
4 5 1 11 03 a दिवः पीयूषमुत्तमꣳ सोममिन्द्राय वज्रिणे ।
4 5 1 11 03 b सुनोता मधुमत्तमम् ॥१२२७

सूक्त १२

4 5 1 12 01 a धर्त्ता दिवः पवते कृत्व्यो रसो दक्षो देवानामनुमाद्यो नृभिः ।
4 5 1 12 01 b हरिः सृजानो अत्यो न सत्वभिर्वृथा पाजाꣳसि कृणुषे नदीष्वा ॥१२२८
4 5 1 12 02 a शूरो न धत्त आयुधा गभस्त्योः स्वा३ः सिषासन्नथिरो गविष्टिषु ।
4 5 1 12 02 b इन्द्रस्य शुष्ममीरयन्नपस्युभिरिन्दुर्हिन्वानो अज्यते मनीषिभिः ॥१२२९
4 5 1 12 03 a इन्द्रस्य सोम पवमान ऊर्मिणा तविष्यमाणो जठरेष्वा विश ।
4 5 1 12 03 b प्र नः पिन्व विद्युदभ्रेव रोदसी धिया नो वाजाꣳ उप माहि शश्वतः ॥१२३०

सूक्त १३

4 5 1 13 01 a यदिन्द्र प्रागपागुदङ्न्यग्वा हूयसे नृभिः ।
4 5 1 13 01 b सिमा पुरू नृषूतो अस्यानवेऽसि प्रशर्ध तुर्वशे ॥१२३१
4 5 1 13 02 a यद्वा रुमे रुशमे श्यावके कृप इन्द्र मादयसे सचा ।
4 5 1 13 02 b कण्वासस्त्वा स्तोमेभिर्ब्रह्मवाहस इन्द्रा यच्छन्त्या गहि ॥१२३२

सूक्त १४

4 5 1 14 01 a उभयꣳ शृणवच्च न इन्द्रो अर्वागिदं वचः ।
4 5 1 14 01 b सत्राच्या मघवान्त्सोमपीतये धिया शविष्ठ आ गमत् ॥१२३३
4 5 1 14 02 a तꣳ हि स्वराजं वृषभं तमोजसा धिषणे निष्टतक्षतुः ।
4 5 1 14 02 b उतोपमानां प्रथमो नि षीदसि सोमकामꣳ हि ते मनः ॥१२३४

सूक्त १५

4 5 1 15 01 a पवस्व देव आयुषगिन्द्रं गच्छतु ते मदः ।
4 5 1 15 01 b वायुमा रोह धर्मणा ॥ १२३५
4 5 1 15 02 a पवमान नि तोशसे रयिꣳ सोम श्रवाय्यम् ।
4 5 1 15 02 b इन्दो समुद्रमा विश ॥ १२३६
4 5 1 15 03 a अपघ्नन्पवसे मृधः क्रतुवित्सोम मत्सरः ।
4 5 1 15 03 b नुदस्वादेवयुं जनम् ॥ १२३७

सूक्त १६

4 5 1 16 01 a अभी नो वाजसातमꣳ रयिमर्ष शतस्पृहम् ।
4 5 1 16 01 b इन्दो सहस्रभर्णसं तुविद्युम्नं विभासहम् ॥ १२३८
4 5 1 16 02 a वयं ते अस्य राधसो वसोर्वसो पुरुस्पृहः ।
4 5 1 16 02 b नि नेदिष्ठतमा इषः स्याम सुम्ने ते आध्रिगो ॥ १२३९
4 5 1 16 03 a परि स्य स्वानो अक्षरिदिन्दुरव्ये मदच्युतः ।
4 5 1 16 03 b धारा य ऊर्ध्वो अध्वरे भ्राजा न याति गव्ययुः ॥ १२४०
4 5 1 16 04 a पवस्व सोम महान्त्समुद्रः पिता देवानां विश्वाभि धाम ॥ १२४१
4 5 1 16 05 a शुक्रः पवस्व देवेभ्यः सोम दिवे पृथिव्यै शं च प्रजाभ्यः ॥ १२४२
4 5 1 16 06 a दिवो धर्त्तासि शुक्रः पीयूषः सत्ये विधर्मन्वाजी पवस्व ॥ १२४३

सूक्त १८

4 5 1 18 01 a प्रेष्ठं वो अतिथिꣳ स्तुषे मित्रमिव प्रियम् ।
4 5 1 18 01 b अग्ने रथं न वेद्यम् ॥ १२४४
4 5 1 18 02 a कविमिव प्रशꣳस्यं यं देवास इति द्विता ।
4 5 1 18 02 b नि मर्त्येष्वादधुः ॥ १२४५
4 5 1 18 03 a त्वं यविष्ठ दाशुषो नॄꣳपाहि शृणुही गिरः ।
4 5 1 18 03 b रक्षा तोकमुत त्मना ॥ १२४६

सूक्त १९

4 5 1 19 01 a एन्द्र नो गधि प्रिय सत्राजिदगोह्य ।
4 5 1 19 01 b गिरिर्न विश्वतः पृथुः पतिर्दिवः ॥ १२४७
4 5 1 19 02 a अभि हि सत्य सोमपा उभे बभूथ रोदसी ।
4 5 1 19 02 b इन्द्रासि सुन्वतो वृधः पतिर्दिवः ॥ १२४८
4 5 1 19 03 a त्वꣳ हि शश्वतीनामिन्द्र धर्त्ता पुरामसि ।
4 5 1 19 03 b हन्ता दस्योर्मनोर्वृधः पतिर्दिवः ॥ १२४९

सूक्त २०

4 5 1 20 01 a पुरां भिन्दुर्युवा कविरमितौजा अजायत ।
4 5 1 20 01 b इन्द्रो विश्वस्य कर्मणो धर्त्ता वज्री पुरुष्टुतः ॥ १२५०
4 5 1 20 02 a त्वं वलस्य गोमतोऽपावरद्रिवो बिलम् ।
4 5 1 20 02 b त्वां देवा अबिभ्युषस्तुज्यमानास आविषुः ॥ १२५१
4 5 1 20 03 a इन्द्रमीशानमोजसाभि स्तोमैरनूषत ।
4 5 1 20 03 b सहस्रं यस्य रातय उत वा सन्ति भूयसीः ॥ १२५२

इति पञ्चमप्रपाठके प्रथमोऽर्धः ॥

पञ्चम प्रपाठकः । द्वितीयोऽर्धः

सूक्त १

4 5 2 01 01 a अक्रान्त्समुद्रः प्रथमे विधर्मं जनयन्प्रजा भुवनस्य गोपाः ।
4 5 2 01 01 b वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे स्वानो अद्रिः ॥ १२५३
4 5 2 01 02 a मत्सि वायुमिष्टये राधसे च मत्सि मित्रावरुणा पूयमानः ।
4 5 2 01 02 b मत्सि शर्धो मारुतं मत्सि देवान्मत्सि द्यावापृथिवी देव सोम ॥ १२५४
4 5 2 01 03 a महत्तत्सोमो महिषश्चकारापां यद्गर्भोऽवृणीत देवान् ।
4 5 2 01 03 b अदधादिन्द्रे पवमान ओजोऽजनयत्सूर्ये ज्योतिरिन्दुः ॥ १२५५

सूक्त २

4 5 2 02 01 a एष देवो अमर्त्यः पर्णवीरिव दीयते ।
4 5 2 02 01 b अभि द्रोणान्यासदम् ॥ १२५६
4 5 2 02 02 a एष विप्रैरभिष्टुतोऽपो देवो वि गाहते ।
4 5 2 02 02 b दधद्रत्नानि दाशुषे ॥ १२५७
4 5 2 02 03 a एष विश्वानि वार्या शूरो यन्निव सत्वभिः ।
4 5 2 02 03 b पवमानः सिषासति ॥ १२५८
4 5 2 02 04 a एष देवो रथर्यति पवमानो दिशस्यति ।
4 5 2 02 04 b आविष्कृणोति वग्वनुम् ॥ १२५९
4 5 2 02 05 a एष देवो विपन्युभिः पवमान ऋतायुभिः ।
4 5 2 02 05 b हरिर्वाजाय मृज्यते ॥ १२६०
4 5 2 02 06 a एष देवो विपा कृतोऽति ह्वरांꣳसि धावति ।
4 5 2 02 06 b पवमानो अदाभ्यः ॥ १२६१
4 5 2 02 07 a एष दिवं वि धावति तिरो रजांꣳसि धारया ।
4 5 2 02 07 b पवमानः कनिक्रदत् ॥ १२६२
4 5 2 02 08 a एष दिवं व्यासरत्तिरो रजांꣳस्यस्पृतः ।
4 5 2 02 08 b पवमानः स्वध्वरः ॥ १२६३

4 5 2 02 09 a एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः ।
4 5 2 02 09 b हरिः पवित्रे अर्षति ॥ १२६४
4 5 2 02 10 a एष उ स्य पुरुव्रतो जज्ञानो जनयन्निषः ।
4 5 2 02 10 b धारया पवते सुतः ॥ १२६५

सूक्त ३

4 5 2 03 01 a एष धिया यात्यण्व्य शूरो रथेभिराशुभिः ।
4 5 2 03 01 b गच्छन्निन्द्रस्य निष्कृतम् ॥ १२६६
4 5 2 03 02 a एष पुरू धियायते बृहते देवतातये ।
4 5 2 03 02 b यत्रामृतास आशत ॥ १२६७
4 5 2 03 03 a एतं मृजन्ति मर्ज्यमुप द्रोणेष्वायवः ।
4 5 2 03 03 b प्रचक्राणं महीरिषः ॥ १२६८
4 5 2 03 04 a एष हितो वि नीयतेऽन्तः शुन्ध्यावता पथा ।
4 5 2 03 04 b यदी तुञ्जन्ति भूर्णयः ॥ १२६९
4 5 2 03 05 a एष रुक्मिभिरीयते वाजि शुभ्रेभिरꣳशुभिः ।
4 5 2 03 05 b पतिः सिन्धूनां भवन् ॥ १२७०
4 5 2 03 06 a एष शृङ्गाणि दोधुवच्छिशीते यूथ्यो३ वृषा ।
4 5 2 03 06 b नृम्णा दधान ओजसा ॥ १२७१
4 5 2 03 07 a एष वसूनि पिब्दनः परुषा ययिवाꣳ अति ।
4 5 2 03 07 b अव शादेषु गच्छति ॥ १२७२
4 5 2 03 08 a एतमु त्यं दश क्षिपो हरिꣳ हिवन्ति यातवे ।
4 5 2 03 08 b स्वायुधं मदिन्तमम् ॥ १२७३

सूक्त ४

4 5 2 04 01 a एष उ स्य वृषा रथोऽव्या वारेभिरव्यत ।
4 5 2 04 01 b गच्छन्वाजꣳ सहस्रिणम् ॥ १२७४
4 5 2 04 02 a एतं त्रितस्य योषणो हरिꣳ हिन्वन्त्यद्रिभिः ।
4 5 2 04 02 b इन्दुमिन्द्राय पीतये ॥ १२७५
4 5 2 04 03 a एष स्य मानुषीष्वा श्येनो न विक्षु सीदति ।
4 5 2 04 03 b गच्छं जारो न योषितम् ॥ १२७६
4 5 2 04 04 a एष स्य मद्यो रसोऽव चष्टे दिवः शिशुः ।
4 5 2 04 04 b य इन्दुर्वारमाविशत् ॥ १२७७
4 5 2 04 05 a एष स्य पीतये सुतो हरिरर्षति धर्णसिः ।
4 5 2 04 05 b क्रन्दन्योनिमभि प्रियम् ॥ १२७८
4 5 2 04 06 a एतं त्यꣳ हरितो दश मर्मृज्यन्ते अपस्युवः ।
4 5 2 04 06 b याभिर्मदाय शुम्भते ॥ १२७९

सूक्त ५

4 5 2 05 01 a एष वाजी हितो नृभिर्विश्वविन्मनसस्पतिः ।
4 5 2 05 01 b अव्यो वारं वि धावति ॥ १२८०
4 5 2 05 02 a एष पवित्रे अक्षरत्सोमो देवेभ्यः सुतः ।
4 5 2 05 02 b विश्वा धामान्याविशन् ॥ १२८१
4 5 2 06 03 a एष देवः शुभायतेऽधि योनावमर्त्यः ।
4 5 2 06 03 b वृत्रहा देववीतमः ॥ १२८२
4 5 2 07 04 a एष वृषा कनिक्रदद्दशभिर्जामिभिर्यतः ।
4 5 2 07 04 b अभि द्रोणानि धावति ॥ १२८३
4 5 2 08 05 a एष सूर्यमरोचयत्पवमानो अधि द्यवि ।
4 5 2 08 05 b पवित्रे मत्सरो मदः ॥ १२८४
4 5 2 09 06 a एष सूर्येण हासते संवसानो विवस्वता ।
4 5 2 09 06 b पतिर्वाचो अदाभ्यः ॥ १२८५

सूक्त ६

4 5 2 06 01 a एष कविरभिष्टुतः पवित्रे अधि तोशते ।
4 5 2 06 01 b पुनानो घ्नन्नप द्विषः ॥ १२८६
4 5 2 06 02 a एष इन्द्राय वायवे स्वर्जित्परि षिच्यते ।
4 5 2 06 02 b पवित्रे दक्षसाधनः ॥ १२८७
4 5 2 06 03 a एष नृभिर्वि नीयते दिवो मूर्धा वृषा सुतः ।
4 5 2 06 03 b सोमो वनेषु विश्ववित् ॥ १२८८
4 5 2 06 04 a एष गव्युरचिक्रदत्पवमानो हिरण्ययुः ।
4 5 2 06 04 b इन्दुः सत्राजिदस्तृतः ॥ १२८९
4 5 2 06 05 a एष शुष्म्यसिष्यददन्तरिक्षे वृषा हरिः ।
4 5 2 06 05 b पुनान इन्दुरिन्द्रमा ॥ १२९०
4 5 2 06 06 a एष शुष्म्यदाभ्यः सोमः पुनानो अर्षति ।
4 5 2 06 06 b देवावीरघशꣳसहा ॥ १२९१

सूक्त ७

4 5 2 07 01 a स सुतः पीतये वृषा सोमः पवित्रे अर्षति ।
4 5 2 07 01 b विघ्नन्रक्षाꣳसि देवयुः ॥ १२९२
4 5 2 07 02 a स पवित्रे विचक्षणो हरिरर्षति धर्णसिः ।
4 5 2 07 02 b अभि योनिं कनिक्रदत् ॥ १२९३
4 5 2 07 03 a स वाजी रोचना दिवः पवमानो वि धावति ।
4 5 2 07 03 b रक्षोहा वारमव्ययम् ॥ १२९४
4 5 2 07 04 a स त्रितस्याधि सानवि पवमानो अरोचयत् ।
4 5 2 07 04 b जामिभिः सूर्यꣳ सह ॥ १२९५

4 5 2 07 05 a स वृत्रहा वृषा सुतो वरिवोविददाभ्यः ।
4 5 2 07 05 b सोमो वाजमिवासरत् ॥ १२९६
4 5 2 07 06 a स देवः कविनेषितो३ऽभि द्रोणानि धावति ।
4 5 2 07 06 b इन्दुरिन्द्राय मꣳहयन् ॥ १२९७

सूक्त ८

4 5 2 08 01 a यः पावमानीरध्येत्यृषिभिः सम्भृतꣳ रसम् ।
4 5 2 08 01 b सर्वꣳ स पूतमश्नाति स्वदितं मातरिश्वना ॥ १२९८
4 5 2 08 02 a पावमानीर्यो अध्येत्यृषिभिः सम्भृतꣳ रसम् ।
4 5 2 08 02 b तस्मै सरस्वती दुहे क्षीरꣳ सर्पिर्मधूदकम् ॥ १२९९
4 5 2 08 03 a पावमानीः स्वस्त्ययनीः सुदुघा हि घृतश्चुतः ।
4 5 2 08 03 b ऋषिभिः संभृतो रसो ब्राह्मणेष्वमृतꣳ हितम् ॥ १३००
4 5 2 08 04 a पावमानीर्दधन्तु न इमं लोकमथो अमुम् ।
4 5 2 08 04 b कामान्त्समर्धयन्तु नो देवीर्देवैः समाहृताः ॥ १३०१
4 5 2 08 05 a येन देवाः पवित्रेणात्मानं पुनते सदा ।
4 5 2 08 05 b तेन सहस्रधारेण पावमानीः पुनन्तु नः ॥ १३०२
4 5 2 08 06 a पावमानीः स्वस्त्ययनीस्ताभिर्गच्छति नान्दनम् ।
4 5 2 08 06 b पुण्याꣳश्च भक्षान्भक्षयत्यमृतत्वं च गच्छति ॥ १३०३

सूक्त ९

4 5 2 09 01 a अगन्म महा नमसा यविष्ठं यो दीदाय समिद्धः स्वे दुरोणे ।
4 5 2 09 01 b चित्रभानुꣳ रोदसी अन्तरुर्वी स्वाहुतं विश्वतः प्रत्यञ्चम् ॥ १३०४
4 5 2 09 02 a स मह्ना विश्वा दुरितानि साह्वानग्नि ष्टवे दम आ जातवेदाः ।
4 5 2 09 02 b स नो रक्षिषद्दुरितादवद्यादस्मान्गृणत उत नो मघोनः ॥ १३०५
4 5 2 09 03 a त्वं वरुण उत मित्रो अग्ने त्वां वर्धन्ति मतिभिर्वसिष्ठाः ।
4 5 2 09 03 b त्वे वसु सुषणनानि सन्तु यूयं पात स्वस्तिभिः सदा नः ॥ १३०६

सूक्त १०

4 5 2 10 01 a महाꣳ इन्द्रो य ओजसा पर्जन्यो वृष्टिमाꣳ इव ।
4 5 2 10 01 b स्तोमैर्वत्सस्य वावृधे ॥ १३०७
4 5 2 10 01 a कण्वा इन्द्रं यदक्रत स्तोमैर्यज्ञस्य साधनम् ।
4 5 2 10 01 b जामि ब्रुवत आयुधा ॥ १३०८
4 5 2 10 01 a प्रजामृतस्य पिप्रतः प्र यद्भरन्त वह्नयः ।
4 5 2 10 01 b विप्रा ऋतस्य वाहसा ॥ १३०९

सूक्त ११

4 5 2 11 01 a पवमानस्य जिघ्नतो हरेश्चन्द्रा असृक्षत ।
4 5 2 11 01 b जीरा अजिरशोचिषः ॥ १३१०
4 5 2 11 02 a पवमानो रथीतमः शुभ्रेभिः शुभ्रशस्तमः ।
4 5 2 11 02 b हरिश्चन्द्रो मरुद्गणः ॥ १३११
4 5 2 11 03 a पवमान व्यश्नुहि रश्मिभिर्वाजसातमः ।
4 5 2 11 03 b दधत्स्तोत्रे सुवीर्यम् ॥ १३१२

सूक्त १२

4 5 2 12 01 a परीतो षिञ्चता सुतꣳ सोमो य उत्तमꣳ हविः ।
4 5 2 12 01 b दधन्वाꣳ यो नर्यो अप्स्वाꣳन्तरा सुषाव सोममद्रिभिः ॥ १३१३
4 5 2 12 02 a नूनं पुनानोऽविभिः परि स्रवादब्धः सुरभिन्तरः ।
4 5 2 12 02 b सुते चित्वाप्सु मदामो अन्धसा श्रीणन्तो गोभिरुत्तरम् ॥ १३१४
4 5 2 12 03 a परि स्वानश्चक्षसे देवमादनः क्रतुरिन्दुर्विचक्षणः ॥ १३१५

सूक्त १३

4 5 2 13 01 a असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अचिक्रदत् ।
4 5 2 13 01 b पुनानो वारमत्येष्यव्ययꣳ श्येनो न योनिं घृतवन्तमासदत् ॥ १३१६
4 5 2 13 02 a पर्जन्यः पिता महिषस्य पर्णिनो नाभा पृथिव्या गिरिषु क्षयं दधे ।
4 5 2 13 02 b स्वसार आपो अभि गा उदासरन्त्सं ग्रावभिर्वसते वीते अध्वरे ॥ १३१७
4 5 2 13 03 a कविर्वेधस्या पर्येषि माहिनमत्यो न मृष्टो अभि वाजमर्षसि ।
4 5 2 13 03 b अपसेधन्दुरिता सोम नो मृड घृता वसानः परि यासि निर्णिजम् ॥ १३१८

सूक्त १४

4 5 2 14 01 a श्रायन्त इव सूर्यं विश्वेदिन्द्रस्य भक्षत ।
4 5 2 14 01 b वसूनि जातो जनिमान्योजसा प्रति भागं न दीधिमः ॥ १३१९
4 5 2 14 02 a अलर्षिरातिं वसुदामुप स्तुहि भद्रा इन्द्रस्य रातयः ।
4 5 2 14 02 b यो अस्य कामं विधतो न रोषति मनो दानाय चोदयन् ॥ १३२०

सूक्त १५

4 5 2 15 01 a यत इन्द्र भयामहे ततो नो अभयं कृधि ।
4 5 2 15 01 b मघवञ्छग्धि तव तन्न ऊतये वि द्विषो वि मृधो जहि ॥ १३२१
4 5 2 15 02 a त्वꣳ हि राधस्पते राधसो महः क्षयस्यासि विधत्ता ।
4 5 2 15 02 b तं त्वा वयं मघवन्निन्द्र गिर्वणः सुतावन्तो हवामहे ॥ १३२२

सूक्त १६

4 5 2 16 01 a त्वꣳ सोमासि धारयुर्मन्द्र ओजिष्ठो अध्वरे ।
4 5 2 16 01 b पवस्व मꣳहयद्रयिः ॥ १३२३
4 5 2 16 02 a त्वꣳ सुतो मदिन्तमो दधन्वान्मत्सरिन्तमः ।
4 5 2 16 02 b इन्दुः सत्राजिदस्तृतः ॥ १३२४
4 5 2 16 03 a त्वꣳ सुष्वाणो अद्रिभिरभ्यर्ष कनिक्रदत् ।
4 5 2 16 03 b द्युमन्तꣳ शुष्मा भर ॥ १३२५

सूक्त १७

4 5 2 17 01 a पवस्व देववीतय इन्दो धाराभिरोजसा ।
4 5 2 17 01 b आ कलशं मधुमान्त्सोम नः सदः ॥ १३२६
4 5 2 17 02 a तव द्रप्सा उदप्रुत इन्द्रं मदाय वावृधुः ।
4 5 2 17 02 b त्वां देवासो अमृताय कं पपुः ॥ १३२७
4 5 2 17 03 a आ नः सुतास इन्दवः पुनाना धावता रयिम् ।
4 5 2 17 03 b वृष्टिद्यावो रीत्यापः स्वर्विदः ॥ १३२८

सूक्त १८

4 5 2 18 01 a परि त्यꣳ हर्यतꣳ हरिं बभ्रुं पुनन्ति वारेण ।
4 5 2 18 01 b यो देवान्विश्वाꣳ इत्परि मदेन सह गच्छति ॥ १३२९
4 5 2 18 02 a द्विर्यं पञ्च स्वयशसꣳ सखायो अद्रिसꣳहतम् ।
4 5 2 18 02 b प्रियमिन्द्रस्य काम्यं प्रस्नापयन्त ऊर्मयः ॥ १३३०
4 5 2 18 03 a इन्द्राय सोम पातवे वृत्रघ्ने परि षिच्यसे ।
4 5 2 18 03 b नरे च दक्षिणावते वीराय सदनासदे ॥ १३३१

सूक्त १९

4 5 2 19 01 a पवस्व सोम महे दक्षायाश्वो न निक्तो वाजी धनाय ॥ १३३२
4 5 2 19 02 a प्र ते सोतारो रसं मदाय पुनन्ति सोमं महे द्युम्नाय ॥ १३३३
4 5 2 19 03 a शिशुं जज्ञानꣳ हरिं मृजन्ति पवित्रे सोमं देवेभ्य इन्दुम् ॥ १३३४

सूक्त २०

4 5 2 20 01 a उषो षु जातमप्तुरं गोभिर्भङ्गं परिष्कृतम् ।
4 5 2 20 01 b इन्दुं देवा अयासिषुः ॥ १३३५
4 5 2 20 02 a तमिद्वर्धन्तु नो गिरो वत्सꣳ सꣳशिश्वरीरिव ।
4 5 2 20 02 b य इन्द्रस्य हृदꣳसनिः ॥ १३३६
4 5 2 20 03 a अर्षा नः सोम शं गवे धुक्षस्व पिप्युषीमिषम् ।
4 5 2 20 03 b वर्धा समुद्रमुक्थ्यम् ॥ १३३७

सूक्त २१

4 5 2 21 01 a आ घा ये अग्निमिन्धते स्तृणन्ति बर्हिरानुषक् ।
4 5 2 21 01 b येषामिन्द्रो युवा सखा ॥१३३८
4 5 2 21 02 a बृहन्निदिध्म एषां भूरि शस्त्रं पृथुः स्वरुः ।
4 5 2 21 02 b येषामिन्द्रो युवा सखा ॥१३३९
4 5 2 21 03 a अयुद्ध इद्युधा वृतꣳ शूर आजति सत्वभिः ।
4 5 2 21 03 b येषामिन्द्रो युवा सखा ॥१३४०

सूक्त २२

4 5 2 22 01 a य एक इद्विदयते वसु मर्त्ताय दाशुषे ।
4 5 2 22 01 b ईशानो अप्रतिष्कुत इन्द्रो अङ्ग ॥१३४१
4 5 2 22 02 a यश्चिद्धि त्वा बहुभ्य आ सुतावाꣳ आविवासति ।
4 5 2 22 02 b उग्रं तत्पत्यते शव इन्द्रो अङ्ग ॥१३४२
4 5 2 22 03 a कदा मर्त्तमराधसं पदा क्षुम्पमिव स्फुरत् ।
4 5 2 22 03 b कदा नः शुश्रवद्गिर इन्द्रो अङ्ग ॥१३४३

सूक्त २३

4 5 2 23 01 a गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः ।
4 5 2 23 01 b ब्रह्माणस्त्वा शतक्रत उद्वꣳशमिव येमिरे ॥१३४४
4 5 2 23 02 a यत्सानोः सान्वारुहो भूर्यस्पष्ट कर्त्त्वम् ।
4 5 2 23 02 b तदिन्द्रो अर्थं चेतति यूथेन वृष्णिरेजति ॥१३४५
4 5 2 23 03 a युङ्क्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा ।
4 5 2 23 03 b अथा न इन्द्र सोमपा गिरामुपश्रुतिं चर ॥१३४६

इति पञ्चमप्रपाठके द्वितीयोऽर्धः ॥

इति पञ्चमः प्रपाठकश्च समाप्तः ॥

षष्ठ प्रपाठकः । प्रथमोऽर्धः

सूक्त १

4 6 1 01 01 a सुषमिद्धो न आ वह देवाꣳ अग्ने हविष्मते ।
4 6 1 01 01 b होतः पावक यक्षि च ॥१३४७
4 6 1 01 02 a मधुमन्तं तनूनपाद्यज्ञं देवेषु नः कवे ।
4 6 1 01 02 b अद्या कृणुह्यूतये ॥१३४८
4 6 1 01 03 a नराशꣳसमिह प्रियमस्मिन्यज्ञ उप ह्वये ।

4 6 1 01 03 b मधुजिह्वꣳ हविष्कृतम् ॥ १३४९
4 6 1 01 04 a अग्ने सुखतमे रथे देवाꣳ ईडित आ वह ।
4 6 1 01 04 b असि होता मनुर्हितः ॥ १३५०

सूक्त २

4 6 1 02 01 a यदद्य सूर उदितेऽनागा मित्रो अर्यमा ।
4 6 1 02 01 b सुवाति सविता भगः ॥ १३५१
4 6 1 02 02 a सुप्रावीरस्तु स क्षयः प्र नु यामन्त्सुदानवः ।
4 6 1 02 02 b ये नो अꣳहोऽतिपिप्रति ॥ १३५२
4 6 1 02 03 a उत स्वराजो अदितिरदब्धस्य व्रतस्य ये ।
4 6 1 02 03 b महो राजान ईशते ॥ १३५३

सूक्त ३

4 6 1 03 01 a उ त्वा मन्दन्तु सोमाः कृणुष्व राधो अद्रिवः ।
4 6 1 03 01 b अव ब्रह्मद्विषो जहि ॥ १३५४
4 6 1 03 02 a पदा पणीनराधसो नि बाधस्व महाꣳ असि ।
4 6 1 03 02 b न हि त्वा कश्च न प्रति ॥ १३५५
4 6 1 03 03 a त्वमीशिषे सुतानामिन्द्र त्वमसुतानाम् ।
4 6 1 03 03 b त्वꣳ राजा जनानाम् ॥ १३५६

सूक्त ४

4 6 1 04 01 a आ जागृविर्विप्र ऋतां मतीनाꣳ सोमः पुनानो असदच्चमूषु ।
4 6 1 04 01 b सपन्ति यं मिथुनासो निकामा अध्वर्यवो रथिरासः सुहस्ताः ॥ १३५७
4 6 1 04 02 a स पुनान उप सूरे दधान ओभे अप्रा रोदसी वि ष आवः ।
4 6 1 04 02 b प्रिया चिद्यस्य प्रियसास ऊती सतो धनं कारिणे न प्र यꣳसत् ॥ १३५८
4 6 1 04 03 a स वर्धिता वर्धनः पूयमानः सोमो मीढ्वाꣳ अभि नो ज्योतिषावीत् ।
4 6 1 04 03 b यत्र नः पूर्वे पितरः पदज्ञाः स्वर्विदो अभि गा अद्रिमिष्णन् ॥ १३५९

सूक्त ५

4 6 1 05 01 a मा चिदन्यद्वि शꣳसत सखायो मा रिषण्यत ।
4 6 1 05 01 b इन्द्रमित्स्तोता वृषणꣳ सचा सुते मुहुरुक्था च शꣳसत ॥ १३६०
4 6 1 05 02 a अवक्रक्षिणं वृषभं यथा जुवं गां न चर्षणीसहम् ।
4 6 1 05 02 b विद्वेषणꣳ संवननमुभयङ्करं मꣳहिष्ठमुभयाविनम् ॥ १३६१

सूक्त ६

4 6 1 06 01 a उदु त्ये मधुमत्तमा गिर स्तोमास ईरते ।
4 6 1 06 01 b सत्राजितो धनसा अक्षितोतयो वाजन्तो रथा इव ॥ १३६२
4 6 1 06 02 a कण्वा इव भृगवः सूर्या इव विश्वमिद्धीतमाशत ।
4 6 1 06 02 b इन्द्रꣳ स्तोमेभिर्महयन्त आयवः प्रियमेधासो अस्वरन् ॥ १३६३

सूक्त ७

4 6 1 07 01 a पर्यू षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः ।
4 6 1 07 01 b द्विषस्तरध्या ऋणया न ईरसे ॥ १३६४
4 6 1 07 02 a अजीजनो हि पवमान सूर्यं विधारे शक्मना पयः ।
4 6 1 07 02 b गोजीरया रꣳहमानः पुरन्ध्या ॥ १३६५
4 6 1 07 03 a अनु हि त्वा सुतꣳ सोम मदामसि महे समर्यराज्ये ।
4 6 1 07 03 b वाजाꣳ अभि पवमान प्र गाहसे ॥ १३६६

सूक्त ८

4 6 1 08 01 a परि प्र धन्वेन्द्राय सोम स्वादुर्मित्राय पूष्णे भगाय ॥ १३६७
4 6 1 08 02 a एवामृताय महे क्षयाय स शुक्रो अर्ष दिव्यः पीयूषः ॥ १३६८
4 6 1 08 03 a इन्द्रस्ते सोम सुतस्य पेयात्क्रत्वे दक्षाय विश्वे च देवाः ॥ १३६९

सूक्त ९

4 6 1 09 01 a सूर्यस्येव रश्मयो द्रावयित्नवो मत्सरासः प्रसुतः साकमीरते ।
4 6 1 09 01 b तन्तुं ततं परि सर्गास आशवो नेन्द्रादृते पवते धाम किं चन ॥ १३७०
4 6 1 09 02 a उपो मतिः पृच्यते सिच्यते मधु मन्द्राजनी चोदते अन्तरासनि ।
4 6 1 09 02 b पवमानः सन्तनिः सुन्वतामिव मधुमान्द्रप्सः परि वारमर्षति ॥ १३७१
4 6 1 09 03 a उक्षा मिमेति प्रति यन्ति धेनवो देवस्य देवीरुप यन्ति निष्कृतम् ।
4 6 1 09 03 b अत्यक्रमीदर्जुनं वारमव्ययमत्कं न निक्तं परि सोमो अव्यत ॥ १३७२

सूक्त १०

4 6 1 10 01 a अग्निं नरो दीधितिभिररण्योर्हस्तच्युतं जनयत प्रशस्तम् ।
4 6 1 10 01 b दूरेदृशं गृहपतिमथव्युम् ॥ १३७३
4 6 1 10 02 a तमग्निमस्ते वसवो न्यृण्वन्त्सुप्रतिचक्षमवसे कुतश्चित् ।
4 6 1 10 02 b दक्षाय्यो यो दम आस नित्यः ॥ १३७४
4 6 1 10 03 a प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ ।
4 6 1 10 03 b त्वाꣳ शश्वन्त उप यन्ति वाजाः ॥ १३७५

सूक्त ११

4 6 1 11 01 a आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः ।
4 6 1 11 01 b पितरं च प्रयन्त्स्वः ॥ १३७६
4 6 1 11 02 a अन्तश्चरति रोचनास्य प्राणादपानती ।
4 6 1 11 02 b व्यख्यन्महिषो दिवम् ॥ १३७७
4 6 1 11 03 a त्रिꣳशद्धाम वि राजति वाक्पतङ्गाय धीयते ।
4 6 1 11 03 b प्रति वस्तोरह द्युभिः ॥ १३७८

इति षष्ठप्रपाठके प्रथमोऽर्धः ॥

षष्ठ प्रपाठकः । द्वितीयोऽर्धः

सूक्त १

4 6 2 01 01 a उपप्रयन्तो अध्वरं मन्त्रं वोचेमाग्नये ।
4 6 2 01 01 b आरे अस्मे च शृण्वते ॥ १३७९
4 6 2 01 02 a यः स्नीहितीषु पूर्व्यः संजग्मानासु कृष्टिषु ।
4 6 2 01 02 b अरक्षद्दाशुषे गयम् ॥ १३८०
4 6 2 01 03 a स नो वेदो अमात्यमग्नी रक्षतु शन्तमः ।
4 6 2 01 03 b उतास्मान्पात्वꣳहसः ॥ १३८१
4 6 2 01 04 a उत ब्रुवन्तु जन्तव उदग्निर्वृत्रहाजनि ।
4 6 2 01 04 b धनञ्जयो रणेरणे ॥ १३८२

सूक्त २

4 6 2 02 01 a अग्ने युङ्क्ष्वा हि ये तवाश्वासो देव साधवः ।
4 6 2 02 01 b अरं वहन्त्याशवः ॥ १३८३
4 6 2 02 02 a अच्छा नो याह्या वहाभि प्रयाꣳसि वीतये ।
4 6 2 02 02 b आ देवान्त्सोमपीतये ॥ १३८४
4 6 2 02 03 a उदग्ने भारत द्युमदजस्रेण दविद्युतत् ।
4 6 2 02 03 b शोचा वि भाह्यजर ॥ १३८५

सूक्त ३

4 6 2 03 01 a प्र सुन्वानायान्धसो मर्त्तो न वष्ट तद्वचः ।
4 6 2 03 01 b अप श्वानमराधसꣳ हता मखं न भृगवः ॥ १३८६
4 6 2 03 02 a आ जामिरत्के अव्यत भुजे न पुत्र ओण्योः ।
4 6 2 03 02 b सरज्जारो न योषणां वरो न योनिमासदम् ॥ १३८७
4 6 2 03 03 a स वीरो दक्षसाधनो वि यस्तस्तम्भ रोदसी ।
4 6 2 03 03 b हरिः पवित्रे अव्यत वेधा न योनिमासदम् ॥ १३८८

सूक्त ४

4 6 2 04 01 a अभ्रातृव्यो अना त्वमनापिरिन्द्र जनुषा सनादसि ।
4 6 2 04 01 b युधेदापित्वमिच्छसे ॥ १३८९
4 6 2 04 02 a न की रेवन्तꣳ सख्याय विन्दसे पीयन्ति ते सुराश्वः ।
4 6 2 04 02 b यदा कृणोषि नदनुꣳ समूहस्यादित्पितेव हूयसे ॥ १३९०

सूक्त ५

4 6 2 05 01 a आ त्वा सहस्रमा शतं युक्ता रथे हिरण्यये ।
4 6 2 05 01 b ब्रह्मयुजो हरय इन्द्र केशिनो वहन्तु सोमपीतये ॥ १३९१
4 6 2 05 02 a आ त्वा रथे हिरण्यये हरी मयूरशेप्या ।
4 6 2 05 02 b शितिपृष्ठा वहतां मध्वो अन्धसो विवक्षणस्य पीतये ॥ १३९२
4 6 2 05 03 a पिबा त्वा३स्य गिर्वणः सुतस्य पूर्वपा इव ।
4 6 2 05 03 b परिष्कृतस्य रसिन इयमासुतिश्चारुर्मदाय पत्यते ॥ १३९३

सूक्त ६

4 6 2 06 01 a आ सोता परि षिञ्चताश्वं न स्तोममप्तुरꣳ रजस्तुरम् ।
4 6 2 06 01 b वनप्रक्षमुदप्रुतम् ॥ १३९४
4 6 2 06 02 a सहस्रधारं वृषभं पयोदुहं प्रियं देवाय जन्मने ।
4 6 2 06 02 b ऋतेन य ऋतजातो विवावृधे राजा देव ऋतं बृहत् ॥ १३९५

सूक्त ७

4 6 2 07 01 a अग्निर्वृत्राणि जङ्घनद्द्रविणस्युर्विपन्यया ।
4 6 2 07 01 b समिद्धः शुक्र आहुतः ॥ १३९६
4 6 2 07 02 a गर्भे मातुः पितुष्पिता विदिद्युतानो अक्षरे ।
4 6 2 07 02 b सीदन्नृतस्य योनिमा ॥ १३९७
4 6 2 07 03 a ब्रह्म प्रजावदा भर जातवेदो विचर्षणे ।
4 6 2 07 03 b अग्ने यद्दीदयद्दिवि ॥ १३९८

सूक्त ८

4 6 2 08 01 a अस्य प्रेषा हेमना पूयमानो देवो देवेभिः समपृक्त रसम् ।
4 6 2 08 01 b सुतः पवित्रं पर्येति रेभन्मितेव सद्म पशुमन्ति होता ॥ १३९९
4 6 2 08 02 a भद्रा वस्त्रा समन्याऽऽ३ वसानो महान्कविर्निवचनानि शꣳसन् ।
4 6 2 08 02 b आ वच्यस्व चम्वोः पूयमानो विचक्षणो जागृविर्देववीतौ ॥ १४००
4 6 2 08 03 a समु प्रियो मृज्यते सानो अव्ये यशस्तरो यशसां क्षैतो अस्मे ।
4 6 2 08 03 b अभि स्वर धन्वा पूयमानो यूयं पात स्वस्तिभिः सदा नः ॥ १४०१

सूक्त ९

4 6 2 09 01 a एतो न्विन्द्रꣳ स्तवाम शुद्धꣳ शुद्धेन साम्ना ।
4 6 2 09 01 b शुद्धैरुक्थैर्वावृध्वाꣳसꣳ शुद्धैराशीर्वान्ममत्तु ॥ १४०२
4 6 2 09 02 a इन्द्र शुद्धो न आ गहि शुद्धः शुद्धाभिरूतिभिः ।
4 6 2 09 02 b शुद्धो रयिं नि धारय शुद्धो ममद्धि सोम्य ॥ १४०३
4 6 2 09 03 a इन्द्र शुद्धो हि नो रयिꣳ शुद्धो रत्नानि दाशुषे ।
4 6 2 09 03 b शुद्धो वृत्राणि जिघ्नसे शुद्धो वाजꣳ सिषाससि ॥ १४०४

सूक्त १०

4 6 2 10 01 a अग्ने स्तोमं मनामहे सिध्रमद्य दिविस्पृशः ।
4 6 2 10 01 b देवस्य द्रविणस्यवः ॥ १४०५
4 6 2 10 02 a अग्निर्जुषत नो गिरो होता यो मानुषेष्वा ।
4 6 2 10 02 b स यक्षद्दैव्यं जनम् ॥ १४०६
4 6 2 10 03 a त्वमग्ने सप्रथा असि जुष्टो होता वरेण्यः ।
4 6 2 10 03 b त्वया यज्ञं वि तन्वते ॥ १४०७

सूक्त ११

4 6 2 11 01 a अभि त्रिपृष्ठं वृषणं वयोधामाङ्गोषिणमवावशंत वाणीः ।
4 6 2 11 01 b वना वसानो वरुणो न सिन्धूर्वि रत्नधा दयते वार्याणि ॥ १४०८
4 6 2 11 02 a शूरग्रामः सर्ववीरः सहावाञ्जेता पवस्व सनिता धनानि ।
4 6 2 11 02 b तिग्मायुधः क्षिप्रधन्वा समत्स्वषाढः साह्वान्पृतनासु शत्रून् ॥ १४०९
4 6 2 11 03 a उरुगव्यूतिरभयानि कृण्वन्त्समीचीने आ पवस्वा पुरन्धी ।
4 6 2 11 03 b अपः सिषासन्नुषसः स्वा३र्गाः सं चिक्रदो महो अस्मभ्यं वाजान् ॥ १४१०

सूक्त १२

4 6 2 12 01 a त्वमिन्द्र यशा अस्यृजीषी शवसस्पतिः ।
4 6 2 12 01 b त्वं वृत्राणि हꣳस्यप्रतीन्येक इत्पुर्वनुत्तश्चर्षणीधृतिः ॥ १४११
4 6 2 12 02 a तमु त्वा नूनमसुर प्रचेतसꣳ राधो भागमिवेमहे ।
4 6 2 12 02 b महीव कृत्तिः शरणा त इन्द्र प्र ते सुम्ना नो अश्नवन् ॥ १४१२

सूक्त १३

4 6 2 13 01 a यजिष्ठं त्वा ववृमहे देवं देवत्रा होतारममर्त्यम् ।
4 6 2 13 01 b अस्य यज्ञस्य सुक्रतुम् ॥ १४१३
4 6 2 13 02 a अपां नपातꣳ सुभगꣳ सुदीदितिमग्निमु श्रेष्ठशोचिषम् ।

4 6 2 13 02 b स नो मित्रस्य वरुणस्य सो अपामा सुम्नं यक्षते दिवि ॥१४१४

सूक्त १४

4 6 2 14 01 a यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः ।
4 6 2 14 01 b स यन्ता शश्वतीरिषः ॥१४१५
4 6 2 14 02 a न किरस्य सहन्त्य पर्येता कयस्य चित् ।
4 6 2 14 02 b वाजो अस्ति श्रवाय्यः ॥१४१६
4 6 2 14 03 a स वाजं विश्वचर्षणिरर्वद्भिरस्तु तरुता ।
4 6 2 14 03 b विप्रेभिरस्तु सनिता ॥१४१७

सूक्त १५

4 6 2 15 01 a साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः ।
4 6 2 15 01 b हरिः पर्यद्रवज्जाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी ॥१४१८
4 6 2 15 02 a सं मातृभिर्न शिशुर्वावशानो वृषा दधन्वे पुरुवारो अद्भिः ।
4 6 2 15 02 b मर्यो न योषामभि निष्कृतं यन्त्सं गच्छते कलश उस्रियाभिः ॥१४१९
4 6 2 15 03 a उत प्र पिप्य ऊधरघ्न्याया इन्दुर्धाराभिः सचते सुमेधाः ।
4 6 2 15 03 b मूर्धानं गावः पयसा चमूष्वभि श्रीणन्ति वसुभिर्न निक्तैः ॥१४२०

सूक्त १६

4 6 2 16 00 a पिबा सुतस्य रसिनो मत्स्वा न इन्द्र गोमतः ।
4 6 2 16 00 b आपिर्नो बोधि सधमाद्ये वृधे३ऽस्माँ अवन्तु ते धियः ॥१४२१
4 6 2 16 00 a भूयाम ते सुमतौ वाजिनो वयं मा न स्तरभिमातये ।
4 6 2 16 00 b अस्मां चित्राभिरवतादभिष्टिभिरा नः सुम्नेषु यामय ॥१४२२

सूक्त १७

4 6 2 17 01 a त्रिरस्मै सप्त धेनवो दुदुह्रिरे सत्यामाशिरं परमे व्योमनि ।
4 6 2 17 01 b चत्वार्यन्या भुवनानि निर्णिजे चारूणि चक्रे यदृतैरवर्धत ॥१४२३
4 6 2 17 02 a स भक्षमाणो अमृतस्य चारुण उभे द्यावा काव्येना वि शश्रथे ।
4 6 2 17 02 b तेजिष्ठा अपो मंहना परि व्यत यदी देवस्य श्रवसा सदो विदुः ॥१४२४
4 6 2 17 03 a ते अस्य सन्तु केतवोऽमृत्यवोऽदाभ्यासो जनुषी उभे अनु ।
4 6 2 17 03 b येभिर्नृम्णा च देव्या च पुनत आदिद्राजानं मनना अगृभ्णत ॥१४२५

सूक्त १८

4 6 2 18 01 a अभि वायुं वीत्यर्षा गृणानो३ऽभि मित्रावरुणा पूयमानः ।
4 6 2 18 01 b अभी नरं धीजवनं रथेष्ठामभीन्द्रं वृषणं वज्रबाहुम् ॥१४२६

4 6 2 18 02 a अभि वस्त्रा सुवसनान्यर्षाभि धेनूः सुदुघाः पूयमानः ।
4 6 2 18 02 b अभि चन्द्रा भर्त्तवे नो हिरण्याभ्यश्वान्रथिनो देव सोम ॥ १४२७
4 6 2 18 03 a अभी नो अर्ष दिव्या वसून्यभि विश्वा पार्थिवा पूयमानः ।
4 6 2 18 03 b अभि येन द्रविणमश्नवामाभ्यार्षेयं जमदग्निवन्नः ॥ १४२८

सूक्त १९

4 6 2 19 01 a यज्जायथा अपूर्व्य मघवन्वृत्रहत्याय ।
4 6 2 19 01 b तत्पृथिवीमप्रथयस्तदस्तभ्ना उतो दिवम् ॥ १४२९
4 6 2 19 02 a तत्ते यज्ञो अजायत तदर्क उत हस्कृतिः ।
4 6 2 19 02 b तद्विश्वमभिभूरसि यज्जातं यच्च जन्त्वम् ॥ १४३०
4 6 2 19 03 a आमासु पक्वमैरय आ सूर्यꣳ रोहयो दिवि ।
4 6 2 19 03 b घर्मं न सामं तपता सुवृक्तिभिर्जुष्टं गिर्वणसे बृहत् ॥ १४३१

सूक्त २०

4 6 2 20 01 a मत्स्यपायि ते महः पात्रस्येव हरिवो मत्सरो मदः ।
4 6 2 20 01 b वृषा ते वृष्ण इन्दुर्वाजी सहस्रसातमः ॥ १४३२
4 6 2 20 02 a आ नस्ते गन्तु मत्सरो वृषा मदो वरेण्यः ।
4 6 2 20 02 b सहावाꣳ इन्द्र सानसिः पृतनषाडमर्त्यः ॥ १४३३
4 6 2 20 03 a त्वꣳ हि शूरः सनिता चोदयो मनुषो रथम् ।
4 6 2 20 03 b सहावान्दस्युमव्रतमोषः पात्रं न शोचिषा ॥ १४३४

इति षष्ठप्रपाठके द्वितीयोऽर्धः ॥

षष्ठ प्रपाठकः । तृतीयोऽर्धः

सूक्त १

4 6 3 01 01 a पवस्व वृष्टिमा सु नोऽपामूर्मिं दिवस्परि ।
4 6 3 01 01 b अयक्ष्मा बृहतीरिषः ॥ १४३५
4 6 3 01 02 a तया पवस्व धारया यया गाव इहागमन् ।
4 6 3 01 02 b जन्यास उप नो गृहम् ॥ १४३६
4 6 3 01 03 a घृतं पवस्व धारया यज्ञेषु देववीतमः ।
4 6 3 01 03 b अस्मभ्यं वृष्टिमा पव ॥ १४३७
4 6 3 01 04 a स न ऊर्जे व्या३व्ययं पवित्रं धाव धारया ।
4 6 3 01 04 b देवासः शृणवन्हि कम् ॥ १४३८
4 6 3 01 05 a पवमानो असिष्यदद्रक्षाꣳस्यपजङ्घनत् ।
4 6 3 01 05 b प्रत्नवद्रोचयन्रुचः ॥ १४३९

सूक्त २

4 6 3 02 01 a प्रत्यस्मै पिपीषते विश्वानि विदुषे भर ।
4 6 3 02 01 b अरङ्गमाय जग्मयेऽपश्चादध्वने नरः ॥१४४०
4 6 3 02 02 a एमेनं प्रत्येतन सोमेभिः सोमपातमम् ।
4 6 3 02 02 b अमत्रेभिर्ऋजीषिणमिन्द्रꣳ सुतेभिरिन्दुभिः ॥१४४१
4 6 3 02 03 a यदी सुतेभिरिन्दुभिः सोमेभिः प्रतिभूषथ ।
4 6 3 02 03 b वेदा विश्वस्य मेधिरो धृषत्तन्तमिदेषते ॥१४४२
4 6 3 02 04 a अस्माअस्मा इदन्धसोऽध्वर्यो प्र भरा सुतम् ।
4 6 3 02 04 b कुवित्समस्य जेन्यस्य शर्धतोऽभिशस्तेरवस्वरत् ॥१४४३

सूक्त ३

4 6 3 03 01 a बभ्रवे नु स्वतवसेऽरुणाय दिविस्पृशे ।
4 6 3 03 01 b सोमाय गाथमर्चत ॥१४४४
4 6 3 03 02 a हस्तच्युतेभिरद्रिभिः सुतꣳ सोमं पुनीतन ।
4 6 3 03 02 b मधावा धावता मधु ॥१४४५
4 6 3 03 03 a नमसेदुप सीदत दध्नेदभि श्रीणीतन ।
4 6 3 03 03 b इन्दुमिन्द्रे दधातन ॥१४४६
4 6 3 03 04 a अमित्रहा विचर्षणिः पवस्व सोम शं गवे ।
4 6 3 03 04 b देवेभ्यो अनुकामकृत् ॥१४४७
4 6 3 03 05 a इन्द्राय सोम पातवे मदाय परि षिच्यसे ।
4 6 3 03 05 b मनश्चिन्मनसस्पतिः ॥१४४८
4 6 3 03 06 a पवमान सुवीर्यꣳ रयिꣳ सोम रिरीहि नः ।
4 6 3 03 06 b इन्दविन्द्रेण नो युजा ॥१४४९

सूक्त ४

4 6 3 04 01 a उद्धेदभि श्रुतामघं वृषमं नर्यापसम् ।
4 6 3 04 01 b अस्तारमेषि सूर्य ॥१४५०
4 6 3 04 02 a नव यो नवतिं पुरो बिभेद बाह्वोजसा ।
4 6 3 04 02 b अहिं च वृत्रहावधीत् ॥१४५१
4 6 3 04 03 a स न इन्द्रः शिवः सखाश्वावद्गोमद्यवमत् ।
4 6 3 04 03 b उरुधारेव दोहते ॥१४५२

सूक्त ५

4 6 3 05 01 a विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतम् ।
4 6 3 05 01 b वातजूतो यो अभिरक्षति त्मना प्रजाः पिपर्ति बहुधा वि राजति ॥१४५३
4 6 3 05 02 a विभ्राड् बृहत्सुभृतं वाजसातमं धर्मं दिवो धरुणे सत्यमर्पितम् ।

4 6 3 05 02 b अमित्रहा वृत्रहा दस्युहन्तमं ज्योतिर्जज्ञे असुरहा सपत्नहा ॥१४५४
4 6 3 05 03 a इदꣳ श्रेष्ठं ज्योतिषां ज्योतिरुत्तमं विश्वजिद्धनजिदुच्यते बृहत् ।
4 6 3 05 03 b विश्वभ्राड् भ्राजो महि सूर्यो दृश उरु पप्रथे सह ओजो अच्युतम् ॥१४५५

सूक्त ६

4 6 3 06 01 a इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।
4 6 3 06 01 b शिक्षा णो अस्मिन्पुरुहूत यामनि जीव ज्योतिरशीमहि ॥१४५६
4 6 3 06 02 a मा नो अज्ञाता वृजना दुराध्यो३ माशिवासोऽव क्रमुः ।
4 6 3 06 02 b त्वया वयं प्रवतः शश्वतीरपोऽति शूर तरामसि ॥१४५७

सूक्त ७

4 6 3 07 01 a अद्याद्या श्वःश्व इन्द्र त्रास्व परे च नः ।
4 6 3 07 01 b विश्वा च नो जरितॄन्त्सत्पते अहा दिवा नक्तं च रक्षिषः ॥१४५८
4 6 3 07 02 a प्रभङ्गी शूरो मघवा तुवीमघः सम्मिश्लो विर्याय कम् ।
4 6 3 07 02 b उभा ते बाहू वृषणा शतक्रतो नि या वज्रं मिमिक्षतुः ॥१४५९

सूक्त ८

4 6 3 08 01 a जनीयन्तो न्वग्रवः पुत्रीयन्तः सुदानवः ।
4 6 3 08 01 b सरस्वन्तꣳ हवामहे ॥१४६०

सूक्त ९

4 6 3 09 01 a उत नः प्रिया प्रियासु सप्तस्वसा सुजुष्टा ।
4 6 3 09 01 b सरस्वती स्तोम्या भूत् ॥१४६१

सूक्त १०

4 6 3 10 01 a तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।
4 6 3 10 01 b धियो यो नः प्रचोदयात् ॥१४६२
4 6 3 10 02 a सोमानाꣳ स्वरणं कृणुहि ब्रह्मणस्पते ।
4 6 3 10 02 a कक्षीवन्तꣳ य औशिजः ॥१४६३
4 6 3 10 03 a अग्न आयूꣳषि पवसे आ सुवोर्जं इषं च नः ।
4 6 3 10 03 a आरे बाधस्व दुच्छुनाम् ॥१४६४

सूक्त ११

4 6 3 11 01 a ता नः शक्तं पार्थिवस्य महो रायो दिव्यस्य ।

4 6 3 11 01 b महि वा क्षत्रं देवेषु ॥ १४६५
4 6 3 11 02 a ऋतमृतेन सपन्तेषिरं दक्षमाशाते ।
4 6 3 11 02 b अद्रुहा देवौ वर्धेते ॥ १४६६
4 6 3 11 03 a वृष्टिद्यावा रीत्यापेषस्पती दानुमत्याः ।
4 6 3 11 03 b बृहन्तं गर्त्तमाशाते ॥ १४६७

सूक्त १२

4 6 3 12 01 a युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः ।
4 6 3 12 01 b रोचन्ते रोचना दिवि ॥ १४६८
4 6 3 12 02 a युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे ।
4 6 3 12 02 b शोणा धृष्णू नृवाहसा ॥ १४६९
4 6 3 12 03 a केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे ।
4 6 3 12 03 b समुषद्भिरजायथाः ॥ १४७०

सूक्त १३

4 6 3 13 01 a अयꣳ सोम इन्द्र तुभ्यꣳ सुन्वे तुभ्यं पवते त्वमस्य पाहि ।
4 6 3 13 01 b त्वꣳ ह यं चकृषे त्वं ववृष इन्दुं मदाय युज्याय सोमम् ॥ १४७१
4 6 3 13 02 a स ईꣳ रथो न भुरिषाडयोजि महः पुरूणि सातये वसूनि ।
4 6 3 13 02 b आदीं विश्वा नहुष्याणि जाता स्वर्षाता वन ऊर्ध्वा नवन्त ॥ १४७२
4 6 3 13 03 a शुष्मी शर्धो न मारुतं पवस्वानभिशस्ता दिव्या यथा विट् ।
4 6 3 13 03 b आपो न मक्षू सुमतिर्भवा नः सहस्राप्साः पृतनाषाण्न यज्ञः ॥ १४७३

सूक्त १४

4 6 3 14 01 a त्वमग्ने यज्ञानाꣳ होता विश्वेषाꣳ हितः ।
4 6 3 14 01 b देवेभिर्मानुषे जने ॥ १४७४
4 6 3 14 02 a स नो मन्द्राभिरध्वरे जिह्वाभिर्यजा महः ।
4 6 3 14 02 b आ देवान्वक्षि यक्षि च ॥ १४७५
4 6 3 14 03 a वेत्था हि वेधो अध्वनः पथश्च देवाञ्जसा ।
4 6 3 14 03 b अग्ने यज्ञेषु सुक्रतो ॥ १४७६

सूक्त १५

4 6 3 15 01 a होता देवो अमर्त्यः पुरस्तादेति मायया ।
4 6 3 15 01 b विदथानि प्रचोदयन् ॥ १४७७
4 6 3 15 02 a वाजी वाजेषु धीयतेऽध्वरेषु प्र णीयते ।
4 6 3 15 02 b विप्रो यज्ञस्य साधनः ॥ १४७८
4 6 3 15 03 a धिया चक्रे वरेण्यो भूतानां गर्भमा दधे ।

4 6 3 15 03 b दक्षस्य पितरं तना ॥१४७९

सूक्त १६

4 6 3 16 01 a आ सुते सिञ्चत श्रियꣳ रोदस्योरभिश्रियम् ।
4 6 3 16 01 b रसा दधीत वृषभम् ॥१४८०
4 6 3 16 02 a ते जानत स्वमोक्या३ꣳ सं वत्सासो न मातृभिः ।
4 6 3 16 02 b मिथो नसन्त जामिभिः ॥१४८१
4 6 3 16 03 a उप स्रक्वेषु बप्सतः कृण्वते धरुणं दिवि ।
4 6 3 16 03 b इन्द्रे अग्ना नमः स्वः ॥१४८२

सूक्त १७

4 6 3 17 01 a तदिदास भुवनेषु ज्येष्ठं यतो जज्ञा उग्रस्त्वेषनृम्णः ।
4 6 3 17 01 b सद्यो जज्ञानो नि रिणाति शत्रूननु यं विश्वे मदन्त्यूमाः ॥१४८३
4 6 3 17 02 a वावृधानः शवसा भूर्योजाः शत्रुर्दासाय भियसं दधाति ।
4 6 3 17 02 b अव्यनच्च व्यनच्च सस्नि सं ते नवन्त प्रभृता मदेषु ॥१४८४
4 6 3 17 03 a त्वे क्रतुमपि वृञ्जन्ति विश्वे द्विर्यदेते त्रिर्भवन्त्यूमाः ।
4 6 3 17 03 b स्वादोः स्वादीयः स्वादुना सृजा समदः सु मधु मधुनाभि योधीः ॥१४८५

सूक्त १८

4 6 3 18 01 a त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृम्पत्सोममपिबद्विष्णुना सुतं यथावशम् ।
4 6 3 18 01 b स ईं ममाद महि कर्म कर्तवे महामुरुꣳ सैनꣳ सश्चद्देवो देवꣳ सत्य इन्दुः सत्यमिन्द्रम् ॥१४८६
4 6 3 18 02 a साकं जातः क्रतुना साकमोजसा ववक्षिथ साकं वृद्धो वीर्यैः सासहिर्मृधो विचर्षणिः ।
4 6 3 18 02 b दाता राध स्तुवते काम्यं वसु प्रचेतन सैनꣳ सश्चद्देवो देवꣳ सत्य इन्दुः सत्यमिन्द्रम् ॥१४८७
4 6 3 18 03 a अध त्विषीमाꣳ अभ्योजसा कृविं युधाभवदा रोदसी अपृणदस्य मज्मना प्र वावृधे ।
4 6 3 18 03 b अधत्तान्यं जठरे प्रेमरिच्यत प्र चेतय सैनꣳ सश्चद्देवो देवꣳ सत्य इन्दुः सत्यमिन्द्रम् ॥१४८८

इति षष्ठप्रपाठके तृतीयोऽर्धः ॥

इति षष्ठः प्रपाठकश्च समाप्तः ॥

सप्तम प्रपाठकः । प्रथमोऽर्धः

सूक्त १

4 7 1 01 01 a अभि प्र गोपतिं गिरेन्द्रमर्च यथा विदे ।
4 7 1 01 01 b सूनुꣳ सत्यस्य सत्पतिम् ॥१४८९
4 7 1 01 02 a आ हरयः ससृज्रिरेऽरुषीरधि बर्हिषि ।

4 7 1 01 02 b यत्राभि संनवामहे ॥१४९०
4 7 1 01 03 a इन्द्राय गाव आशिरं दुदुह्रे वज्रिणे मधु ।
4 7 1 01 03 b यत्सीमुपह्वरे विदत् ॥१४९१

सूक्त २

4 7 1 02 01 a आ नो विश्वासु हव्यमिन्द्रꣳ समत्सु भूषत ।
4 7 1 02 01 b उप ब्रह्माणि सवनानि वृत्रहन्परमज्या ऋचीषम ॥१४९२
4 7 1 02 02 a त्वं दाता प्रथमो राधसामस्यसि सत्य ईशानकृत् ।
4 7 1 02 02 b तुविद्युम्नस्य युज्या वृणीमहे पुत्रस्य शवसो महः ॥१४९३

सूक्त ३

4 7 1 03 01 a प्रत्नं पीयूषं पूर्व्यं यदुक्थ्यं महो गाहद्दिव आ निरधुक्षत ।
4 7 1 03 01 b इन्द्रमभि जायमानꣳ समस्वरन् ॥१४९४
4 7 1 03 02 a आदीं के चित्पश्यमानास आप्यं वसुरुचो दिव्या अभ्यनूषत ।
4 7 1 03 02 b दिवो न वारꣳ सविता व्यूर्णुते ॥१४९५
4 7 1 03 03 a अध यदिमे पवमान रोदसी इमा च विश्वा भुवनाभि मज्मना ।
4 7 1 03 03 b यूथे न निष्ठा वृषभो वि राजसि ॥१४९६

सूक्त ४

4 7 1 04 01 a इममू षु त्वमस्माकꣳ सनिं गायत्रं नव्याꣳसम् ।
4 7 1 04 01 b अग्ने देवेषु प्र वोचः ॥१४९७
4 7 1 04 02 a विभक्तासि चित्रभानो सिन्धोरूर्मा उपाक आ ।
4 7 1 04 02 b सद्यो दाशुषे क्षरसि ॥१४९८
4 7 1 04 03 a आ नो भज परमेष्वा वाजेषु मध्यमेषु ।
4 7 1 04 03 b शिक्षा वस्वो अन्तमस्य ॥१४९९

सूक्त ५

4 7 1 05 01 a अहमिद्धि पितुष्परि मेधामृतस्य जग्रह ।
4 7 1 05 01 b अहꣳ सूर्य इवाजनि ॥१५००
4 7 1 05 02 a अहं प्रत्नेन जन्मना गिरः शुम्भामि कण्ववत् ।
4 7 1 05 02 b येनेन्द्रः शुष्ममिद्दधे ॥१५०१
4 7 1 05 03 a ये त्वामिन्द्र न तुष्टुवुर्ऋषयो ये च तुष्टुवुः ।
4 7 1 05 03 b ममेद्वर्धस्व सुष्टुतः ॥१५०२

सूक्त ६

4 7 1 06 01 a अग्ने विश्वेभिरग्निभिर्जोषि ब्रह्म सहस्कृत ।
4 7 1 06 01 b ये देवत्रा य आयुषु तेभिर्नो महया गिरः ॥ १५०३
4 7 1 06 02 a प्र स विश्वेभिरग्निभिरग्निः स यस्य वाजिनः ।
4 7 1 06 02 b तनये तोके अस्मदा सम्यङ्वाजैः परीवृतः ॥ १५०४

सूक्त ७

4 7 1 07 03 a त्वं नो अग्ने अग्निभिर्ब्रह्म यज्ञं च वर्धय ।
4 7 1 07 03 b त्वं नो देवतातये रायो दानाय चोदय ॥ १५०५
4 7 1 07 01 a त्वे सोम प्रथमा वृक्तबर्हिषो महे वाजाय श्रवसे धियन दधुः ।
4 7 1 07 01 b स त्वं नो वीर वीर्याय चोदय ॥ १५०६
4 7 1 07 02 a अभ्यभि हि श्रवसा ततर्दिथोत्सं न कं चिज्जनपानमक्षितम् ।
4 7 1 07 02 b शर्याभिर्न भरमाणो गभस्त्योः ॥ १५०७
4 7 1 07 03 a अजीजनो अमृत मर्त्याय अमृतस्य धर्मन्नमृतस्य चारुणः ।
4 7 1 07 03 b सदासरो वाजमच्छा सनिष्यदत् ॥ १५०८

सूक्त ८

4 7 1 08 01 a एन्दुमिन्द्राय सिञ्चत पिबाति सोम्यं मधु ।
4 7 1 08 01 b प्र राधाꣳसि चोदयते महित्वना ॥ १५०९
4 7 1 08 02 a उपो हरीणां पतिꣳ राधः पृञ्चन्तमब्रवम् ।
4 7 1 08 02 b नूनꣳ श्रुधि स्तुवतो अश्व्यस्य ॥ १५१०
4 7 1 08 03 a न ह्याङ्३ग पुरा च न जज्ञे वीरतरस्त्वत् ।
4 7 1 08 03 b न की राया नैवथा न भन्दना ॥ १५११

सूक्त ९

4 7 1 09 01 a नदं व ओदतीनां नदं योयुवतीनाम् ।
4 7 1 09 01 b पतिं वो अघ्न्यानां धेनूनामिषुध्यसि ॥ १५१२

सूक्त १०

4 7 1 10 01 a देवो वो द्रविणोदाः पूर्णां विवष्ट्वासिचम् ।
4 7 1 10 01 b उद्वा सिञ्चध्वमुप वा पृणध्वमादिद्वो देव ओहते ॥ १५१३
4 7 1 10 02 a तꣳ होतारमध्वरस्य प्रचेतसं वह्निं देवा अकृण्वत ।
4 7 1 10 02 b दधाति रत्नं विधते सुवीर्यमग्निर्जनाय दाशुषे ॥ १५१४

सूक्त ११

4 7 1 11 01 a अदर्शि गातुवित्तमो यस्मिन्व्रतान्यादधुः ।

4 7 1 11 01 b उपोषु जातमार्यस्य वर्धनमग्निं नक्षन्तु नो गिरः ॥ १५१५
4 7 1 11 02 a यस्माद्रेजन्त कृष्टयश्चर्कृत्यानि कृण्वतः ।
4 7 1 11 02 b सहस्रसां मेधसाताविव त्मनाग्निं धीभिर्नमस्यत ॥ १५१६
4 7 1 11 03 a प्र दैवोदासो अग्निर्देव इन्द्रो न मज्मना ।
4 7 1 11 03 b अनु मातरं पृथिवीं वि वावृते तस्थौ नाकस्य शर्मणि ॥ १५१७

सूक्त १२

4 7 1 12 01 a अग्न आयूꣳषि पवसे आसुवोर्जमिषं च नः ।
4 7 1 12 01 b आरे बाधस्व दुच्छुनाम् ॥ १५१८
4 7 1 12 02 a अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः ।
4 7 1 12 02 b तमीमहे महागयम् ॥ १५१९
4 7 1 12 03 a अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् ।
4 7 1 12 03 b दधद्रयिं मयि योषम् ॥ १५२०

सूक्त १३

4 7 1 13 01 a अग्ने पावक रोचिषा मन्द्रया देव जिह्वया ।
4 7 1 13 01 b आ देवान्वक्षि यक्षि च ॥ १५२१
4 7 1 13 02 a तं त्वा घृतस्नवीमहे चित्रभानो स्वर्दृशम् ।
4 7 1 13 02 b देवाꣳ आ वीतये वह ॥ १५२२
4 7 1 13 03 a वीतिहोत्रं त्वा कवे द्युमन्तꣳ समिधीमहि ।
4 7 1 13 03 b अग्ने बृहन्तमध्वरे ॥ १५२३

सूक्त १४

4 7 1 14 01 a अवा नो अग्न ऊतिभिर्गायत्रस्य प्रभर्मणि ।
4 7 1 14 01 b विश्वासु धीषु वन्द्य ॥ १५२४
4 7 1 14 02 a आ नो अग्ने रयिं भर सत्रासाहं वरेण्यम् ।
4 7 1 14 02 b विश्वासु पृत्सु दुष्टरम् ॥ १५२५
4 7 1 14 03 a आ नो अग्ने सुचेतुना रयिं विश्वायुपोषसम् ।
4 7 1 14 03 b मार्डीकं धेहि जीवसे ॥ १५२६

सूक्त १५

4 7 1 15 01 a अग्निꣳ हिन्वन्तु नो धियः सप्तिमाशुमिवाजिषु ।
4 7 1 15 01 b तेन जेष्म धनंधनम् ॥ १५२७
4 7 1 15 02 a यया गा आकरामहै सेनयाग्ने तवोत्या ।
4 7 1 15 02 b तां नो हिन्व मघत्तये ॥ १५२८
4 7 1 15 03 a आग्ने स्थूरꣳ रयिं भर पृथुं गोमन्तमश्विनम् ।

4 7 1 15 03 b अङ्धि खं वर्त्तया पविम् ॥ १५२९
4 7 1 15 04 a अग्ने नक्षत्रमजरमा सूर्यꣳ रोहयो दिवि ।
4 7 1 15 04 b दधज्ज्योतिर्जनेभ्यः ॥ १५३०
4 7 1 15 05 a अग्ने केतुर्विशामसि प्रेष्ठः श्रेष्ठ उपस्थसत् ।
4 7 1 15 05 b बोधा स्तोत्रे वयो दधत् ॥ १५३१

सूक्त १६

4 7 1 16 01 a अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् ।
4 7 1 16 01 b अपाꣳ रेताꣳसि जिन्वति ॥ १५३२
4 7 1 16 02 a ईशिषे वार्यस्य हि दात्रस्याग्ने स्वःपतिः ।
4 7 1 16 02 b स्तोता स्यां तव शर्मणि ॥ १५३३
4 7 1 16 03 a उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते ।
4 7 1 16 03 b तव ज्योतीꣳष्यर्चयः ॥ १५३४

इति सप्तमप्रपाठके प्रथमोऽर्धः ॥

सप्तम प्रपाठकः । द्वितीयोऽर्धः

सूक्त १

4 7 2 01 01 a कस्ते जामिर्जनानामग्ने को दाश्वध्वरः ।
4 7 2 01 01 b को ह कस्मिन्नसि श्रितः ॥ १५३५
4 7 2 01 02 a त्वं जामिर्जनानामग्ने मित्रो असि प्रियः ।
4 7 2 01 02 b सखा सखिभ्य ईड्यः ॥ १५३६
4 7 2 01 03 a यजा नो मित्रावरुणा यजा देवाꣳ ऋतं बृहत् ।
4 7 2 01 03 b अग्ने यक्षि स्वं दमम् ॥ १५३७

सूक्त २

4 7 2 02 01 a ईडेन्यो नमस्यस्तिरस्तमाꣳसि दर्शतः ।
4 7 2 02 01 b समग्निरिध्यते वृषा ॥ १५३८
4 7 2 02 02 a वृषो अग्निः समिध्यतेऽश्वो न देववाहनः ।
4 7 2 02 02 b तꣳ हविष्मन्त ईडते ॥ १५३९
4 7 2 02 03 a वृषणं त्वा वयं वृषन्वृषणः समिधीमहि ।
4 7 2 02 03 b अग्ने दीद्यतं बृहत् ॥ १५४०

सूक्त ३

4 7 2 03 01 a उत्ते बृहन्तो अर्चयः समिधानस्य दीदिवः ।

4 7 2 03 01 b अग्ने शुक्रास ईरते ॥ १५४१
4 7 2 03 02 a उप त्वा जुह्वो३ मम घृताचीर्यन्तु हर्यत ।
4 7 2 03 02 b अग्ने हव्या जुषस्व नः ॥ १५४२
4 7 2 03 03 a मन्द्रꣳ होतारमृत्विजं चित्रभानुं विभावसुम् ।
4 7 2 03 03 b अग्निमीडे स उ श्रवत् ॥ १५४३

सूक्त ४

4 7 2 04 01 a पाहि नो अग्न एकया पाह्यू३त द्वितीयया ।
4 7 2 04 01 b पाहि गीर्भिस्तिसृभिरूर्जां पते पाहि चतसृभिर्वसो ॥ १५४४
4 7 2 04 02 a पाहि विश्वस्माद्रक्षसो अराव्णः प्र स्म वाजेषु नोऽव ।
4 7 2 04 02 b त्वामिद्धि नेदिष्ठं देवतातय आपिं नक्षामहे वृधे ॥ १५४५

सूक्त ५

4 7 2 05 01 a इनो राजन्नरतिः समिद्धो रौद्रो दक्षाय सुषुमाꣳ अदर्शि ।
4 7 2 05 01 b चिकिद्वि भाति भासा बृहतासिक्नीमेति रुशतीमपाजन् ॥ १५४६
4 7 2 05 02 a कृष्णां यदेनीमभि वर्पसाभूज्जनयन्योषां बृहतः पितुर्जाम् ।
4 7 2 05 02 b ऊर्ध्वं भानुꣳ सूर्यस्य स्तभायन्दिवो वसुभिररतिर्वि भाति ॥ १५४७
4 7 2 05 03 a भद्रो भद्रया सचमान आगात्स्वसारं जारो अभ्येति पश्चात् ।
4 7 2 05 03 b सुप्रकेतैर्द्युभिरग्निर्वितिष्ठन्नुशद्भिर्वर्णैरभि राममस्थात् ॥ १५४८

सूक्त ६

4 7 2 06 01 a कया ते अग्ने अङ्गिर ऊर्जो नपादुपस्तुतिम् ।
4 7 2 06 01 b वराय देव मन्यवे ॥ १५४९
4 7 2 06 02 a दाशेम कस्य मनसा यज्ञस्य सहसो यहो ।
4 7 2 06 02 b कदु वोच इदं नमः ॥ १५५०
4 7 2 06 03 a अधा त्वꣳ हि नस्करो विश्वा अस्मभ्यꣳ सुक्षितीः ।
4 7 2 06 03 b वाजद्रविणसो गिरः ॥ १५५१

सूक्त ७

4 7 2 07 01 a अग्न आ याह्यग्निभिर्होतारं त्वा वृणीमहे ।
4 7 2 07 01 b आ त्वामनक्तु प्रयता हविष्मती यजिष्ठं बर्हिरासदे ॥ १५५२
4 7 2 07 02 a अच्छा हि त्वा सहसः सूनो अङ्गिरः स्रुचश्चरन्त्यध्वरे ।
4 7 2 07 02 b ऊर्जो नपातं घृतकेशमीमहेऽग्निं यज्ञेषु पूर्व्यम् ॥ १५५३

सूक्त ८

4 7 2 08 01 a अच्छा नः शीरशोचिषं गिरो यन्तु दर्शतम् ।
4 7 2 08 01 b अच्छा यज्ञासो नमसा पुरूवसुं पुरुप्रशस्तमूतये ॥ १५५४
4 7 2 08 02 a अग्निꣳ सूनुꣳ सहसो जातवेदसं दानाय वार्याणाम् ।
4 7 2 08 02 b द्विता यो भूदमृतो मर्त्येष्वा होता मन्द्रतमो विशि ॥ १५५५

सूक्त ९

4 7 2 09 01 a अदाभ्यः पुरएता विशामग्निर्मानुषीणाम् ।
4 7 2 09 01 b तूर्णी रथः सदा नवः ॥ १५५६
4 7 2 09 02 a अभि प्रयाꣳसि वाहसा दाश्वाꣳ अश्नोति मर्त्यः ।
4 7 2 09 02 b क्षयं पावकशोचिषः ॥ १५५७
4 7 2 09 03 a साह्वान्विश्वा अभियुजः क्रतुर्देवानाममृक्तः ।
4 7 2 09 03 b अग्निस्तुविश्रवस्तमः ॥ १५५८

सूक्त १०

4 7 2 10 01 a भद्रो नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः ।
4 7 2 10 01 b भद्रा उत प्रशस्तयः ॥ १५५९
4 7 2 10 02 a भद्रं मनः कृणुष्व वृत्रतूर्ये येना समत्सु सासहिः ।
4 7 2 10 02 b अव स्थिरा तनुहि भूरि शर्धतां वनेमा ते अभिष्टये ॥ १५६०

सूक्त ११

4 7 2 11 01 a अग्ने वाजस्य गोमत ईशानः सहसो यहो ।
4 7 2 11 01 b अस्मे देहि जातवेदो महि श्रवः ॥ १५६१
4 7 2 11 02 a स इधानो वसुष्कविरग्निरीडेन्यो गिरा ।
4 7 2 11 02 b रेवदस्मभ्यं पुर्वणीक दीदिहि ॥ १५६२
4 7 2 11 03 a क्षपो राजन्नुत त्मनाग्ने वस्तोरुतोषसः ।
4 7 2 11 03 b स तिग्मजम्भ रक्षसो दह प्रति ॥ १५६३

सूक्त १२

4 7 2 12 01 a विशोविशो वो अतिथिं वाजयन्तः पुरुप्रियम् ।
4 7 2 12 01 b अग्निं वो दुर्यं वच स्तुषे शूषस्य मन्मभिः ॥ १५६४
4 7 2 12 02 a यं जनासो हविष्मन्तो मित्रं न सर्पिरासुतिम् ।
4 7 2 12 02 b प्रशꣳसन्ति प्रशस्तिभिः ॥ १५६५
4 7 2 12 03 a पन्याꣳसं जातवेदसं यो देवतात्युद्यता ।
4 7 2 12 03 b हव्यान्यैरयद्दिवि ॥ १५६६

सूक्त १३

4 7 2 13 01 a समिद्धमग्निꣳ समिधा गिरा गृणे शुचिं पावकं पुरो अध्वरे ध्रुवम् ।
4 7 2 13 01 b विप्रꣳ होतारं पुरुवारमद्रुहं कविꣳ सुम्नैरीमहे जातवेदसम् ॥१५६७
4 7 2 13 02 a त्वां दूतमग्ने अमृतं युगेयुगे हव्यवाहं दधिरे पायुमीड्यम्।
4 7 2 13 02 b देवासश्च मर्त्तासश्च जागृविं विभुं विश्पतिं नमसा नि षेदिरे ॥१५६८
4 7 2 13 03 a विभूषन्नग्न उभयाꣳ अनु व्रता दूतो देवानाꣳ रजसी समीयसे ।
4 7 2 13 03 b यत्ते धीतिꣳ सुमतिमावृणीमहेऽध स्मा नस्त्रिवरूथः शिवो भव ॥१५६९

सूक्त १४

4 7 2 14 01 a उप त्वा जामयो गिरो देदिशतीर्हविष्कृतः ।
4 7 2 14 01 b वायोरनीके अस्थिरन् ॥१५७०
4 7 2 14 02 a यस्य त्रिधात्ववृतं बर्हिस्तस्थावसन्दिनम् ।
4 7 2 14 02 b आपश्चिन्नि दधा पदम् ॥१५७१
4 7 2 14 03 a पदं देवस्य मीढुषोऽनाधृष्टाभिरूतिभिः ।
4 7 2 14 03 b भद्रा सूर्य इवोपदृक् ॥१५७२

इति सप्तमप्रपाठके द्वितीयोऽर्धः ॥

सप्तम प्रपाठकः । तृतीयोऽर्धः

सूक्त १

4 7 3 01 01 a अभि त्वा पूर्वपीतय इन्द्र स्तोमेभिरायवः ।
4 7 3 01 01 b समीचीनास ऋभवः समस्वरन्रुद्रा गृणन्त पूर्व्यम् ॥१५७३
4 7 3 01 02 a अस्येदिन्द्रो वावृधे वृष्ण्यꣳ शवो मदे सुतस्य विष्णवि ।
4 7 3 01 02 b अद्या तमस्य महिमानमायवोऽनु ष्टुवन्ति पूर्वथा ॥१५७४

सूक्त २

4 7 3 02 01 a प्र वामर्चन्त्युक्थिनो नीथाविदो जरितारः ।
4 7 3 02 01 b इन्द्राग्नी इष आ वृणे ॥१५७५
4 7 3 02 02 a इन्द्राग्नी नवतिं पुरो दासपत्नीरधूनुतम् ।
4 7 3 02 02 b साकमेकेन कर्मणा ॥१५७६
4 7 3 02 03 a इन्द्राग्नी अपसस्पर्युप प्र यन्ति धीतयः ।
4 7 3 02 03 b ऋतस्य पथ्याऽऽ३ अनु ॥१५७७
4 7 3 02 04 a इन्द्राग्नी तविषाणी वाꣳ सधस्थानि प्रयाꣳसि च ।
4 7 3 02 04 b युवोरप्तूर्यꣳ हितम् ॥१५७८

सूक्त ३

4 7 3 03 01 a शग्ध्यू३ षु शचीपत इन्द्र विश्वाभिरूतिभिः ।
4 7 3 03 01 b भगं न हि त्वा यशसं वसुविदमनु शूर चरामसि ॥ १५७९
4 7 3 03 02 a पौरो अश्वस्य पुरुकृद्गवामस्युत्सो देव हिरण्ययः ।
4 7 3 03 02 b न किर्हि दानं परि मर्धिषत्वे यद्यद्यामि तदा भर ॥ १५८०

सूक्त ४

4 7 3 04 01 a त्वꣳ ह्येहि चेरवे विदा भगं वसुत्तये ।
4 7 3 04 01 b उद्वावृषस्व मघवन्गविष्टय उदिन्द्राश्वमिष्टये ॥ १५८१
4 7 3 04 02 a त्वं पुरू सहस्राणि शतानि च यूथा दानाय मꣳहसे ।
4 7 3 04 02 b आ पुरन्दरं चकृम विप्रवचस इन्द्रं गायन्तोऽवसे ॥ १५८२

सूक्त ५

4 7 3 05 01 a यो विश्वा दयते वसु होता मन्द्रो जनानाम् ।
4 7 3 05 01 b मधोर्न पात्रा प्रथमान्यस्मै प्र स्तोमा यन्त्वग्नये ॥ १५८३
4 7 3 05 02 a अश्व न गीर्भी रथ्यꣳ सुदानवो मर्मृज्यन्ते देवयवः ।
4 7 3 05 02 b उभे तोके तनये दस्म विस्पते पर्षि राधो मघोनाम् ॥ १५८४

सूक्त ६

4 7 3 06 01 a इमं मे वरुण श्रुधी हवमद्या च मृडय ।
4 7 3 06 01 b त्वामवस्युरा चके ॥ १५८५

सूक्त ७

4 7 3 07 01 a कया त्वं न ऊत्याभि प्र मन्दसे वृषन् ।
4 7 3 07 01 b कया स्तोतृभ्य आ भर ॥ १५८६

सूक्त ८

4 7 3 08 01 a इन्द्रमिद्देवतातय इन्द्रं प्रयत्यध्वरे ।
4 7 3 08 01 b इन्द्रꣳ समीके वनिनो हवामह इन्द्रं धनस्य सातये ॥ १५८७
4 7 3 08 02 a इन्द्रो मह्ना रोदसी पप्रथच्छव इन्द्रः सूर्यमरोचयत् ।
4 7 3 08 02 b इन्द्रे ह विश्वा भुवनानि येमिर इन्द्रे सुवानास इन्दवः ॥ १५८८

सूक्त ९

4 7 3 09 01 a विश्वकर्मन्हविषा वावृधानः स्वयं यजस्व तन्वा३ꣳ स्वा हि ते ।
4 7 3 09 01 b मुह्यन्त्वन्ये अभितो जनास इहास्माकं मघवा सूरिरस्तु ॥१५८९

सूक्त १०

4 7 3 10 01 a अया रुचा हरिण्या पुनानो विश्वा द्वेषाꣳसि तरति सयुग्वभिः सूरो न सयुग्वभिः ।
4 7 3 10 01 b धारा पृष्ठस्य रोचते पुनानो अरुषो हरिः ।
4 7 3 10 01 c विश्वा यद्रूपा परियास्यृक्वभिः सप्तास्येभिर्ऋक्वभिः ॥१५९०
4 7 3 10 02 a प्राचीमनु प्रदिशं पाति चेकितत्सꣳ रश्मिभिर्यतते दर्शतो रथो दैव्यो दर्शतो रथः ।
4 7 3 10 02 b अग्मन्नुक्थानि पौꣳस्येन्द्रं जैत्राय हर्षयत ।
4 7 3 10 02 c वज्रश्च यद्भवथो अनपच्युता समत्स्वनपच्युता ॥१५९१
4 7 3 10 03 a त्वं ह त्यत्पणीनां विदो वसु सं मातृभिर्मर्जयसि स्व आ दम ऋतस्य धीतिभिर्दमे ।
4 7 3 10 03 b परावतो न साम तद्यत्रा रणन्ति धीतयः ।
4 7 3 10 03 c त्रिधातुभिररुषीभिर्वयो दधे रोचमानो वयो दधे ।१५९२

सूक्त ११

4 7 3 11 01 a उत नो गोषणिं धियमश्वसां वाजसामुत ।
4 7 3 11 01 b नृवत्कृणुह्यूतये ॥१५९३

सूक्त १२

4 7 3 12 01 a शशमानस्य वा नरः स्वेदस्य सत्यशवसः ।
4 7 3 12 01 b विदा कामस्य वेनतः ॥१५९४

सूक्त १३

4 7 3 13 01 a उप नः सूनवो गिरः शृण्वन्त्वमृतस्य ये ।
4 7 3 13 01 b सुमृडीका भवन्तु नः ॥१५९५

सूक्त १४

4 7 3 14 01 a प्र वां महि द्यवी अभ्युपस्तुतिं भरामहे ।
4 7 3 14 01 b शुची उप प्रशस्तये ॥१५९६
4 7 3 14 02 a पुनाने तन्वा मिथः स्वेन दक्षेण राजथः ।
4 7 3 14 02 b ऊह्याथे सनादृतम् ॥१५९७
4 7 3 14 03 a मही मित्रस्य साधथस्तरन्ती पिप्रती ऋतम् ।
4 7 3 14 03 b परि यज्ञं नि षेदथुः ॥१५९८

सूक्त १५

4 7 3 15 01 a अयमु ते समतसि कपोत इव गर्भधिम् ।
4 7 3 15 01 b वचस्तच्चिन्न ओहसे ॥ १५९९
4 7 3 15 02 a स्तोत्रꣳ राधानां पते गिर्वाहो वीर यस्य ते ।
4 7 3 15 02 b विभूतिरस्तु सूनृता ॥ १६००
4 7 3 15 03 a ऊर्ध्वस्तिष्ठा न ऊतयेऽस्मिन्वाजे शतक्रतो ।
4 7 3 15 03 b समन्येषु ब्रवावहै ॥ १६०१

सूक्त १६

4 7 3 16 01 a गाव उप वदावटे महि यज्ञस्य रप्सुदा ।
4 7 3 16 01 b उभा कर्णा हिरण्यया ॥ १६०२
4 7 3 16 02 a अभ्यारमिदद्रयो निषिक्तं पुष्करे मधु ।
4 7 3 16 02 b अवटस्य विसर्जने ॥ १६०३
4 7 3 16 03 a सिञ्चन्ति नमसावटमुच्चाचक्रं परिज्मानम् ।
4 7 3 16 03 b नीचीनबारमक्षितम् ॥ १६०४

सूक्त १७

4 7 3 17 01 a मा भेम मा श्रमिष्मोग्रस्य सख्ये तव ।
4 7 3 17 01 b महत्ते वृष्णो अभिचक्ष्यं कृतं पश्येम तुर्वशं यदुम् ॥ १६०५
4 7 3 17 02 a सव्यामनु स्फिग्यं वावसे वृष्णा न दानो अस्य रोषति ।
4 7 3 17 02 b मध्वा संपृक्ताः सारघेण धेनवस्तूयमेहि द्रवा पिब ॥ १६०६

सूक्त १८

4 7 3 18 01 a इमा उ त्वा पुरूवसो गिरो वर्धन्तु या मम ।
4 7 3 18 01 b पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषत ॥ १६०७
4 7 3 18 02 a अयꣳ सहस्रमृषिभिः सहस्कृतः समुद्र इव पप्रथे ।
4 7 3 18 02 b सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये ॥ १६०८

सूक्त १९

4 7 3 19 01 a यस्यायं विश्व आर्यो दासः शेवधिपा अरिः ।
4 7 3 19 01 b तिरश्चिदर्ये रुशमे पवीरवि तुभ्येत्सो अज्यते रयिः ॥ १६०९
4 7 3 19 02 a तुरण्यवो मधुमन्तं घृतश्चुतं विप्रासो अर्कमानृचुः ।
4 7 3 19 02 b अस्मे रयिः पप्रथे वृष्ण्यं शवोऽस्मे स्वानास इन्दवः ॥ १६१०

सूक्त २०

4 7 3 20 01 a गोमन्न इन्दो अश्ववत्सुतः सुदक्ष धनिव ।
4 7 3 20 01 b शुचिं च वर्णमधि गोषु धार्य ॥१६११
4 7 3 20 02 a स नो हरीणां पत इन्दो देवप्सरस्तमः ।
4 7 3 20 02 b सखेव सख्ये नर्यो रुचे भव ॥१६१२
4 7 3 20 03 a सनेमि त्वमस्मदा अदेवं कं चिदत्रिणम् ।
4 7 3 20 03 b साह्वाꣳ इन्दो परि बाधो अप द्वयुम् ॥१६१३

सूक्त २१

4 7 3 21 01 a अञ्जते व्यञ्जते समञ्जते क्रतुꣳ रिहन्ति मध्वाभ्यञ्जते ।
4 7 3 21 01 b सिन्धोरुऽच्छ्वासे पतयन्तमुक्षणꣳ हिरण्यपावाः पशुमप्सु गृभ्णते ॥१६१४
4 7 3 21 02 a विपश्चिते पवमानाय गायत मही न धारात्यन्धो अर्षति ।
4 7 3 21 02 b अहिर्न जूर्णामति सर्पति त्वचमत्यो न क्रीडन्नसरद्वृषा हरिः ॥१६१५
4 7 3 21 03 a अग्रेगो राजाप्यस्तविष्यते विमानो अह्नां भुवनेष्वर्पितः ।
4 7 3 21 03 b हरिर्घृतस्नुः सुदृशीको अर्णवो ज्योतीरथः पवते राय ओक्यः ॥१६१६

इति सप्तमप्रपाठके तृतीयोऽर्धः ॥

इति सप्तमः प्रपाठकश्च समाप्तः ॥

आष्टम प्रपाठकः । प्रथमोऽर्धः

सूक्त १

4 8 1 01 01 a विश्वेभिरग्ने अग्निभिरिमं यज्ञमिदं वचः ।
4 8 1 01 01 b चनो धाः सहसा यहो ॥१६१७
4 8 1 01 02 a यच्चिद्धि शश्वा तना देवंदेवं यजामहे ।
4 8 1 01 02 b त्वे इद्धूयते हविः ॥१६१८
4 8 1 01 03 a प्रियो नो अस्तु विश्पतिर्होता मन्द्रो वरेण्यः ।
4 8 1 01 03 b प्रियाः स्वग्नयो वयम् ॥१६१९

सूक्त २

4 8 1 02 01 a इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः ।
4 8 1 02 01 b अस्माकमस्तु केवलः ॥१६२०
4 8 1 02 02 a स नो वृषन्नमुं चरुꣳ सत्रादावन्नपा वृधि ।
4 8 1 02 02 b अस्मभ्यमप्रतिष्कुतः ॥१६२१
4 8 1 02 03 a वृषा यूथेव वꣳसगः कृष्टीरियर्त्योजसा ।

4 8 1 02 03 b ईशानो अप्रतिष्कुतः ॥१६२२

सूक्त ३

4 8 1 03 01 a त्वं नश्चित्र ऊत्या वसो राधाꣳसि चोदय ।
4 8 1 03 01 b अस्य रायस्त्वमग्ने रथीरसि विदा गाधं तुचे तु नः ॥१६२३
4 8 1 03 02 a पर्षि तोकं तनयं पर्तृभिष्ट्वमदब्धैरप्रयुत्वभिः ।
4 8 1 03 02 b अग्ने हेडाꣳसि दैव्या युयोधि नोऽदेवानि हराꣳसि च ॥१६२४

सूक्त ४

4 8 1 04 01 a किमित्ते विष्णो परिचक्षि नाम प्र यद्ववक्षे शिपिविष्टो अस्मि ।
4 8 1 04 01 b मा वर्पो अस्मदप गूह एतद्यदन्यरूपः समिथे बभूथ ॥१६२५
4 8 1 04 02 a प्र तत्ते अद्य शिपिविष्ट हव्यमर्यः शꣳसामि वयुनानि विद्वान् ।
4 8 1 04 02 b तं त्वा गृणामि तवसमतव्यान्क्षयन्तमस्य रजसः पराके ॥१६२६
4 8 1 04 03 a वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् ।
4 8 1 04 03 b वर्धन्तु त्वा सुष्टुतयो गिरि मे यूयं पात स्वस्तिभिः सदा नः ॥१६२७

सूक्त ५

4 8 1 05 01 a वायो शुक्रो अयामि ते मध्वो अग्रं दिविष्टिषु ।
4 8 1 05 01 b आ याहि सोमपीतये स्पार्हो देव नियुत्वता ॥१६२८
4 8 1 05 02 a इन्द्रश्च वायवेषाꣳ सोमानां पीतिमर्हथः ।
4 8 1 05 02 b युवाꣳ हि यन्तीन्दवो निम्नमापो न सध्र्यक् ॥१६२९
4 8 1 05 03 a वायविन्द्रश्च शुष्मिणा सरथꣳ शवसस्पती ।
4 8 1 05 03 b नियुत्वन्ता न ऊतय आ यातꣳ सोमपीतये ॥१६३०

सूक्त ६

4 8 1 06 01 a अध क्षपा परिष्कृतो वाजाꣳ अभि प्र गाहते ।
4 8 1 06 01 b यदी विवस्वतो धियो हरिꣳ हिन्वन्ति यातवे ॥१६३१
4 8 1 06 02 a तमस्य मर्जयामसि मदो य इन्द्रपातमः ।
4 8 1 06 02 b यं गाव आसभिर्दधुः पुरा नूनं च सूरयः ॥१६३२
4 8 1 06 03 a तं गाथया पुराण्या पुनानमभ्यनूषत ।
4 8 1 06 03 b उतो कृपन्त धीतयो देवानां नाम बिभ्रतीः ॥१६३३

सूक्त ७

4 8 1 07 01 a अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः ।
4 8 1 07 01 b सम्राजन्तमध्वराणाम् ॥१६३४

4 8 1 07 02 a स घा नः सूनुः शवसा पृथुप्रगामा सुशेवः ।
4 8 1 07 02 b मीढ्वाँ अस्माकं बभूयात् ॥ १६३५
4 8 1 07 03 a स नो दूराच्चासाच्च नि मर्त्यादघायोः ।
4 8 1 07 03 b पाहि सदमिद्विश्वायुः ॥ १६३६

सूक्त ८

4 8 1 08 01 a त्वमिन्द्र प्रतूर्तिष्वभि विश्वा असि स्पृधः ।
4 8 1 08 01 b अशस्तिहा जनिता वृत्रतूरसि त्वं तूर्य तरुष्यतः ॥ १६३७
4 8 1 08 02 a अनु ते शुष्मं तुरयन्तमीयतुः क्षोणी शिशुं न मातरा ।
4 8 1 08 02 b विश्वास्ते स्पृधः श्नथयन्त मन्यवे वृत्रं यदिन्द्र तूर्वसि ॥ १६३८

सूक्त ९

4 8 1 09 01 a यज्ञ इन्द्रमवर्धयद्यद्भूमिं व्यवर्तयत् ।
4 8 1 09 01 b चक्राण ओपशं दिवि ॥ १६३९
4 8 1 09 02 a व्या३न्तरिक्षमतिरन्मदे सोमस्य रोचना ।
4 8 1 09 02 b इन्द्रो यदभिनद्वलम् ॥ १६४०
4 8 1 09 03 a उदगा आजदङ्गिरोभ्य आविष्कृण्वन्गुहा सतीः ।
4 8 1 09 03 b अर्वाञ्चं नुनुदे वलम् ॥ १६४१

सूक्त १०

4 8 1 10 01 a त्यमु वः सत्रासाहं विश्वासु गीर्ष्वायतम् ।
4 8 1 10 01 b आ च्यावयस्यूतये ॥ १६४२
4 8 1 10 02 a युध्मँ सन्तमनर्वाणँ सोमपामनपच्युतम् ।
4 8 1 10 02 b नरमवार्यक्रतुम् ॥ १६४३
4 8 1 10 03 a शिक्षा ण इन्द्र राय आ पुरु विद्वाँ ऋचीषम ।
4 8 1 10 03 b अवा नः पार्ये धने ॥ १६४४

सूक्त ११

4 8 1 11 01 a तव त्यदिन्द्रियं बृहत्तव दक्ष्ममुत क्रतुम् ।
4 8 1 11 01 b वज्रँ शिशाति धिषणा वरेण्यम् ॥ १६४५
4 8 1 11 02 a तव द्यौरिन्द्र पौँस्यं पृथिवी वर्धति श्रवः ।
4 8 1 11 02 b त्वामापः पर्वतासश्च हिन्विरे ॥ १६४६
4 8 1 11 03 a त्वां विष्णुर्बृहन्क्षयो मित्रो गृणाति वरुणः ।
4 8 1 11 03 b त्वाँ शर्धो मदत्यनु मारुतम् ॥ १६४७

सूक्त १२

4 8 1 12 01 a नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः ।
4 8 1 12 01 b अमैरमित्रमर्दय ॥ १६४८
4 8 1 12 02 a कुवित्सु नो गविष्टयेऽग्ने संवेषिषो रयिम् ।
4 8 1 12 02 b उरुकृदुरु णस्कृधि ॥ १६४९
4 8 1 12 03 a मा नो अग्ने महाधने परा वर्ग्भारभृद्यथा ।
4 8 1 12 03 b संवर्गꣳ सꣳ रयिं जय ॥ १६५०

सूक्त १३

4 8 1 13 01 a समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः ।
4 8 1 13 01 b समुद्रायेव सिन्धवः ॥ १६५१
4 8 1 13 02 a वि चिद्वृत्रस्य दोधतः शिरो बिभेद वृष्णिना ।
4 8 1 13 02 b वज्रेण शतपर्वणा ॥ १६५२
4 8 1 13 03 a ओजस्तदस्य तित्विष उभे यत्समवर्त्तयत् ।
4 8 1 13 03 b इन्द्रश्चर्मेव रोदसी ॥ १६५३

सूक्त १४

4 8 1 14 01 a सुमन्मा वस्वी रन्ती सूनरी ॥ १६५४
4 8 1 14 02 a सरूप वृषन्ना गहीमौ भद्रौ धुर्यावभि ।
4 8 1 14 02 b ताविमा उप सर्पतः ॥ १६५५
4 8 1 14 03 a नीव शीर्षाणि मृढ्वं मध्य आपस्य तिष्ठति ।
4 8 1 14 03 b शृङ्गेभिर्दशभिर्दिशन् ॥ १६५६

इत्यष्टमप्रपाठके प्रथमोऽर्धः ॥

आष्टम प्रपाठकः । द्वितीयोऽर्धः

सूक्त १

4 8 2 01 01 a पन्यंपन्यमित्सोतार आ धावत मद्याय ।
4 8 2 01 01 b सोमं वीराय शूराय ॥ १६५७
4 8 2 01 02 a एह हरी ब्रह्मयुजा शग्मा वक्षतः सखायम् ।
4 8 2 01 02 b इन्द्रं गीर्भिर्गिर्वणसम् ॥ १६५८
4 8 2 01 03 a पाता वृत्रहा सुतमा घा गमन्नारे अस्मत् ।
4 8 2 01 03 b नि यमते शतमूतिः ॥ १६५९

सूक्त २

4 8 2 02 01 a आ त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः ।
4 8 2 02 01 b न त्वामिन्द्राति रिच्यते ॥ १६६०
4 8 2 02 02 a विव्यक्थ महिना वृषन्भक्षꣳ सोमस्य जागृवे ।
4 8 2 02 02 b य इन्द्र जठरेषु ते ॥ १६६१
4 8 2 02 03 a अरं त इन्द्र कुक्षये सोमो भवतु वृत्रहन् ।
4 8 2 02 03 b अरं धामभ्य इन्दवः ॥ १६६२

सूक्त ३

4 8 2 03 01 a जराबोध तद्विविड्ढि विशेविशे यज्ञियाय ।
4 8 2 03 01 b स्तोमꣳ रुद्राय दृशीकम् ॥ १६६३
4 8 2 03 02 a स नो महाꣳ अनिमानो धूमकेतुः पुरुश्चन्द्रः ।
4 8 2 03 02 b धिये वाजाय हिन्वतु ॥ १६६४
4 8 2 03 03 a स रेवाꣳ इव विश्पतिर्दैव्यः केतुः शृणोतु नः ।
4 8 2 03 03 b उक्थैरग्निर्बृहद्भानुः ॥ १६६५

सूक्त ४

4 8 2 04 01 a तद्वो गाय सुते सचा पुरुहूताय सत्वने ।
4 8 2 04 01 b शं यद्गवे न शाकिने ॥ १६६६
4 8 2 04 02 a न घा वसुर्नि यमते दानं वाजस्य गोमतः ।
4 8 2 04 02 b यत्सीमुपश्रवद्गिरः ॥ १६६७
4 8 2 04 03 a कुवित्सस्य प्र हि व्रजं गोमन्तं दस्युहा गमत् ।
4 8 2 04 03 b शचीभिरप नो वरत् ॥ १६६८

सूक्त ५

4 8 2 05 01 a इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम् ।
4 8 2 05 01 b समूढमस्य पाꣳसुले ॥ १६६९
4 8 2 05 02 a त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः ।
4 8 2 05 02 b अतो धर्माणि धारयन् ॥ १६७०
4 8 2 05 03 a विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे ।
4 8 2 05 03 b इन्द्रस्य युज्यः सखा ॥ १६७१
4 8 2 05 04 a तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः ।
4 8 2 05 04 b दिवीव चक्षुराततम् ॥ १६७२
4 8 2 05 05 a तद्विप्रासो विपन्युवो जागृवाꣳसः समिन्धते ।
4 8 2 05 05 b विष्णोर्यत्परमं पदम् ॥ १६७३
4 8 2 05 06 a अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे ।

4 8 2 05 06 b पृथिव्या अधि सानवि ॥ १६७४

सूक्त ६

4 8 2 06 01 a मो षु त्वा वाघतश्च नारे अस्मन्नि रीरमन् ।
4 8 2 06 01 b आरात्ताद्व सधमादं न आ गहीह वा सन्नुप श्रुधि ॥ १६७५
4 8 2 06 02 a इमे हि ते ब्रह्मकृतः सुते सचा मधौ न मक्ष आसते ।
4 8 2 06 02 b इन्द्रे कामं जरितारो वसूयवो रथे न पादमा दधुः ॥ १६७६

सूक्त ७

4 8 2 07 01 a अस्तावि मन्म पूर्व्यं ब्रह्मेन्द्राय वोचत ।
4 8 2 07 01 b पूर्वीर्ऋतस्य बृहतीरनूषत स्तोतुर्मेधा असृक्षत ॥ १६७७
4 8 2 07 02 a समिन्द्रो रायो बृहतीरधूनुत सं क्षोणी समु सूर्यम् ।
4 8 2 07 02 b सꣳ शुक्रासः शुचयः सं गवाशिरः सोमा इन्द्रममन्दिषुः ॥ १६७८

सूक्त ८

4 8 2 08 01 a इन्द्राय सोम पातवे वृत्रघ्ने परि षिच्यसे ।
4 8 2 08 02 b नरे च दक्षिणावते देवाय सदनासदे ॥ १६७९
4 8 2 08 02 a तꣳ सखायः पुरूरुचं यूयं वयं च सूरयः ।
4 8 2 08 02 b अश्याम वाजगन्ध्यꣳ सनेम वाजपस्त्यम् ॥ १६८०
4 8 2 08 03 a परि त्यꣳ हर्यतꣳ हरिं बभ्रुं पुनन्ति वारेण ।
4 8 2 08 03 b यो देवान्विश्वाꣳ इत्परि मदेन सह गच्छति ॥ १६८१

सूक्त ९

4 8 2 09 01 a कस्तमिन्द्र त्वावसो मर्त्यो दधर्षति ।
4 8 2 09 01 b श्रद्धा इत्तेमघवन् पार्ये दिवि वाजी वाजं सिषासति ॥ १६८२
4 8 2 09 02 a मघोनः स्म वृत्रहत्येषु चोदय ये ददति प्रिया वसु ।
4 8 2 09 02 b तव प्रणीती हर्यश्व सूरिभिर्विश्वा तरेम दुरिता ॥ १६८३

सूक्त १०

4 8 2 10 01 a एदु मधोर्मदिन्तरꣳ सिञ्चाध्वर्यो अन्धसः ।
4 8 2 10 01 b एवा हि वीर स्तवते सदावृधः ॥ १६८४
4 8 2 10 02 a इन्द्र स्थातर्हरीणां न किष्टे पूर्व्यस्तुतिम् ।
4 8 2 10 02 b उदानꣳश शवसा न भन्दना ॥ १६८५
4 8 2 10 03 a तं वो वाजानां पतिमहूमहि श्रवस्यवः ।
4 8 2 10 03 b अप्रायुभिर्यज्ञेभिर्वावृधेन्यम् ॥ १६८६

सूक्त ११

4 8 2 11 01 a तं गूर्धया स्वर्णरं देवासो देवमरतिं दधन्विरे ।
4 8 2 11 01 b देवत्रा हव्यमूहिषे ॥ १६८७
4 8 2 11 02 a विभूतरातिं विप्र चित्रशोचिषमग्निमीडिष्व यन्तुरम् ।
4 8 2 11 02 b अस्य मेधस्य सोम्यस्य सोभरे प्रेमध्वराय पूर्व्यम् ॥ १६८८

सूक्त १२

4 8 2 12 01 a आ सोम सवानो अद्रिभिस्तिरो वाराण्यव्यया ।
4 8 2 12 01 b जनो न पुरि चम्वोर्विशद्धरिः सदो वनेषु दध्रिषे ॥ १६८९
4 8 2 12 02 a स मामृजे तिरो अण्वानि मेष्यो मीड्वान्त्सप्तिर्न वाजयुः ।
4 8 2 12 02 b अनुमाद्यः पवमानो मनीषिभिः सोमो विप्रेभिर्ऋक्वभिः ॥ १६९०

सूक्त १३

4 8 2 13 01 a वयमेनमिदा ह्योऽपीपेमेह वज्रिणम् ।
4 8 2 13 01 b तस्मा उ अद्य सवने सुतं भरा नूनं भूषत श्रुते ॥ १६९१
4 8 2 13 02 a वृकश्चिदस्य वारण उरामथिरा वयुनेषु भूषति ।
4 8 2 13 02 b सेमं न स्तोमं जुजुषाण आ गहीन्द्र प्र चित्रया धिया ॥ १६९२

सूक्त १४

4 8 2 14 01 a इन्द्राग्नी रोचना दिवः परि वाजेषु भूषथः ।
4 8 2 14 01 b तद्वां चेति प्र वीर्यम् ॥ १६९३
4 8 2 14 02 a इन्द्राग्नी अपसस्परि उप प्र यन्ति धीतयः ।
4 8 2 14 02 b ऋतस्य पथ्या अनु ॥ १६९४
4 8 2 14 03 a इन्द्राग्नी तविषाणि वाम् सधस्थानि प्रयाꣳसि च ।
4 8 2 14 03 b युवोरप्तूर्यं हितम् ॥ १६९५

सूक्त १५

4 8 2 15 01 a क ईं वेद सुते सचा पिबन्तं कद्वयो दधे ।
4 8 2 15 01 b अयं यः पुरो विभिनत्त्योजसा मन्दानः शिप्रयन्धसः ॥ १६९६
4 8 2 15 02 a दाना मृगो न वारणः पुरुत्रा चरथं दधे ।
4 8 2 15 02 b न किष्ट्वा नि यमदा सुते गमो महाꣳश्चरस्योजसा ॥ १६९७
4 8 2 15 03 a य उग्रः सन्ननिष्टृतः स्थिरो रणाय सꣳस्कृतः ।
4 8 2 15 03 b यदि स्तोतुर्मघवा शृणवद्धवं नेन्द्रो योषत्या गमत् ॥ १६९८

सूक्त १६

4 8 2 16 01 a पवमाना असृक्षत सोमाः शुक्रास इन्दवः ।
4 8 2 16 01 b अभि विश्वानि काव्या ॥ १६९९
4 8 2 16 02 a पवमाना दिवस्पर्यन्तरिक्षादसृक्षत ।
4 8 2 16 02 b पृथिव्या अधि सानवि ॥ १७००
4 8 2 16 03 a पवमानास आशवः शुभ्रा असृग्रमिन्दवः ।
4 8 2 16 03 b घ्नन्तो विश्वा अप द्विषः ॥ १७०१

सूक्त १७

4 8 2 17 01 a तोशा वृत्रहणा हुवे सजित्वानापराजिता ।
4 8 2 17 01 b इन्द्राग्नी वाजसातमा ॥ १७०२
4 8 2 17 02 a प्र वामर्चन्त्युक्थिनो नीथाविदो जरितारः ।
4 8 2 17 02 b इन्द्राग्नी इष आ वृणे ॥ १७०३
4 8 2 17 03 a इन्द्राग्नी नवतिं पुरो दासपत्नीरधूनुतम् ।
4 8 2 17 03 b साकमेकेन कर्मणा ॥ १७०४

सूक्त १८

4 8 2 18 01 a उप त्वा रण्वसन्दृशं प्रयस्वन्तः सहस्कृत ।
4 8 2 18 01 b अग्ने ससृज्महे गिरः ॥ १७०५
4 8 2 18 02 a उप च्छायामिव घृणेरगन्म शर्म ते वयम् ।
4 8 2 18 02 b अग्ने हिरण्यसन्दृशः ॥ १७०६
4 8 2 18 03 a य उग्र इव शर्यहा तिग्मशृङ्गो न वꣳसगः ।
4 8 2 18 03 b अग्ने पुरो रुरोजिथ ॥ १७०७

सूक्त १९

4 8 2 19 01 a ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम् ।
4 8 2 19 01 b अजस्रं घर्ममीमहे ॥ १७०८
4 8 2 19 02 a य इदं प्रतिपप्रथे यज्ञस्य स्वरुत्तिरन् ।
4 8 2 19 02 b ऋतूनुत्सृजते वशी ॥ १७०९
4 8 2 19 03 a अग्निः प्रियेषु धामसु कामो भूतस्य भव्यस्य ।
4 8 2 19 03 b सम्राडेको वि राजति ॥ १७१०

इत्यष्टमप्रपाठके द्वितीयोऽर्धः ॥

आष्टम प्रपाठकः । तृतीयोऽर्धः

सूक्त १

4 8 3 01 01 a अग्निः प्रत्नेन जन्मना शुम्भानस्तन्वा३ँ स्वाम् ।
4 8 3 01 01 b कविर्विप्रेण ववृधे ॥ १७११
4 8 3 01 02 a ऊर्ज्जो नपातमा हुवेऽग्निं पावकशोचिषम् ।
4 8 3 01 02 b अस्मिन्यज्ञे स्वध्वरे ॥ १७१२
4 8 3 01 03 a स नो मित्रमहस्त्वमग्ने शुक्रेण शोचिषा ।
4 8 3 01 03 b देवैरा सत्सि बर्हिषि ॥ १७१३

सूक्त २

4 8 3 02 01 a उत्ते शुष्मासो अस्थू रक्षो भिन्दन्तो अद्रिवः ।
4 8 3 02 01 b नुदस्व याः परिस्पृधः ॥ १७१४
4 8 3 02 02 a अया निजघ्निरोजसा रथसङ्गे धने हिते ।
4 8 3 02 02 b स्तवा अबिभ्युषा हृदा ॥ १७१५
4 8 3 02 03 a अस्य व्रतानि नाधृषे पवमानस्य दूढ्या ।
4 8 3 02 03 b रुज यस्त्वा पृतन्यति ॥ १७१६
4 8 3 02 04 a तꣳ हिन्वन्ति मदच्युतꣳ हरिं नदीषु वाजिनम् ।
4 8 3 02 04 b इन्दुमिन्द्राय मत्सरम् ॥ १७१७

सूक्त ३

4 8 3 03 01 a आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः ।
4 8 3 03 01 b मा त्वा के चिन्नि येमुरिन्न पाशिनोऽति धन्वेव ताꣳ इहि ॥ १७१८
4 8 3 03 02 a वृत्रखादो वलꣳ रुजः पुरां दर्मो अपामजः ।
4 8 3 03 02 b स्थाता रथस्य हर्योरभिस्वर इन्द्रो दृढा चिदारुजः ॥ १७१९
4 8 3 03 03 a गम्भीराꣳ उदधीꣳरिव क्रतुं पुष्यसि गा इव ।
4 8 3 03 03 b प्र सुगोपा यवसं धेनवो यथा ह्रदं कुल्या इवाशत ॥ १७२०

सूक्त ४

4 8 3 04 01 a यथा गौरो अपा कृतं तृष्यन्नेत्यवेरिणम् ।
4 8 3 04 01 b आपित्वे नः प्रपित्वे तूयमा गहि कण्वेषु सु सचा पिब ॥ १७२१
4 8 3 04 02 a मन्दन्तु त्वा मघवन्निन्द्रेन्दवो राधोदेयाय सुन्वते ।
4 8 3 04 02 b आमुष्या सोमममपिबश्चमू सुतं ज्येष्ठं तद्दधिषे सहः ॥ १७२२

सूक्त ५

4 8 3 05 01 a त्वमङ्ग प्र शꣳसिषो देवः शविष्ठ मर्त्यम् ।
4 8 3 05 01 b न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः ॥ १७२३

4 8 3 05 02 a मा ते राधाꣳसि मा त ऊतयो वसोऽस्मान्कदा चना दभन् ।
4 8 3 05 02 b विश्वा च न उपमिमीहि मानुष वसूनि चर्षणिभ्य आ ॥ १७२४

सूक्त ६

4 8 3 06 01 a प्रति ष्या सूनरी जनी व्युच्छन्ती परि स्वसुः ।
4 8 3 06 01 b दिवो अदर्शि दुहिता ॥ १७२५
4 8 3 06 02 a अश्वेव चित्रारुषी माता गवामृतावरी ।
4 8 3 06 02 b सखा भूदश्विनोरुषाः ॥ १७२६
4 8 3 06 03 a उत सखास्यश्विनोरुत माता गवामसि ।
4 8 3 06 03 b उतोषो वस्व ईशिषे ॥ १७२७

सूक्त ७

4 8 3 07 01 a एषो उषा अपूर्व्या व्युच्छति प्रिया दिवः ।
4 8 3 07 01 b स्तुषे वामश्विना बृहत् ॥ १७२८
4 8 3 07 02 a या दस्रा सिन्धुमातरा मनोतरा रयीणाम् ।
4 8 3 07 02 b धिया देवा वसुविदा ॥ १७२९
4 8 3 07 03 a वच्यन्ते वां ककुहासो जूर्णायामधि विष्टपि ।
4 8 3 07 03 b यद्वाꣳ रथो विभिष्पतात् ॥ १७३०

सूक्त ८

4 8 3 08 01 a उषस्तच्चित्रमा भरास्मभ्यं वाजिनीवति ।
4 8 3 08 01 b येन तोकं च तनयं च धामहे ॥ १७३१
4 8 3 08 02 a उषो अद्येह गोमत्यश्वावति विभावरि ।
4 8 3 08 02 b रेवदस्मे व्युच्छ सूनृतावति ॥ १७३२
4 8 3 08 03 a युङ्क्ष्वा हि वाजिनीवत्यश्वाꣳ अद्यारुणाꣳ उषः ।
4 8 3 08 03 b अथा नो विश्वा सौभगान्या वह ॥ १७३३

सूक्त ९

4 8 3 09 01 a अश्विना वर्तिरस्मदा गोमद्दस्रा हिरण्यवत् ।
4 8 3 09 01 b अर्वाग्रथꣳ समनसा नि यच्छतम् ॥ १७३४
4 8 3 09 02 a एह देवा मयोभुवा दस्रा हिरण्यवर्त्तनी ।
4 8 3 09 02 b उषर्बुधो वहन्तु सोमपीतये ॥ १७३५
4 8 3 09 03 a यावित्था श्लोकमा दिवो ज्योतिर्जनाय चक्रथुः ।
4 8 3 09 03 b आ न ऊर्जं वहतमश्विना युवम् ॥ १७३६

सूक्त १०

4 8 3 10 01 a अग्निं तं मन्ये यो वसुरस्तं यं यन्ति धेनवः ।
4 8 3 10 01 b अस्तमर्वन्त आशवोस्तं नित्यासो वाजिन इषꣳ स्तोतृभ्य आ भर ॥१७३७
4 8 3 10 02 a अग्निर्हि वाजिनं विशे ददाति विश्वचर्षणिः ।
4 8 3 10 02 b अग्नी राये स्वाभुवꣳ स प्रीतो याति वार्यमिषꣳ स्तोतृभ्य आ भर ॥१७३८
4 8 3 10 03 a सो अग्निर्यो वसुर्गृणे सं यमायन्ति धेनवः ।
4 8 3 10 03 b समर्वन्तो रघुद्रुवः सꣳ सुजातासः सूरय इषꣳ स्तोतृभ्य आ भर ॥१७३९

सूक्त ११

4 8 3 11 01 a महे नो अद्य बोधयोषो राये दिवित्मती ।
4 8 3 11 01 b यथा चिन्नो अबोधयः सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥१७४०
4 8 3 11 02 a या सुनीथे शौचद्रथे व्यौच्छो दुहितर्दिवः ।
4 8 3 11 02 b सा व्युच्छ सहीयसि सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥१७४१
4 8 3 11 03 a सा नो अद्याभरद्वसुर्व्युच्छा दुहितर्दिवः ।
4 8 3 11 03 b यो व्यौच्छः सहीयसि सत्यश्रवसि याय्ये सुजाते अश्वसूनृते ॥१७४२

सूक्त १२

4 8 3 12 01 a प्रति प्रियतमꣳ रथं वृशणं वसुवाहनम् ।
4 8 3 12 01 b स्तोता वामश्विनावृषि स्तोमेभिर्भूषति प्रति माध्वी मम श्रुतꣳ हवम् ॥१७४३
4 8 3 12 02 a अत्यायातमश्विना तिरो विश्वा अहꣳ सना ।
4 8 3 12 02 b दस्रा हिरण्यवर्त्तनी सुषुम्णा सिन्धुवाहसा माध्वी मम श्रुतꣳ हवम् ॥१७४४
4 8 3 12 03 a आ नो रत्नानि बिभ्रतावश्विना गच्छतं युवम् ।
4 8 3 12 03 b रुद्रा हिरण्यवर्त्तनी जुषाणा वाजिनीवसू माध्वी मम श्रुतꣳ हवम् ॥१७४५

सूक्त १३

4 8 3 13 01 a अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमुषासम् ।
4 8 3 13 01 b यह्वा इव प्र वयामुज्जिहानाः प्र भानवः सस्रते नाकमच्छ ॥१७४६
4 8 3 13 02 a अबोधि होता यजथाय देवानूर्ध्वो अग्निः सुमनाः प्रातरस्थात् ।
4 8 3 13 02 b समिद्धस्य रुशददर्शि पाजो महान्देवस्तमसो निरमोचि ॥१७४७
4 8 3 13 03 a यदीं गणस्य रशनामजीगः शुचिरङ्क्ते शुचिभिर्गोभिरग्निः ।
4 8 3 13 03 b आद्दक्षिणा युज्यते वाजयन्त्युत्तानामूर्ध्वो अधयज्जुहूभिः ॥१७४८

सूक्त १४

4 8 3 14 01 a इदꣳ श्रेष्ठं ज्योतिषां ज्योतिरागाच्चित्रः प्रकेतो अजनिष्ट विभ्वा ।
4 8 3 14 01 b यथा प्रसूता सवितुः सवायैवा रात्र्युषसे योनिमारैक् ॥१७४९

4 8 3 14 02 a रुशाद्वत्सा रुशती श्वेत्यागादारैगु कृष्णा सदनान्यस्याः ।
4 8 3 14 02 b समानबन्धू अमृते अनूची द्यावा वर्णं चरत आमिनाने ॥ १७५०
4 8 3 14 03 a समानो अध्वा स्वस्रोरनन्तस्तमन्यान्या चरतो देवशिष्टे ।
4 8 3 14 03 b न मेथेते न तस्थतुः सुमेके नक्तोषासा समनसा विरूपे ॥ १७५१

सूक्त १५

4 8 3 15 01 a आ भात्यग्निरुषसामनीकमुद्विप्राणां देवया वाचो अस्थुः ।
4 8 3 15 01 b अर्वाञ्चा नूनꣳ रथ्येह यातं पीपिवाꣳसमश्विना घर्ममच्छ ॥ १७५२
4 8 3 15 02 a न सꣳस्कृतं प्र मिमीतो गमिष्ठान्ति नूनमश्विनोपस्तुतेह ।
4 8 3 15 02 b दिवाभिपित्वेवसागमिष्ठा प्रत्यवर्त्तिं दाशुषे शम्भविष्ठा ॥ १७५३
4 8 3 15 03 a उता यातꣳ संगवे प्रातरह्नो मध्यन्दिन उदिता सूर्यस्य ।
4 8 3 15 03 b दिवा नक्तमवसा शन्तमेन नेदानीं पीतिरश्विना ततान ॥ १७५४

सूक्त १६

4 8 3 16 01 a एता उ त्या उषसः केतुमक्रत पूर्वे अर्धे रजसो भानुमञ्जते ।
4 8 3 16 01 b निष्कृण्वाना आयुधानीव धृष्णवः प्रति गावोऽरुषीर्यन्ति मातरः ॥ १७५५
4 8 3 16 02 a उदपप्तन्नरुणा भानवो वृथा स्वायुजो अरुषीर्गा अयुक्षत ।
4 8 3 16 02 b अक्रन्नुषासो वयुनानि पूर्वथा रुशन्तं भानुमरुषीरशिश्रयुः ॥ १७५६
4 8 3 16 03 a अर्चन्ति नारीरपसो न विष्टिभिः समानेन योजनेना परावतः ।
4 8 3 16 03 b इषं वहन्तीः सुकृते सुदानवे विश्वेदह यजमानाय सुन्वते ॥ १७५७

सूक्त १७

4 8 3 17 01 a अबोध्यग्निर्ज्म उदेति सूर्यो व्यू३षाश्चन्द्रा मह्यावो अर्चिषा ।
4 8 3 17 01 b आयुक्षातामश्विना यातवे रथं प्रासावीद्देवः सविता जगत्पृथक् ॥ १७५८
4 8 3 17 02 a यद्युञ्जाथे वृषणमश्विना रथं घृतेन नो मधुना क्षत्रमुक्षतम् ।
4 8 3 17 02 b अस्माकं ब्रह्म पृतनासु जिन्वतं वयं धना शूरसाता भजेमहि ॥ १७५९
4 8 3 17 03 a अर्वाङ्त्रिचक्रो मधुवाहनो रथो जीराश्वो अश्विनोर्यातु सुष्टुतः ।
4 8 3 17 03 b त्रिवन्धुरो मघवा विश्वसौभगः शं न आ वक्षद्द्विपदे चतुष्पदे ॥ १७६०

सूक्त १८

4 8 3 18 01 a प्र ते धारा असश्चतो दिवो न यन्ति वृष्टयः ।
4 8 3 18 01 b अच्छा वाजꣳ सहस्रिणम् ॥ १७६१
4 8 3 18 02 a अभि प्रियाणि काव्या विश्वा चक्षाणो अर्षति ।
4 8 3 18 02 b हरिस्तुञ्जान आयुधा ॥ १७६२
4 8 3 18 03 a स मर्मृजान आयुभिरिभो राजेव सुव्रतः ।
4 8 3 18 03 b श्येनो न वꣳसु षीदति ॥ १७६३

4 8 3 18 04 a स नो विश्वा दिवो वसूतो पृथिव्या अधि ।
4 8 3 18 04 b पुनान इन्दवा भर ॥ १७६४

इत्यष्टमप्रपाठके तृतीयोऽर्धः ॥

नवम प्रपाठकः । प्रथमोऽर्धः

सूक्त १

4 9 1 01 01 a प्रास्य धारा अक्षरन्वृष्णः सुतस्यौजसा ।
4 9 1 01 01 b देवाꣳ अनु प्रभूषतः ॥ १७६५
4 9 1 01 02 a सप्तिं मृजन्ति वेधसो गृणन्तः कारवो गिरा ।
4 9 1 01 02 b ज्योतिर्जज्ञानमुक्थ्यम् ॥ १७६६
4 9 1 01 03 a सुषहा सोम तानि ते पुनानाय प्रभूवसो ।
4 9 1 01 03 b वर्धा समुद्रमुक्थ्यम् ॥ १७६७

सूक्त २

4 9 1 02 01 a एष ब्रह्मा य ऋत्विय इन्द्रो नाम श्रुतो गृणे ॥ १७६८
4 9 1 02 02 a त्वामिच्छवसस्पते यन्ति गिरो न संयतः ॥ १७६९
4 9 1 02 03 a वि स्रुतयो यथा पथा इन्द्र त्वद्यन्तु रातयः ॥ १७७०

सूक्त ३

4 9 1 03 01 a आ त्वा रथं यथोतये सुम्नाय वर्त्तयामसि ।
4 9 1 03 01 b तुविकूर्मिमृतीषहमिन्द्रं शविष्ठ सत्पतिम् ॥ १७७१
4 9 1 03 02 a तुविशुष्म तुविक्रतो शचीवो विश्वया मते ।
4 9 1 03 02 b आ पप्राथ महित्वना ॥ १७७२
4 9 1 03 03 a यस्य ते महिना महः परि ज्मायन्तमीयतुः ।
4 9 1 03 03 b हस्ता वज्रꣳ हिरण्ययम् ॥ १७७३

सूक्त ४

4 9 1 04 01 a आ यः पुरं नार्मिणीमदीदेदत्यः कविर्नभन्यो३ नार्व ।
4 9 1 04 01 b सूरो न रुरुक्वाञ्छतात्मा ॥ १७७४
4 9 1 04 02 a अभि द्विजन्मा त्री रोचनानि विश्वा रजाꣳसि शुशुचनो अस्थात् ।
4 9 1 04 02 b होता यजिष्ठो अपाꣳ सधस्थे ॥ १७७५
4 9 1 04 03 a अयꣳ स होता यो द्विजन्मा विश्वा दधे वार्याणि श्रवस्या ।
4 9 1 04 03 b मर्तो यो अस्मै सुतुको ददाश ॥ १७७६

सूक्त ५

4 9 1 05 01 a अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रꣳ हृदिस्पृषम् ।
4 9 1 05 01 b ऋध्यामा त ओहैः ॥ १७७७
4 9 1 05 02 a अधा ह्यग्ने क्रतोर्भद्रस्य दक्षस्य साधोः ।
4 9 1 05 02 b रथीर्ऋतस्य बृहतो बभूथ ॥ १७७८
4 9 1 05 03 a एभिर्नो अर्कैर्भवा नो अर्वाङ्क्स्वा३र्ण ज्योतिः ।
4 9 1 05 03 b अग्ने विश्वेभिः सुमना अनीकैः ॥ १७७९

सूक्त ६

4 9 1 06 01 a अग्ने विवस्वदुषसश्चित्रꣳ राधो अमर्त्य ।
4 9 1 06 01 b आ दाशुषे जातवेदो वहा त्वमद्या देवाꣳ उषर्बुधः ॥ १७८०
4 9 1 06 02 a जुष्टो हि दूतो असि हव्यवाहनोऽग्ने रथीरध्वराणाम् ।
4 9 1 06 02 b सजूरश्विभ्यामुषसा सुवीर्यमस्मे धेहि श्रवो बृहत् ॥ १७८१

सूक्त ७

4 9 1 07 01 a विधुं दद्राणꣳ समने बहूनां युवानꣳ सन्तं पलितो जगार ।
4 9 1 07 01 b देवस्य पश्य काव्यं महित्वाद्या ममार स ह्यः समान ॥ १७८२
4 9 1 07 02 a शाक्मना शाको अरुणः सुपर्ण आ यो महः शूरः सनादनीडः ।
4 9 1 07 02 b यच्चिकेत सत्यमित्तन्न मोघं वसु स्पार्हमुत जेतोत दाता ॥ १७८३
4 9 1 07 03 a ऐभिर्ददे वृष्ण्या पौꣳस्यानि येभिरौक्षद्वृत्रहत्याय वज्री ।
4 9 1 07 03 b ये कर्मणः क्रियमाणस्य मह्न ऋतेकर्ममुदजायन्त देवाः ॥ १७८४

सूक्त ८

4 9 1 08 01 a अस्ति सोमो अयꣳ सुतः पिबन्त्यस्य मरुतः ।
4 9 1 08 01 b उत स्वराजो अश्विना ॥ १७८५
4 9 1 08 02 a पिबन्ति मित्रो अर्यमा तना पूतस्य वरुणः ।
4 9 1 08 02 b त्रिषधस्थस्य जावतः ॥ १७८६
4 9 1 08 03 a उतो न्वस्य जोषमा इन्द्रः सुतस्य गोमतः ।
4 9 1 08 03 b प्रातर्होतेव मत्सति ॥ १७८७

सूक्त ९

4 9 1 09 01 a बण्महाꣳ असि सूर्य बडादित्य महाꣳ असि ।
4 9 1 09 01 b महस्ते सतो महिमा पनिष्टम मह्ना देव महाꣳ असि ॥ १७८८
4 9 1 09 02 a बट् सूर्य श्रवसा महाꣳ असि सत्रा देव महाꣳ असि ।
4 9 1 09 02 b मह्ना देवानामसुर्यः पुरोहितो विभु ज्योतिरदाभ्यम् ॥ १७८९

सूक्त १०

4 9 1 10 01 a उप नो हरिभिः सुतं याहि मदानां पते ।
4 9 1 10 01 b उप नो हरिभिः सुतम् ॥ १७९०
4 9 1 10 02 a द्विता यो वृत्रहन्तमो विद इन्द्रः शतक्रतुः ।
4 9 1 10 02 b उप नो हरिभिः सुतम् ॥ १७९१
4 9 1 10 03 a त्वꣳ हि वृत्रहन्नेषां पाता सोमानामसि ।
4 9 1 10 03 b उप नो हरिभिः सुतम् ॥ १७९२

सूक्त ११

4 9 1 11 01 a प्र वो महे महेवृधे भरध्वं प्रचेतसे प्र सुमतिं कृणुध्वम् ।
4 9 1 11 01 b विशः पूर्वीः प्र चर चर्षणिप्राः ॥ १७९३
4 9 1 11 02 a उरुव्यचसे महिने सुवृक्तिमिन्द्राय ब्रह्म जनयन्त विप्राः ।
4 9 1 11 02 b तस्य व्रतानि न मिनन्ति धीराः ॥ १७९४
4 9 1 11 03 a इन्द्रं वाणीरनुत्तमन्युमेव सत्रा राजानं दधिरे सहध्यै ।
4 9 1 11 03 b हर्यश्वाय बर्हया समापीन् ॥ १७९५

सूक्त १२

4 9 1 12 01 a यदिन्द्र यावतस्त्वमेतावदहमीशीय ।
4 9 1 12 01 b स्तोतारमिद्दधिषे रदावसो न पापत्वाय रꣳसिषम् ॥ १७९६
4 9 1 12 02 a शिक्षेयमिन्महयते दिवेदिवे राय आ कुहचिद्विदे ।
4 9 1 12 02 b न हि त्वदन्यन्मघवन्न आप्यं वस्यो अस्ति पिता च न ॥ १७९७

सूक्त १३

4 9 1 13 01 a श्रुधी हवं विपिपानस्याद्रेर्बोधा विप्रस्यार्चतो मनीषाम् ।
4 9 1 13 01 b कृष्वा दुवाꣳस्यन्तमा सचेमा ॥ १७९८
4 9 1 13 02 a न ते गिरो अपि मृष्ये तुरस्य न सुष्टुतिमसुर्यस्य विद्वान् ।
4 9 1 13 02 b सदा ते नाम स्वयशो विवक्मि ॥ १७९९
4 9 1 13 03 a भूरि हि ते सवना मानुषेषु भूरि मनीषी हवते त्वामित् ।
4 9 1 13 03 b मारे अस्मन्मघवञ्ज्योक्कः ॥ १८००

सूक्त १४

4 9 1 14 01 a प्रो ष्वस्मै पुरोरथमिन्द्राय शूषमर्चत ।
4 9 1 14 01 b अभीके चिदु लोककृत्सङ्गे समत्सु वृत्रह ।
4 9 1 14 01 c अस्माकं बोधि चोदिता नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥ १८०१

4 9 1 14 02 a त्वꣳ सिन्धूꣳरवासृजोऽधराचो अहन्नहिम् ।
4 9 1 14 02 b अशत्रुरिन्द्र जज्ञिषे विश्वं पुष्यसि वार्यम् ।
4 9 1 14 02 c तं त्वा परि ष्वजामहे नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥ १८०२
4 9 1 14 03 a वि षु विश्वा अरातयोऽर्यो नशन्त नो धियः ।
4 9 1 14 03 b अस्तासि शत्रवे वधं यो न इन्द्र जिघाꣳसति ।
4 9 1 14 03 c या ते रातिर्ददिवसु नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥ १८०३

सूक्त १५

4 9 1 15 01 a रेवाꣳ इद्रेवत स्तोता स्यात्त्वावतो मघोनः ।
4 9 1 15 01 b प्रेदु हरिवः सुतस्य ॥ १८०४
4 9 1 15 02 a उक्थं च न शस्यमानं नागो रयिरा चिकेत ।
4 9 1 15 02 b न गायत्रं गीयमानम् ॥ १८०५
4 9 1 15 03 a मा न इन्द्र पीयत्नवे मा शर्धते परा दाः ।
4 9 1 15 03 b शिक्षा शचीवः शचीभिः ॥ १८०६

सूक्त १६

4 9 1 16 01 a एन्द्र याहि हरिभिरुप कण्वस्य सुष्टुतिम् ।
4 9 1 16 01 b दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ १८०७
4 9 1 16 02 a अत्रा वि नेमिरेषामुरां न धूनुते वृकः ।
4 9 1 16 02 b दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ १८०८
4 9 1 16 03 a आ त्वा ग्रावा वदन्निह सोमी घोषेण वक्षतु ।
4 9 1 16 03 b दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ १८०९

सूक्त १७

4 9 1 17 01 a पवस्व सोम मन्दयन्निन्द्राय मधुमत्तमः ॥ १८१०
4 9 1 17 02 a ते सुतासो विपश्चितः शुक्रा वायुमसृक्षत ॥ १८११
4 9 1 17 03 a असृग्रं देववीतये वाजयन्तो रथा इव ॥ १८१२

सूक्त १८

4 9 1 18 01 a अग्निꣳ होतारं मन्ये दास्वन्तं वसोः सूनुꣳ सहसो जातवेदसं विप्रं न जातवेदसम् ।
4 9 1 18 01 b य ऊर्ध्वरो स्वध्वरो देवो देवाच्या कृपा ।
4 9 1 18 01 c घृतस्य विभ्राष्टिमनु शुक्रशोचिष आजुह्वानस्य सर्पिषः ॥ १८१३
4 9 1 18 02 a यजिष्ठं त्वा यजमाना हुवेम ज्येष्ठमङ्गिरसां विप्र मन्मभिर्विप्रेभिः शुक्र मन्मभिः ।
4 9 1 18 02 b परिज्मानमिव द्याꣳ होतारं चर्षणीनाम् ।
4 9 1 18 02 c शोचिष्केशं वृषणं यमिमा विशः प्रावन्तु जूतये विशः ॥ १८१४
4 9 1 18 03 a स हि पुरू चिदोजसा विरुक्मता दीद्यानो भवति द्रुहन्तरः परशुर्न द्रुहन्तरः ।

4 9 1 18 03 b वीडु चिद्यस्य समृतौ श्रुवद्वनेव यत्स्थिरम् ।
4 9 1 18 03 c निष्षहमाणो यमते नायते धन्वासहा नायते ॥ १८१५
इति नवमप्रपाठके प्रथमोऽर्धः ॥

नवम प्रपाठकः । द्वितीयोऽर्धः

सूक्त १

4 9 2 01 01 a अग्ने तव श्रवो वयो महि भ्राजन्ते अर्चयो विभावसो ।
4 9 2 01 01 b बृहद्भानो शवसा वाजमुक्थ्यꣳ दधासि दाशुषे कवे ॥ १८१६
4 9 2 01 02 a पावकवर्चाः शुक्रवर्चा अनूनवर्चा उदियर्षि भानुना ।
4 9 2 01 02 b पुत्रो मातरा विचरन्नुपावसि पृणक्षि रोदसी उभे ॥ १८१७
4 9 2 01 03 a ऊर्जो नपाज्जातवेदः सुशस्तिभिर्मन्दस्व धीतिभिर्हितः ।
4 9 2 01 03 b त्वे इषः सं दधुर्भूरिवर्पसश्चित्रोतयो वामजाताः ॥ १८१८
4 9 2 01 04 a इरज्यन्नग्ने प्रथयस्व जन्तुभिरस्मे रायो अमर्त्य ।
4 9 2 01 04 b स दर्शतस्य वपुषो वि राजसि पृणक्षि दर्शतं क्रतुम् ॥ १८१९
4 9 2 01 05 a इष्कर्त्तारमध्वरस्य प्रचेतसं क्षयन्तꣳ राधसो महः ।
4 9 2 01 05 b रातिं वामस्य सुभगां महीमिषं दधासि सानसिꣳ रयिम् ॥ १८२०
4 9 2 01 06 a ऋतावानं महिषं विश्वदर्शतमग्निꣳ सुम्नाय दधिरे पुरो जनाः ।
4 9 2 01 06 b श्रुत्कर्णꣳ सप्रथस्तमं त्वा गिरा दैव्यं मानुषा युगा ॥ १८२१

सूक्त २

4 9 2 02 01 a प्र सो अग्ने तवोतिभिः सुविराभिस्तरति वाजकर्मभिः ।
4 9 2 02 01 b यस्य त्वꣳ सख्यमाविथ ॥ १८२२
4 9 2 02 02 a तव द्रप्सो नीलवान्वाश ऋत्विय इन्धानः सिष्णवा ददे ।
4 9 2 02 02 b त्वं महीनामुषसामसि प्रियः क्षपो वस्तुषु राजसि ॥ १८२३

सूक्त ३

4 9 2 03 01 a तमोषधीर्दधिरे गर्भमृत्वियं तमापो अग्निं जनयन्त मातरः ।
4 9 2 03 01 b तमित्समानं वनिनश्च वीरुधोऽन्तर्वतीश्च सुवते च विश्वहा ॥ १८२४

सूक्त ४

4 9 2 04 01 a अग्निरिन्द्राय पवते दिवि शुक्रो वि राजति ।
4 9 2 04 01 b महिषीव वि जायते ॥ १८२५

सूक्त ५

4 9 2 05 01 a यो जागार तमृचः कामयन्ते यो जागार तमु सामानि यन्ति ।
4 9 2 05 01 b यो जागार तमयꣳ सोम आह तवाहमस्मि सख्ये न्योकाः ॥१८२६

सूक्त ६

4 9 2 06 01 a अग्निर्जागार तमृचः कामयन्तेग्निर्जागार तमु सामानि यन्ति ।
4 9 2 06 01 b अग्निर्जागार तमयꣳ सोम आह तवाहमस्मि सख्ये न्योकाः ॥१८२७

सूक्त ७

4 9 2 07 01 a नमः सखिभ्यः पूर्वसद्भ्यो नमः साकन्निषेभ्यः ।
4 9 2 07 01 b युञ्जे वाचꣳ शतपदीम् ॥१८२८
4 9 2 07 02 a युञ्जे वाचꣳ शतपदीं गाये सहस्रवर्त्तनि ।
4 9 2 07 02 b गायत्रं त्रैष्टुभं जगत् ॥१८२९
4 9 2 07 03 a गायत्रं त्रैष्टुभं जगद्विश्वा रूपाणि सम्भृता ।
4 9 2 07 03 b देवा ओकाꣳसि चक्रिरे ॥१८३०

सूक्त ८

4 9 2 08 01 a अग्निर्ज्योतिर्ज्योतिरग्निरिन्द्रो ज्योतिर्ज्योतिरिन्द्रः ।
4 9 2 08 01 b सूर्यो ज्योतिर्ज्योतिः सूर्यः ॥१८३१
4 9 2 08 02 a पुनरूर्जा नि वर्त्तस्व पुनरग्न इषायुषा ।
4 9 2 08 02 b पुनर्नः पाह्यꣳहसः ॥१८३२
4 9 2 08 03 a सह रय्या नि वर्तस्वाग्ने पिन्वस्व धारया ।
4 9 2 08 03 b विश्वप्स्न्या विश्वतस्परि ॥१८३३

सूक्त ९

4 9 2 09 01 a यदिन्द्राहं यथा त्वमीशीय वस्व एक इत् ।
4 9 2 09 01 b स्तोता मे गोसखा स्यात् ॥१८३४
4 9 2 09 02 a शिक्षेयमस्मै दित्सेयꣳ शचीपते मनीषिणे ।
4 9 2 09 02 b यदहं गोपतिः स्याम् ॥१८३५
4 9 2 09 03 a धेनुष्ट इन्द्र सूनृता यजमानाय सुन्वते ।
4 9 2 09 03 b गामश्वं पिप्युषी दुहे ॥१८३६

सूक्त १०

4 9 2 10 01 a आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन ।

4 9 2 10 01 b महे रणाय चक्षसे ॥ १८३७
4 9 2 10 02 a यो वः शिवतमो रसस्तस्य भाजयतेह नः ।
4 9 2 10 02 b उशतीरिव मातरः ॥ १८३८
4 9 2 10 03 a तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ ।
4 9 2 10 03 b आपो जनयथा च नः ॥ १८३९

सूक्त ११

4 9 2 11 01 a वात आ वातु बेषजꣳ शम्भु मयोभु नो हृदे ।
4 9 2 11 01 b प्र न अयूꣳषि तारिषत् ॥ १८४०
4 9 2 11 02 a उत वात पितासि न उत भ्रातोत नः सखा ।
4 9 2 11 02 b स नो जीवातवे कृधि ॥ १८४१
4 9 2 11 03 a यददो वात ते गृहे३ऽमृतं निहितं गुहा ।
4 9 2 11 03 b तस्यो नो देहि जीवसे ॥ १८४२

सूक्त १२

4 9 2 12 01 a अभि वाजी विश्वरूपो जनित्रꣳ हिरण्ययं बिभ्रदत्कꣳ सुपर्णः ।
4 9 2 12 01 b सूर्यस्य भानुमृतुथा वसानः परि स्वयं मेधमृज्रो जजान ॥ १८४३
4 9 2 12 02 a अप्सु रेतः शिश्रिये विश्वरूपं तेजः पृथिव्यामधि यत्सम्बभूव ।
4 9 2 12 02 b अन्तरिक्षे स्वं महिमानं मिमानः कनिक्रन्ति वृष्णो अश्वस्य रेतः ॥ १८४४
4 9 2 12 03 a अयꣳ सहस्रा परि युक्ता वसानः सूर्यस्य भानुं यज्ञो दाधार ।
4 9 2 12 03 b सहस्रदाः शतदा भूरिदावा धर्त्ता दिवो भुवनस्य विश्पतिः ॥ १८४५

सूक्त १३

4 9 2 13 01 a नाके सुपर्णमुप यत्पतन्तꣳ हृदा वेनन्तो अभ्यचक्षत त्वा ।
4 9 2 13 01 b हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम् ॥ १८४६
4 9 2 13 02 a ऊर्ध्वो गन्धर्वो अधि नाके अस्थात्प्रत्यङ्चित्रा बिभ्रदस्यायुधानि ।
4 9 2 13 02 b वसानो अत्कꣳ सुरभिं दृशे कꣳ स्व३र्ण नाम जनत प्रियाणि ॥ १८४७
4 9 2 13 03 a द्रप्सः समुद्रमभि यज्जिगाति पश्यन्गृध्रस्य चक्षसा विधर्मन् ।
4 9 2 13 03 b भानुः शुक्रेण शोचिषा चकानस्तृतीये चक्रे रजसि प्रियाणि ॥ १८४८

नवमप्रपाठके द्वितीयोऽर्धः ॥

नवम प्रपाठकः । तृतीयोऽर्धः

सूक्त १

4 9 3 01 01 a आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् ।

4 9 3 01 01 b सङ्क्रन्दनोऽनिमिष एकवीरः शतꣳ सेना अजयत्साकमिन्द्रः ॥ १८४९
4 9 3 01 02 a सङ्क्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ।
4 9 3 01 02 b तदिन्द्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा ॥ १८५०
4 9 3 01 03 a स इषुहस्तैः स निषङ्गिभिर्वशी सꣳस्रष्टा स युध इन्द्रो गणेन ।
4 9 3 01 03 b सꣳ सृष्टजित्सोमपा बाहुशर्ध्यू३ग्रधन्वा प्रतिहिताभिरस्ता ॥ १८५१

सूक्त २

4 9 3 02 01 a बृहस्पते परि दीया रथेन रक्षोहामित्राꣳ अपबाधमानः ।
4 9 3 02 01 b प्रभञ्जन्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् ॥ १८५२
4 9 3 02 02 a बलविज्ञायः स्थविरः प्रवीरः सहस्वान्वाजी सहमान उग्रः ।
4 9 3 02 02 b अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमा तिष्ठ गोवित् ॥ १८५३
4 9 3 02 03 a गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा ।
4 9 3 02 03 b इमꣳ सजाता अनु वीरयध्वमिन्द्रꣳ सखायो अनु सꣳ रभध्वम् ॥ १८५४

सूक्त ३

4 9 3 03 01 a अभि गोत्राणि सहसा गाहमानोऽदयो वीरः शतमन्युरिन्द्रः ।
4 9 3 03 01 b दुश्च्यवनः पृतनाषाडयुध्यो३ऽस्माकꣳ सेना अवतु प्र युत्सु ॥ १८५५
4 9 3 03 02 a इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः ।
4 9 3 03 02 b देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम् ॥ १८५६
4 9 3 03 03 a इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुताꣳ शर्ध उग्रम् ।
4 9 3 03 03 b महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात् ॥ १८५७

सूक्त ४

4 9 3 04 01 a उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां मनाꣳसि ।
4 9 3 04 01 b उद्वृत्रहन्वाजिनां वाजिनान्युद्रथानां जयतां यन्तु घोषाः ॥ १८५८
4 9 3 04 02 a अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु ।
4 9 3 04 02 b अस्माकं वीरा उत्तरे भवन्त्वस्माꣳ उ देवा अवता हवेषु ॥ १८५९
4 9 3 04 03 a असौ या सेना मरुतः परेषामभ्येति न ओजसा स्पर्धमाना ।
4 9 3 04 03 b तां गूहत तमसापव्रतेन यथैतेषामन्यो अन्यं न जानात् ॥ १८६०

सूक्त ५

4 9 3 05 01 a अमीषां चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि ।
4 9 3 05 01 b अभि प्रेहि निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम् ॥ १८६१
4 9 3 05 02 a प्रेता जयता नर इन्द्रो वः शर्म यच्छतु ।
4 9 3 05 02 b उग्रा वः सन्तु बाहवोऽनाधृष्या यथासथ ॥ १८६२
4 9 3 05 03 a अवसृष्टा परा पत शरव्ये ब्रह्मसꣳशिते ।

4 9 3 05 03 b गच्छामित्रान्प्र पद्यस्व मामीषां कं च नोच्छिषः ॥१८६३

सूक्त ६

4 9 3 06 01 a कङ्काः सुपर्णा अनु यन्त्वेनान्गृध्राणामन्नमसावस्तु सेना ।
4 9 3 06 01 b मैषां मोच्यघहारश्च नेन्द्र वयाꣳस्येनाननुसंयन्तु सर्वान् ॥१८६४
4 9 3 06 02 a अमित्रसेनां मघवन्नस्माञ्छत्रुयतीमभि ।
4 9 3 06 02 b उभौ तामिन्द्र वृत्रहन्नग्निश्च दहतं प्रति ॥१८६५
4 9 3 06 03 a यत्र बाणाः सम्पतन्ति कुमारा विशिखा इव ।
4 9 3 06 03 b तत्रा नो ब्रह्मणस्पतिरदितिः शर्म यच्छतु विश्वाहा शर्म यच्छतु ॥१८६६

सूक्त ७

4 9 3 07 01 a वि रक्षो वि मृधो जहि वि वृत्रस्य हनू रुज ।
4 9 3 07 01 b वि मन्युमिन्द्र वृत्रहन्नमित्रस्याभिदासतः ॥१८६७
4 9 3 07 02 a वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः ।
4 9 3 07 02 b यो अस्माꣳ अभिदासत्यधरं गमया तमः ॥१८६८
4 9 3 07 03 a इन्द्रस्य बाहू स्थविरौ युवानावनाधृष्यौ सुप्रतीकावसह्यौ ।
4 9 3 07 03 b तौ युञ्जीत प्रथमौ योग आगते याभ्यां जितमसुराणाꣳ सहो महत् ॥१८६९

सूक्त ८

4 9 3 08 01 a मर्माणि ते वर्मणा च्छादयामि सोमस्त्वा राजामृतेनानु वस्ताम् ।
4 9 3 08 01 b उरोर्वरीयो वरुणस्ते कृणोतु जयन्तं त्वानु देवा मदन्तु ॥१८७०
4 9 3 08 02 a अन्धा अमित्रा भवताशीर्षाणोऽहय इव ।
4 9 3 08 02 b तेषां वो अग्निनुन्नानामिन्द्रो हन्तु वरंवरम् ॥१८७१
4 9 3 08 03 a यो नः स्वोऽरणो यश्च निष्ट्यो जिघाꣳसति ।
4 9 3 08 03 b देवास्तꣳ सर्वे धूर्वन्तु ब्रह्म वर्म ममान्तरꣳ शर्म वर्म ममान्तरम् ॥१८७२

सूक्त ९

4 9 3 09 01 a मृगो न भीमः कुचरो गिरिष्ठाः परावत आ जगन्था परस्याः ।
4 9 3 09 01 b सृकꣳ सꣳशाय पविमिन्द्र तिग्मं वि शत्रूं ताढि वि मृधो नुदस्व ॥१८७३
4 9 3 09 02 a भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
4 9 3 09 02 b स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥१८७४
4 9 3 09 03 a स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
4 9 3 09 03 b स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥
4 9 3 09 03 c ॐ स्वस्ति नो बृहस्पतिर्दधातु ॥१८७५

इति नवमप्रपाठके तृतीयोऽर्धः ॥

इति नवमः प्रपाठकश्च समाप्तः ॥

॥ इत्युत्तरार्चिकः ॥

॥ इति सामवेदसंहिता समाप्ता ॥